॥ अष्टमाध्यायस्य प्रथमः पादः॥

सर्वस्य द्वे॥ १ ॥

सर्वस्येति च द्वे इति चैतदधिकृतं वेदितव्यम्। इत उत्तरं यद् वक्ष्यामः प्राक् 'पदस्य' (८.१.१६) इत्यतः, सर्वस्य द्वे भवत इत्येवं तद् वेदितव्यम्। वक्ष्यति—'नित्यवीप्सयोः' (८.१.४) इति, तत्र सर्वस्य स्थाने द्वे भवतः। के द्वे भवतः ? ये शब्दतश्चार्थतश्चोभयथान्तरतमे। एकस्य पचतिशब्दस्य द्वौ पचतिशब्दौ भवतः। पचतिपचति। ग्रामोग्रामो रमणीयः। यदा तु द्विःप्रयोगो द्विर्वचनं तदा स एव पचतिशब्दो द्विरावर्तते, तस्य द्वे आवृत्ती भवतः। सर्वस्येति किम् ? विस्पष्टार्थम्। अथ पदस्येत्येव कस्माद् नोच्यते ? नैवं शक्यम्, इह हि न स्यात्—प्रपचतिप्रपचतीति। इह द्रोग्धा, द्रोढा इति घत्वढत्वयोरसिद्धत्वादकृतयोरेव तयोर्द्विर्वचनं प्राप्नोति, तत्र पश्चाद्विकल्पे सत्यनिष्टमपि स्यात्—द्रोग्धाद्रोढा, द्रोढाद्रोग्धेति। तस्माद् वक्तव्यमेतत्—'पूर्वत्रासिद्धीयमद्विर्वचने' (परि० ११७) इति। सर्वस्येत्येतदेव वा कृतं सर्वकार्यप्रतिपत्त्यर्थं द्रष्टव्यम्॥

तस्य परमाम्रेडितम्॥ २ ॥

तस्य द्विरुक्तस्य यत् परं शब्दरूपं तदाम्रेडितसंज्ञं भवति। चौरचौर३, वृषलवृषल३, दस्योदस्यो३ घातयिष्यामि त्वा, बन्धयिष्यामि त्वा। आम्रेडितप्रदेशाः—'आम्रेडितं भर्त्सने' (८.२.९५) इत्येवमादयः॥

अनुदात्तं च॥ ३ ॥

अनुदात्तं च तद् भवति यदाम्रेडितसंज्ञम्। भुङ्क्तेभुङ्क्ते। पशून्पशून्॥

नित्यवीप्सयोः॥ ४ ॥

नित्ये चार्थे वीप्सायां च यद् वर्तते तस्य द्वे भवतः। केषु नित्यता ? तिङ्षु नित्यताव्ययकृत्सु च। कुत एतत् ? आभीक्ष्ण्यमिह नित्यता। आभीक्ष्ण्यं च क्रियाधर्मः। यां क्रियां कर्ता प्राधान्येनानुपरमन् करोति तन् नित्यम्। पचतिप१च१ति। जल्पतिज१ल्प१ति। भुक्त्वाभुक्त्वा व्रजति। भोजंभोजं१ व्रजति। लुनीहिलुनीहि इत्येवायं लुनाति। क्त्वाणमुलोर्लोटश्च द्विर्वचनापेक्षायामेव पौनःपुन्यप्रकाशने शक्तिः। यङ् तु तन्निरपेक्षः प्रकाशयति। पुनः पुनः पचति पापच्यत इति। यदा तु तत्र द्विर्वचनं तदा क्रियासमभिहारे पौनःपुन्यं द्रष्टव्यम्—पापच्यतेपा१प१च्य१त१ इति। अथ केषु वीप्सा ? सुप्सु वीप्सा। का पुनर्वीप्सा? व्याप्तिविशेषविषया प्रयोक्तुरिच्छा वीप्सा। का पुनः सा ? नानावाचिनामधिकरणानां

क्रियागुणाभ्यां युगपत् प्रयोक्तुर्व्याप्तुमिच्छा वीप्सा। नानाभूतार्थवाचिनां शब्दानां यान्यधिकरणानि वाच्यानि तेषां क्रियागुणाभ्यां युगपत् प्रयोक्तुर्व्याप्तुमिच्छा वीप्सा। ग्रामो-ग्रामो रमणीयः। जनपदोजनपदो रमणीयः। पुरुषःपुरुषो निधनमुपैति। यत् तिङन्तं नित्य- तया प्रकर्षेण च युक्तं ततः कृतद्विर्वचनात् प्रकर्षप्रत्यय इष्यते—पचतिपचति तरामिति। इह तु आढ्यतस्माढ्यतरस्मान्नयेति प्रकर्षयुक्तस्य वीप्सायोग इष्यते॥

परेर्वर्जने॥ ५ ॥

परीत्येतस्य वर्जनेऽर्थे द्वे भवतः। परिपरि त्रिगर्तेभ्यो वृष्टो देवः। परिपरि सौवीरेभ्यः। परिपरि सर्वसेनेभ्यः। वर्जनं परिहारः। वर्जन इति किम्? ओदनं परिषिञ्चति॥ परेर्वर्जनेऽसमासे वेति वक्तव्यम्॥ परिपरि त्रिगर्तेभ्यो वृष्टो देवः, परि त्रिगर्तेभ्यः। समासे तु तेनैवोक्तत्वाद् वर्जनस्य नैव भवति—परित्रिगर्तं वृष्टो देव इति॥

प्रसमुपोदः पादपूरणे॥ ६ ॥

प्र सम् उप उद् इत्येतेषां पादपूरणे द्वे भवतः, द्विर्वचनेन चेत् पादः पूर्यते। प्रप्रायमग्निर्भरतस्य शृण्वे (ऋ० ७.८.४)। संससमिद्युवसे वृषन् (ऋ० १०.१९१.१)। उपोप मे परा मृश (ऋ० १.१२६.७)। किं नोदुदु हर्षसे दातवा उ (ऋ० ४.२१.९)। पादपूरण इति किम्? प्र देवं देव्या धिया (ऋ० १०.१७६.२)। सामर्थ्यात् छन्दस्येवैतद् विधानम्। भाषायामनर्थकं स्यात् प्रयोगाभावात्॥

उपर्यध्यधसः सामीप्ये॥ ७ ॥

उपरि अधि अधस् इत्येतेषां द्वे भवतः सामीप्ये विवक्षिते। सामीप्यं प्रत्यासत्तिः कालकृता देशकृता च। उपर्युपरि दुःखम्। उपर्युपरि ग्रामम्। अध्यधि ग्रामम्। अधोऽधो नगरम्। सामीप्य इति किम्? उपरि चन्द्रमाः। इह कस्माद् न भवति—उपरि शिरसो घटं धारयति? औत्तराधर्यमेव विवक्षितं न सामीप्यमिति द्विर्वचनं न भवति॥

वाक्यादेरामन्त्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु॥ ८ ॥

एकार्थः पदसमूहो वाक्यम्। वाक्यादेरामन्त्रितस्य द्वे भवतः, असूयासंमतिकोपकुत्सनभर्त्सनेषु यदि तद् वाक्यं भवति। तत्र परगुणानामसहनमसूया। पूजा संमतिः। कोपः क्रोधः। निन्दनं कुत्सनम्। अपकारशब्दैर्भयोत्पादनं भर्त्सनम्। एते च प्रयोक्तृधर्माः, नाभिधेयधर्माः। असूयायां तावत्—माणवक माणवक, अभिरूपक अभिरूपक रिक्तं

---

१ - ' प्रयोक्तुमिच्छा ' इत्यपपाठो मुद्रितेषु ।

त आभिरूप्यम्। संमतौ—माणवकः माणवक, अभिरूपकः शोभनः खल्वसि। कोपे—माणवकः माणवक, अविनीतकः इदानीं ज्ञास्यसि जाल्म। कुत्सने—शक्तिकेः शक्तिके, यष्टिकेः यष्टिके रिक्ता ते शक्तिः। भर्त्सने—चौरचौरः, वृषलवृषलः घातयिष्यामि त्वा, बन्धयिष्यामि त्वा। असूयादिषु 'स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सनेषु' (८.२.१०३) इति पूर्वपदस्य प्लुतः। भर्त्सने तु 'आम्रेडितं भर्त्सने' (८.२.९५) इत्याम्रेडितस्यैव प्लुतः। वाक्यादेरिति किम् ? अन्तस्य मध्यस्य च मा भूत्। शोभनः खल्वसि माणवक। आमन्त्रितस्येति किम् ? उदारो देवदत्तः। असूयादिष्विति किम् ? देवदत्त गामभ्याज शुक्लाम्॥

एकं बहुव्रीहिवत्॥ ९ ॥

एकमित्येतत् शब्दरूपं द्विरुक्तं बहुव्रीहिवद् भवति। बहुव्रीहिवत्त्वे प्रयोजनं सुब्लोपपुंवद्भावौ। एकैकमक्षरं पठति। एकैकयाहुत्या जुहोति। सर्वनामसंज्ञाप्रतिषेधस्वरसमासान्ताः समासाधिकारविहिते बहुव्रीहौ विज्ञायन्ते। तेनातिदेशिके बहुव्रीहौ न भवन्ति। एकैकस्मै। 'न बहुव्रीहौ' (१.१.२९) इति प्रतिषेधो न भवति, बहुव्रीहिरेव यो बहुव्रीहिरिति विज्ञानात्। ननं, सुसुं। 'नञ्सुभ्याम्' (६.२.१७२) इत्यन्तोदात्तत्वं न भवति। ऋग्ऋक्, पूःपूः। 'ऋक्पूः ०' (५.४.७४) इति समासान्तो न भवति॥

आबाधे च॥ १० ॥

आबाधनमाबाधः , पीडा प्रयोक्तृधर्मः, नाभिधेयधर्मः। तत्र वर्तमानस्य द्वे भवतः। बहुव्रीहिवत् चास्य कार्यं भवति। गतगतः। नष्टनष्टः। पतितपतितः। गतगता। नष्टनष्टा। पतितपतिता। प्रियस्य चिरगमनादिना पीड्यमानः कश्चिदेवं प्रयुङ्क्ते प्रयोक्ता॥

कर्मधारयवदुत्तरेषु॥ ११ ॥

इत उत्तरेषु द्विर्वचनेषु कर्मधारयवत् कार्यं भवतीत्येतद् वेदितव्यम्। कर्मधारयवत्त्वे प्रयोजनं सुब्लोपपुंवद्भावान्तोदात्तत्वानि। सुब्लोपः—पटुपटुः। मृदुमृदुः। पण्डितपण्डितः। पुंवद्भावः—पटुपट्वी। मृदुमृद्वी। कालककालिका। कोपधाया अपि हि कर्मधारयवद्भावात् 'पुंवत्कर्मधारय ०' (६.३.४२) इति पुंवद्भावो भवति। अन्तोदात्तत्वम्—पटुपटुः। पटुपट्वी। समासान्तोदात्तत्वमनेनैव विधीयत इति परत्वादाम्रेडितानुदात्तत्वं बाध्यते। अधिकारेणैव सिद्धे यदुत्तरेष्विति वचनं तद् विस्पष्टार्थम्॥

---

१ - 'नाभिधेयधर्मः' इति नास्ति बाल०।

प्रकारे गुणवचनस्य॥ १२ ॥

प्रकारो भेदः सादृश्यं च। तदिह सादृश्यं प्रकारो गृह्यते। प्रकारे वर्तमानस्य गुणवचनस्य द्वे भवतः। पटुपटुः। मृदुमृदुः। प॒ण्डि॒त॒प॒ण्डि॒तः। अपरिपूर्णगुण इत्यर्थः। परिपूर्णगुणेन न्यूनगुणस्योपमाने सत्येवं प्रयुज्यते। जातीयरोऽनेन द्विर्वचनेन बाधनं नेष्यते। पटु-जातीयः, मृदुजातीयः इत्यपि हि भवति। तत् कथम् ? वक्ष्यमाणमन्यतरस्यांग्रहणमुभयोः शेषो विज्ञायते। प्रकार इति किम् ? पटुर्देवदत्तः। गुणवचनस्येति किम् ? अग्निर्माणवकः। गौर्वाहीकः। यद्यप्यत्राग्निशब्दो गोशब्दश्च मुख्यार्थसंबन्धाद् अवधृतभेदं तैक्ष्ण्यजाड्यादि-कमर्थान्तरे गुणविशेषमेव प्रतिपादयितुं प्रवृत्तः, तथापि सर्वदा गुणवचनो न भवतीति न द्विरुच्यते ॥ आनुपूर्व्ये द्वे भवत इति वक्तव्यम्॥ मूलेमूले स्थूलाः। अग्रेऽग्रे सूक्ष्माः। ज्येष्ठंज्येष्ठं प्रवेशय ॥ स्वार्थेऽवधार्यमाणेऽनेकस्मिन् द्वे भवत इति वक्तव्यम्॥ अस्मात् कार्षापणादिह भवद्भ्यां माषंमाषं देहि। स्वार्थ एतद् द्विर्वचनम् , न वीप्सायाम्। अत्र हि द्वावेव माषौ दीयेते, न सर्वे कार्षापणसंबन्धिनो माषाः। तेन वीप्सा न विद्यते। अवधार्यमाण इति किम् ? अस्मात् कार्षापणादिह भवद्भ्यां माषमेकं देहि, द्वौ माषौ देहि, त्रीन् वा माषान् देहि। अनेकस्मिन्निति किम् ? अस्मात् कार्षापणादिह भवद्भ्यां माषमेकं देहि ॥ चापले द्वे भवत इति वक्तव्यम्॥ संभ्रमेण प्रवृत्तिश्चापलम्। अहिरहिः, बुध्यस्वबुध्यस्व। नावश्यं द्वावेव शब्दौ प्रयोक्तव्यौ। किं तर्हि ? यावद्भिः शब्दैः सोऽर्थोऽवगम्यते तावन्तः प्रयोक्तव्याः। अहिरहिरहिः, बुध्यस्वबुध्यस्वबुध्यस्व इति ॥ क्रियासमभिहारे द्वे भवत इति वक्तव्यम्॥ स भवान् लुनीहिलुनीहीत्येवायं लुनाति ॥ आभीक्ष्ण्ये द्वे भवत इति वक्तव्यम्॥ भुक्त्वाभुक्त्वा व्रजति। भोजंभोजं व्रजति। 'नित्य०' (८.१.४) इत्येव सिद्धमिति तत्रोक्तम् ॥ डाचि द्वे भवत इति वक्तव्यम्॥ पटपटाकरोति। पटपटायते। अव्यक्तानुकरणे डाजन्तस्य द्विर्वचनमिष्यते। इह न भवति—द्वितीयाकरोति, तृतीयाकरोति। तदर्थं केचिद् डाचि बहुलम् इति पठन्ति ॥ पूर्वप्रथमयोरर्थातिशयविवक्षायां द्वे भवत इति वक्तव्यम्॥ पूर्वपूर्वं पुष्यन्ति। प्रथमंप्रथमं पच्यन्ते। आतिशायिकोऽपि दृश्यते—पूर्वतरं पुष्यन्ति, प्रथमतरं पच्यन्त इति ॥ डतरडतमयोः समसंप्रधारणयोः स्त्रीनिगदे भावे द्वे भवत इति वक्तव्यम्॥ उभाविमावाढ्यौ। कतराकतरा अनयोराढ्यता। सर्व इम आढ्याः। कतमाकतमा एषामाढ्यता। डतरडतमाभ्यामन्यत्रापि हि दृश्यते। उभाविमा-वाढ्यौ। कीदृशीकीदृशी अनयोराढ्यता। तथा स्त्रीनिगदाद् भावादन्यत्रापि हि दृश्यते—उभाविमावाढ्यौ, कतरःकतरोऽनयोर्विभव इति ॥ कर्मव्यतिहारे सर्वनाम्नो द्वे भवत

---

१ - ' अवभृतभेदम् ' इति है०।

इति वक्तव्यं समासवच्च बहुलम्। यदा न समासवत् प्रथमैकवचनं तदा पूर्वपदस्य॥ अन्योऽन्यमिमे ब्राह्मणा भोजयन्ति। अन्योऽन्यस्य ब्राह्मणा भोजयन्ति। इतरेतरं भोजयन्ति। इतरेतरस्य भोजयन्ति॥ स्त्रीनपुंसकयोरुत्तरपदस्य वाम्भावो वक्तव्यः॥ अन्योऽन्यामिमे ब्राह्मण्यौ भोजयतः। अन्योऽन्यं भोजयतः। इतरेतरां भोजयतः। इतरेतरं भोजयतः। अन्योऽन्यामिमे ब्राह्मणकुले भोजयतः। इतरेतरामिमे ब्राह्मणकुले भोजयतः। इतरेतरमिमे ब्राह्मणकुले भोजयतः॥

अकृच्छ्रे प्रियसुखयोरन्यतरस्याम्॥ १३ ॥

प्रिय सुख इत्येतयोरन्यतरस्यां द्वे भवतोऽकृच्छ्रे द्योत्ये। कृच्छ्रं दुःखम्, तदभावोऽकृच्छ्रम्। प्रियप्रियेण ददाति। सुखसुखेन ददाति। प्रियेण ददाति। सुखेन ददाति। अखिद्यमानो ददातीत्यर्थः। अकृच्छ्र इति किम्? प्रियः पुत्रः। सुखो रथः॥

यथास्वे यथायथम्॥ १४ ॥

यो य आत्मा, यद् यदात्मीयम्, तत् तद् यथास्वम्, तस्मिन् यथायथमिति निपात्यते। यथाशब्दस्य द्विर्वचनं नपुंसकलिङ्गता च निपात्यते। ज्ञाताः सर्वे पदार्था य१थाय१थम्। यथास्वभावमित्यर्थः। सर्वेषां तु य१थाय१थम्। यथात्मीयमित्यर्थः॥

द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु॥ १५ ॥

द्वन्द्वमिति द्विशब्दस्य द्विर्वचनम्, पूर्वपदस्याम्भावः, अत्वं चोत्तरपदस्य निपात्यते रहस्य मर्यादावचन व्युत्क्रमण यज्ञपात्रप्रयोग अभिव्यक्ति इत्येतेष्वर्थेषु। तत्र रहस्यं द्वन्द्वशब्दवाच्यम्, इतरे विषयभूताः। द्वन्द्वं मन्त्रयन्ते। मर्यादावचने—मर्यादा स्थित्यनतिक्रमः। आचतुरं हीमे पशवो द्वन्द्वं मिथुनीयन्ति। माता पुत्रेण मिथुनं गच्छति, पौत्रेण, तत्पुत्रेणापीति मर्यादार्थः। व्युत्क्रमणे—द्वन्द्वं व्युत्क्रान्ताः। व्युत्क्रमणं भेदः, पृथगवस्थानम्। द्विवर्गसंबन्धेन पृथगवस्थिता द्वन्द्वं व्युत्क्रान्ता इत्युच्यन्ते। यज्ञपात्रप्रयोगे—द्वन्द्वं न्यञ्चि यज्ञपात्राणि

---

१ - बहुलग्रहणाद् अन्यपरशब्दयोर्न समासवत्, इतरशब्दस्य तु समासवद् नित्यम् इति विवेकः।

२ - इतः पूर्वम् 'अन्यमन्यमिमे ब्राह्मणा भोजयन्ति' इत्यपपाठो मुद्रितेषु।

३ - 'चाम्भावः' इत्यपपाठो मुद्रितेषु।

४ - 'अन्योऽन्यमिमे ब्राह्मणकुले भोजयतः' इत्यपि स्यात्।

५ - 'मन्त्रयते' इति है०।

६ - '० सम्बन्धनेन' इति है०।

प्रयुनक्ति धीरः। अभिव्यक्तौ—द्वन्द्वं नारदपर्वतौ। द्वन्द्वं संकर्षणवासुदेवौ। द्वावप्यभिव्यक्तौ साहचर्येणेत्यर्थः। अन्यत्रापि द्वन्द्वमित्येतद् दृश्यते, तदर्थं योगविभागः कर्तव्यः—द्वन्द्वं युद्धं वर्तते, द्वन्द्वानि सहते धीरः, 'चार्थे द्वन्द्वः' (२.२.२९) इति॥

पदस्य॥ १६ ॥

पदस्येत्ययमधिकारः प्रागपदान्ताधिकारात् (८.३.५५)। यदित ऊर्ध्वमनुक्रमिष्यामः पदस्येत्येवं तद् वेदितव्यम्। वक्ष्यति—'संयोगान्तस्य लोपः' (८.२.२३)—पचन्। यजन्। पदस्येति किम् ? पचन्तौ। यजन्तौ। वक्ष्यमाणवाक्यापेक्षया पदस्याधिकृतस्य षष्ठ्यर्थ-व्यवस्था द्रष्टव्या—क्वचित् स्थानषष्ठी क्वचिदवयवषष्ठी॥

पदात्॥ १७ ॥

पदादित्ययमधिकारः प्राक् 'कुत्सने च सुप्यगोत्रादौ' (८.१.६९) इत्येतस्मात्। यदित ऊर्ध्वमनुक्रमिष्यामः पदादित्येवं तद् वेदितव्यम्। वक्ष्यति—'आमन्त्रितस्य च' (८.१.१९)। आमन्त्रितस्य पदात् परस्यानुदात्तादेशो भवतीति। पचसि देऽवऽदऽत्तऽ। पदादिति किम् ? देवदत्त पचसि॥

अनुदात्तं सर्वमपादादौ॥ १८ ॥

अनुदात्तमिति च, सर्वमिति च, अपादादाविति च। एतत् त्रयमधिकृतं वेदितव्यमा पादपरिसमाप्तेः। इत उत्तरं यद् वक्ष्यामोऽनुदात्तं सर्वमपादादावित्येवं तद् वेदितव्यम्। वक्ष्यति—'आमन्त्रितस्य च' (८.१.१९) इति। पचसि देऽवऽदऽत्तऽ। अपादादाविति किम् ? यत्तें नियानं रजऽसं मृत्योऽ अनवधऽर्ष्यम् (शौ० सं० ८.२.१०)। 'बहुवचनस्य वस्नसौ' (८.१.२१)। ग्रामो वऽः स्वम् , जनपदो नऽः स्वम्। अपादादाविति किम् ?

रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता।
स एव नाथो भगवानस्माकं शत्रुमर्दनः॥

पादग्रहणेनात्र ऋक्पादः श्लोकपादश्च गृह्यते। सर्वग्रहणं सर्वमनूद्यमानं विधीयमानं चानुदात्तं यथा स्यादिति। तेन युष्मदस्मदादेशानामपि वाक्यभेदेनानुदात्तत्वं विधीयते। युष्मदस्मदादेशाश्च सर्वस्य सुबन्तस्य पदस्य यथा स्युः, यत्रापि स्वादिपदं (१.४.१७) पदसंज्ञं भवति। ग्रामो वां दीयते। जनपदो नौ दीयते॥

---

१ - (द्र०—आप० श्रौ० १.११.४)।

आमन्त्रितस्य च ॥ १९ ॥

आमन्त्रितस्य पदस्य पदात् परस्यापादादौ वर्तमानस्य सर्वमनुदात्तं भवति। पचसि देऽवऽदऽत्तऽ। पचसि यऽज्ञऽदऽत्तऽ। आमन्त्रिताद्युदात्तत्वेप्राप्तेवचनम्॥ समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः॥ इह मा भूवन्—अयं दण्डो हरानेन, ओदनं पच तव भविष्यति, ओदनं पच मम भविष्यति। इह च यथा स्यात्—इह देऽवऽदऽत्तऽ माता ते कथयति, नद्यास्तिष्ठऽति कूले, शालीनां त ओदनं दास्यामि इति। आमन्त्रितान्तं तिङन्तं युष्मदस्मच्छब्दौ च यस्मात् पराणि न तेन तेषां सामर्थ्यमिति तदाश्रया निघातयुष्मदस्मदादेशा न स्युः, 'समर्थः पदविधिः' (२.१.१) इति वचनात्॥

युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ ॥ २० ॥

युष्मदस्मद् इत्येतयोः षष्ठीचतुर्थीद्वितीयास्थयोर्यथासंख्यं वाम् नौ इत्येतावादेशौ भवतः, तौ चानुदात्तौ। पदस्य पदादनुदात्तं सर्वमपादादाविति सर्वमिह संबध्यते। ग्रामो वां स्वम्। जनपदो नौ स्वम्। ग्रामो वां दीयते। जनपदो नौ दीयते। ग्रामो वां पश्यति। जनपदो नौ पश्यति। एकवचनबहुवचनान्तयोरादेशान्तरविधानाद् द्विवचनान्तयोरेतावादेशौ विज्ञायेते। षष्ठीचतुर्थीद्वितीयास्थयोरिति किम् ? ग्रामे युवाभ्यां कृतम्। स्थग्रहणं श्रूयमाणविभक्त्यर्थम्। इह मा भूत्—अयं युष्मत्पुत्रः, अयमस्मत्पुत्र इति॥

बहुवचनस्य वस्नसौ ॥ २१ ॥

बहुवचनान्तयोर्युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्यथासंख्यं वस् नस् इत्येतावादेशौ भवतः। ग्रामो वःऽ स्वम्। जनपदो नःऽ स्वम्। ग्रामो वो दीयते। जनपदो नो दीयते। ग्रामो वऽः पश्यति। जनपदो नःऽ पश्यति॥

तेमयावेकवचनस्य ॥ २२ ॥

युष्मदस्मदोरेकवचनान्तयोः षष्ठीचतुर्थीस्थयोर्यथासंख्यं ते मे इत्येतावादेशौ भवतः। ग्रामस्तेऽ स्वम्। ग्रामो मेऽ स्वम्। ग्रामस्तेऽ दीयते। ग्रामो मेऽ दीयते। द्वितीयान्तस्यादेशान्तरविधानसामर्थ्यात् षष्ठीचतुर्थ्योरिवायं योगः॥

---

१ - ' युष्मदस्मदादेशाः ' इत्यपपाठो मुद्रितेषु।

२ - ' तेन ' इति नास्ति मुद्रितेषु ।

३ - ' इह मा भूत्—इति युष्मत्पुत्र इति ' इति पद०।

त्वामौ द्वितीयायाः ॥ २३ ॥

एकवचनस्येति वर्तते। द्वितीयाया यदेकवचनं तदन्तयोर्युष्मदस्मदोर्यथासंख्यं त्वा मा इत्येतावादेशौ भवतः। ग्रामस्त्वा पश्यति। ग्रामो मा पश्यति॥

न चवाहाहैवयुक्ते ॥ २४ ॥

च वा ह अह एव एभिर्युक्ते युष्मदस्मदोर्वान्नावादयो न भवन्ति। पूर्वेण प्रकरणेन[1] प्राप्ताः प्रतिषिध्यन्ते। ग्रामस्तव च स्वम्, ग्रामो मम च स्वम्, युवयोश्च स्वम्, आवयोश्च स्वम्, युष्माकं च स्वम्, अस्माकं च स्वम्। ग्रामस्तुभ्यं च दीयते, ग्रामो मह्यं च दीयते, युवाभ्यां च दीयते, आवाभ्यां च दीयते, युष्मभ्यं च दीयते, अस्मभ्यं च दीयते। ग्रामस्त्वां च पश्यति, ग्रामो मां च पश्यति, युवां च पश्यति, आवां च पश्यति, युष्मांश्च पश्यति, अस्मांश्च पश्यति। वा—ग्रामस्तव वा स्वम्, ग्रामो मम वा स्वम्, युवयोर्वा स्वम्, आवयोर्वा स्वम्, युष्माकं वा स्वम्, अस्माकं वा स्वम्। ग्रामस्तुभ्यं वा दीयते, ग्रामो मह्यं वा दीयते, युवाभ्यां वा दीयते, आवाभ्यां वा दीयते, युष्मभ्यं वा दीयते, अस्मभ्यं वा दीयते। ग्रामस्त्वां वा पश्यति, ग्रामो मां वा पश्यति, युवां वा पश्यति, आवां वा पश्यति, युष्मान् वा पश्यति, अस्मान् वा पश्यति। ह—ग्रामस्तव ह स्वम्, ग्रामो मम ह स्वम्, युवयोर्ह स्वम्, आवयोर्ह स्वम्, युष्माकं ह स्वम्, अस्माकं ह स्वम्। ग्रामस्तुभ्यं ह दीयते, ग्रामो मह्यं ह दीयते, युवाभ्यां ह दीयते, आवाभ्यां ह दीयते, युष्मभ्यं ह दीयते, अस्मभ्यं ह दीयते। ग्रामस्त्वां ह पश्यति, ग्रामो मां ह पश्यति, युवां ह पश्यति, आवां ह पश्यति, युष्मान् ह पश्यति, अस्मान् ह पश्यति। अह—ग्रामस्तवाह स्वम्, ग्रामो ममाह स्वम्, युवयोरह स्वम्, आवयोरह स्वम्, युष्माकमह स्वम्, अस्माकमह स्वम्। ग्रामस्तुभ्यमह दीयते, ग्रामो मह्यमह दीयते, युवाभ्यामह दीयते, आवाभ्यामह दीयते, युष्मभ्यमह दीयते, अस्मभ्यमह दीयते। ग्रामस्त्वामह पश्यति, ग्रामो मामह पश्यति, युवामह पश्यति, आवामह पश्यति, युष्मानह पश्यति, अस्मानह पश्यति। एव—ग्रामस्तवैव स्वम्, ग्रामो ममैव स्वम्, युवयोरेव स्वम्, आवयोरेव स्वम्, युष्माकमेव स्वम्, अस्माकमेव स्वम्। ग्रामस्तुभ्यमेव दीयते, ग्रामो मह्यमेव दीयते, युवाभ्यामेव दीयते, आवाभ्यामेव दीयते, युष्मभ्यमेव दीयते, अस्मभ्यमेव दीयते। ग्रामस्त्वामेव पश्यति, ग्रामो मामेव पश्यति, युवामेव पश्यति, आवामेव पश्यति, युष्मानेव पश्यति, अस्मानेव पश्यति। युक्तग्रहणं साक्षाद्योगप्रतिपत्त्यर्थम्। युक्तयुक्ते प्रतिषेधो न भवति। ग्रामश्च ते स्वम्। नगरं च मे स्वम्॥

---

१ - 'प्रकारेण' इत्यपपाठो है०।

पश्यार्थैश्चानालोचने ॥ २५ ॥

पश्यार्था दर्शनार्थाः। दर्शनं ज्ञानम्। आलोचनं चक्षुर्विज्ञानम्। तैः पश्यार्थैरनालोचने वर्तमानैर्युक्ते युष्मदस्मदोर्वान्नावादयो न भवन्ति। ग्रामस्तव स्वं समीक्ष्यागतः। ग्रामो मम स्वं समीक्ष्यागतः। ग्रामस्तुभ्यं दीयमानं समीक्ष्यागतः। ग्रामो मह्यं दीयमानं समीक्ष्यागतः। ग्रामस्त्वां समीक्ष्यागतः। ग्रामो मां समीक्ष्यागतः। अनालोचन इति किम् ? ग्रामस्त्वा पश्यति। ग्रामो मा पश्यति। पश्यार्थैर्युक्तयुक्तेऽपि च प्रतिषेध इष्यते। तथा चैवोदाहृतम्॥

सपूर्वायाः प्रथमाया विभाषा ॥ २६ ॥

विद्यमानपूर्वात् प्रथमान्तात् पदादुत्तरयोर्युष्मदस्मदोर्विभाषा वान्नावादयो न भवन्ति। ग्रामे कम्बलस्ते स्वम्, ग्रामे कम्बलस्तव स्वम्। ग्रामे कम्बलो मे स्वम्, ग्रामे कम्बलो मम स्वम्। ग्रामे कम्बलस्ते दीयते, ग्रामे कम्बलस्तुभ्यं दीयते। ग्रामे कम्बलो मे दीयते, ग्रामे कम्बलो मह्यं दीयते। ग्रामे छात्रास्त्वा पश्यन्ति, ग्रामे छात्रास्त्वां पश्यन्ति। ग्रामे छात्रा मा पश्यन्ति, ग्रामे छात्रा मां पश्यन्ति। सपूर्वाया इति किम् ? कम्बलस्ते स्वम्। कम्बलो मे स्वम्। प्रथमाया इति किम् ? कम्बलो ग्रामे ते स्वम्। कम्बलो ग्रामे मे स्वम् ॥ युष्मदस्मदोर्विभाषा अनन्वादेश इति वक्तव्यम्॥ इह मा भूत्—अथो ग्रामे कम्बलस्ते स्वम्। अथो ग्रामे कम्बलो मे स्वम्। अपर आह ॥ सर्व एव वान्नावादयोऽनन्वादेशे विभाषा वक्तव्याः॥ कम्बलस्ते स्वम्, कम्बलस्तव स्वम्। कम्बलो मे स्वम्, कम्बलो मम स्वम्। अनन्वादेश इति किम् ? अथो कम्बलस्ते स्वम्। अथो कम्बलो मे स्वम्। न तर्हीदानीमिदं वक्तव्यं सपूर्वायाः प्रथमाया विभाषेति ? वक्तव्यं च। किं प्रयोजनम् ? अन्वादेशार्थम्। अन्वादेशे हि विभाषा यथा स्यात्। अथो ग्रामे कम्बलस्ते स्वम्, अथो ग्रामे कम्बलस्तव स्वम्। अथो ग्रामे कम्बलो मे स्वम्, अथो ग्रामे कम्बलो मम स्वम्॥

तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः ॥ २७ ॥

तिङन्तात् पदात् पराणि गोत्रादीनि कुत्सन आभीक्ष्ण्ये चार्थे वर्तमानान्यनुदात्तानि भवन्ति। पचति गोत्र१म्। जल्पति गोत्र१म्। आभीक्ष्ण्ये—पचतिपचति गोत्र१म्। जल्पतिजल्पति गोत्र१म्। ब्रुवः—पचति ब्रुवम्। जल्पति ब्रुवम्। पचतिपचति ब्रुवम्। जल्पतिजल्पति ब्रुवम्। ब्रुव इति ब्रुवः कन् निपातनाद् वच्यादेशाभावश्च॥ गोत्र। ब्रुव। प्रवचन। प्रहसन। प्रकथन। प्रत्ययन। प्रचक्षण। प्राय। विचक्षण। अवचक्षण। स्वाध्याय।

---

१ - यथापदमञ्जरि नेदमुदाहरणम् , ब्रुवशब्दस्य कुत्सितवचनत्वात्।

२ - पूर्वं (६.३.४३) पचाद्यचि निपातनमुक्तम्।

३ - ' प्रसहन ' इति बाल०।

भूयिष्ठ। वा नाम (ग० सू० १८१)। नामेत्येतद् वा निहन्यते। पक्ष आद्युदात्तमेव भवति। पचति नाम, पचति नाम। तिङ इति किम् ? कुत्सितं गोत्रम्। गोत्रादीनीति किम् ? पचति पापम्। कुत्सनाभीक्ष्णययोरिति किम् ? खनति गोत्रं समेत्य कूपम्। कुत्सनाभीक्ष्ण्यग्रहणं च पाठविशेषणं द्रष्टव्यम्। तेनान्यत्र (८.१.५७) अपि गोत्रादिग्रहणेन कुत्सनाभीक्ष्ण्ययोरेव कार्यं भवति॥

तिङ्ङतिङः॥ २८ ॥

तिङन्तं पदमतिङन्तात् पदात् परमनुदात्तं भवति। देवदत्तः पचति। यज्ञदत्तः पचति। तिङिति किम् ? नीलम् उत्पलम्। शुक्लं वस्त्रम्। अतिङ इति किम् ? भवति पचति॥

न लुट्॥ २९ ॥

पूर्वेणातिप्रसक्ते प्रतिषेध आरभ्यते। लुडन्तं तिङन्तं नानुदात्तं भवति। श्वः कर्ता। श्वः कर्तारौ। मासेन कर्तारः। तासेः परस्य लसार्वधातुकस्यानुदात्तत्वे सति सर्वतासिरेवो- दात्तः। यत्र तु टिलोपः, तत्रोदात्तनिवृत्तिस्वरो भवति॥

निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम्॥ ३० ॥

नेति वर्तते। यत् यदि हन्त कुवित् नेत् चेत् चण् कच्चित् यत्र इत्येतैर्निपातैर्युक्तं तिङन्तं नानुदात्तं भवति। यत्—यत् करोति। यत् पचति। यदि—यदि करोति। यदि पचति। हन्त—हन्त करोति। हन्त पचति। कुवित्—कुवित् करोति। कुवित् पचति। नेत्—नेज्जिह्मायन्त्यो नरके पताम (ख० १०.१०६)। चेत्—स चेद् भुङ्क्ते। स चेदधीते। चण्—णिद्विशिष्टोऽयं चेदर्थे वर्तते। अयं च मरिष्यति। अयं चेद् मरिष्यतीत्यर्थः। समुच्चयादिषु तु यश्चशब्दः, तेन योगे विधिरयं न भवति। कच्चित्—कच्चिद् भुङ्क्ते। कच्चिदधीते। यत्र—यत्र भुङ्क्ते। यत्राधीते। निपातैरिति किम् ? यत् कुजति शकटम्। गच्छत् कूजति शकटमित्यर्थः। इणः शतरि रूपमेतत्। युक्तमिति किम् ? यत्र क्व च ते मनो दक्षं दधस उत्तरम् (ऋ० ६.१६.१७)॥

---

१ - 'वा' इति यथान्यासं न स्यात्।
२ - 'पठति' इति मुद्रितेषु।
३ - 'तिङन्तं' इति नास्ति है०।
४ - 'योगेन' इति मुद्रितेषु।

नह प्रत्यारम्भे॥ ३१ ॥

नह इत्येतेन युक्तं प्रत्यारम्भे तिङन्तं नानुदात्तं भवति। चोदितस्यावधीरणे उपालिप्सया प्रतिषेधयुक्तः प्रत्यारम्भः क्रियते। नह भोक्ष्यसे। नह अध्येष्यसे। प्रत्यारम्भ इति किम् ? नह वै तस्मिन्नमुष्मिन् लोके दक्षिणामिच्छन्ति (काठ० सं० ६.१२)॥

सत्यं प्रश्ने॥ ३२ ॥

सत्यमित्यनेन युक्तं तिङन्तं नानुदात्तं भवति प्रश्ने। सत्यं भोक्ष्यसे ? सत्यम् अध्येष्यसे ? प्रश्न इति किम् ? सत्यं वक्ष्यामि नानृतम् (शौ० सं० ४.६.७)॥

अङ्गाप्रातिलोम्ये॥ ३३ ॥

अङ्ग इत्यनेन युक्तं तिङन्तमप्रातिलोम्ये गम्यमाने नानुदात्तं भवति। अङ्ग कुरु। अङ्ग पचं। अङ्ग पठं। अप्रातिलोम्य इति किम् ? अङ्ग कूजꣳ वृषल, इदानीं ज्ञास्यसि जाल्म। कूजनमनभिमतमसौ कुर्वन् प्रतिलोमो भवति॥

हि च॥ ३४ ॥

हि इत्यनेन युक्तं तिङन्तमप्रातिलोम्ये नानुदात्तं भवति। स हि कुरु। स हि पचं। स हि पठं। अप्रातिलोम्य इत्येव—स हि कूजꣳ वृषल, इदानीं ज्ञास्यसि जाल्म॥

छन्दस्यनेकमपि साकाङ्क्षम्॥ ३५ ॥

हि चेति वर्तते। छन्दसि विषये हियुक्तं तिङन्तं साकाङ्क्षमनेकमपि नानुदात्तं भवति, एकमपि। कदाचिदेकं कदाचिदनेकमित्यर्थः। तत्रानेकं तावत्—अनृतं हि मत्तो वदति, पाप्मा एनं विपुनाति । तिङन्तद्वयमप्येतद् न निहन्यते। एकं खल्वपि—अग्निर्हि पूर्वमुद- जयत्, तमिन्द्रोऽनूदजयत्। तिङन्तद्वयमपि हिशब्दयुक्तमेतत्। तत्रैकमुदजयदित्याद्युदात्तम् अपरमनुदात्तम्। अजा ह्यग्नेरजनिष्ट गर्भात् सा वा अपश्यज्जनितारमग्रे (तै० सं० ४.२.१०.४)। अजनिष्टेत्याद्युदात्तम्, अपश्यदित्यनुदात्तम्॥

---

१ - ' युक्ते ' इत्यपपाठो मुद्रितेषु ।

२ - ' तस्मिंश्च ' इति मुद्रितेषु।

३ - तु० — काठ० सं० १४.५,६।

४ - तु० — काठ० सं० १२.७।

यावद्यथाभ्याम्॥ ३६ ॥

यावद् यथा इत्येताभ्यां युक्तं तिङन्तं नानुदात्तं भवति। यावद् भुङ्क्ते। यथा भुङ्क्ते। यावदधीते। यथा अधीते। देवदत्तः पचति यावत्। देवदत्तः पचति यथा। परेणापि योगे भवति प्रतिषेधः॥

पूजायां नानन्तरम्॥ ३७ ॥

यावद् यथा इत्येताभ्यां युक्तमनन्तरं तिङन्तं पूजायां विषये नानुदात्तं न भवति। किं तर्हि ? अनुदात्तमेव। यावत् पचति शोभनम्। यथा पचति शोभनम्। यावत् करोति चारु। यथा करोति चारु। पूजायामिति किम् ? यावद् भुङ्क्ते। यथा भुङ्क्ते। अनन्तरमिति किम् ? यावद् देवदत्तः पचति शोभनम्। यथा देवदत्तः करोति चारु। पूर्वेणात्र निघातः प्रतिषिध्यते॥

उपसर्गव्यपेतं च॥ ३८ ॥

यावद्यथाभ्यां युक्तम् उपसर्गव्यपेतं च पूजायां विषये नानुदात्तं न भवति। किं तर्हि? अनुदात्तमेव भवति। पूर्वमनन्तरमित्युक्तम्, उपसर्गव्यवधानार्थोऽयमारम्भः। यावत् प्रपचति शोभनम्। यथा प्रपचति शोभनम्। यावत् प्रकरोति चारु। यथा प्रकरोति चारु। अनन्तरमित्येव—यावद् देवदत्तः प्रपचति शोभनम्। यथा विष्णुमित्रः प्रकरोति चारु॥

तुपश्यपश्यताहैः पूजायाम्॥ ३९ ॥

तु पश्य पश्यत अह इत्येतैर्युक्तं तिङन्तं नानुदात्तं भवति पूजायां विषये। तु—माणवकस्तु भुङ्क्ते शोभनम्। पश्य—पश्य माणवको भुङ्क्ते शोभनम्। पश्यत—पश्यत माणवको भुङ्क्ते शोभनम्। अह—अह माणवको भुङ्क्ते शोभनम्। पूजायामिति किम्? पश्य मृगो धावति। पूजायामिति वर्तमाने पुनः पूजायामित्युच्यते निघातप्रतिषेधार्थम्। तद्धि प्रतिषेधस्य प्रतिषेधेन संबद्धमिति॥

अहो च॥ ४० ॥

अहो इत्यनेन युक्तं तिङन्तं नानुदात्तं भवति पूजायां विषये। अहो देवदत्तः पचति शोभनम्। अहो विष्णुमित्रः करोति चारु। पृथग्योगकरणमुत्तरार्थम्॥

---

१ - ' शोभनम् ' इति नास्ति मुद्रितेषु।

शेषे विभाषा॥ ४१ ॥

अहो इत्यनेन युक्तं तिङन्तं शेषे विभाषा नानुदात्तं भवति। कश्च शेषः ? यदन्यत् पूजायाः। कटमहो क१रिष्यसि। मम गेहमहो ए१ष्यसि। असूयावचनमेतत्। पूजायामित्यस्य पूर्वत्र चानुकृष्टत्वाद् (परि० ७८) अनधिकारे सिद्धे शेषवचनं विस्पष्टार्थम्॥

पुरा च परीप्सायाम्॥ ४२ ॥

पुरा इत्यनेन युक्तं तिङन्तं परीप्सायामर्थे विभाषा नानुदात्तं भवति। परीप्सा त्वरा। अधीष्व माणवक, पुरा विद्योतते विद्युत्। पुरा स्त१नयति स्तनयित्नुः। पुराशब्दोऽत्र भविष्यदासत्तिं द्योतयति। परीप्सायामिति किम् ? नडेन स्म पुरा अधी१ते१। अत्र भूतकालविप्रकर्षं पुराशब्दो द्योतयति। ऊर्णया स्म पुरा अधी१ते१॥

नन्वित्यनुज्ञैषणायाम्॥ ४३ ॥

ननु इत्यनेन युक्तं तिङन्तं नानुदात्तं भवत्यनुज्ञैषणायां विषये। अनुज्ञाया एषणा प्रार्थना अनुज्ञैषणा। अनुज्ञाप्रार्थनेत्यर्थः। ननु क१रोमि भोः। ननु गच्छामि भोः। अनुजानीष्व मां करणं प्रतीत्यर्थः। अनुज्ञैषणायामिति किम् ? अकार्षीः कटं देवदत्त ? ननु क१रो१मि भोः। पृष्टप्रतिवचनमेतत्, नानुज्ञैषणा॥

किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम्॥ ४४ ॥

किमित्येतत् क्रियाप्रश्ने यदा वर्तते तदानेन युक्तं तिङन्तमनुपसर्गमप्रतिषिद्धं नानुदात्तं भवति। किं देवदत्तः पचति, आहोस्विद् भुङ्क्ते । किं देवदत्तः शेते, आहोस्विद१धीते। अत्र केचिदाहुः—पूर्वं किंयुक्तमिति तद् न निहन्यते, उत्तरं तु न किंयुक्तमिति तद् निहन्यत एवेति। अपरे त्वाहुः—यद्यप्येकस्याख्यातस्य समीपे किंशब्दः श्रूयते, तथापि सर्वस्य संशय-विषयस्य तेन योग इत्युभयत्र प्रतिषेधेन भवितव्यमिति। क्रियाग्रहणं किम् ? साधनप्रश्ने मा भूत्—किं देवदत्त ओदनं प१च१ति आहोस्विच्छाकमिति। प्रश्न इति किम् ? किमधीते१ देवदत्तः। क्षेपे किंशब्दोऽयम्, न प्रश्ने। अनुपसर्गमिति किम् ? किं देवदत्तः प्रप१च१ति,

---

१ -‘ अहो ’ इति नास्ति मुद्रितेषु।

२ - पक्षे निघातोऽप्युदाहार्यः ।

३ - ‘ ननु गच्छामि भोः ’ इत्यूहितः पाठः, न्यासपदमञ्जरीव्याख्याश्रयात्।

४ - ‘ गमनम् ’ इति बाल०।

आहोस्वित् प्रक१रोति। अप्रतिषिद्धमिति किम् ? किं देवदत्तो न प१ठ१ति आहोस्विद् न क१रोति॥

लोपे विभाषा॥ ४५ ॥

किमो लोपे क्रियाप्रश्ने तिङन्तमनुपसर्गमप्रतिषिद्धं विभाषा नानुदात्तं भवति। क्व चास्य लोपः ? यत्र गम्यते चार्थः, न च प्रयुज्यते किंशब्दः। देवदत्तः पचति, आहोस्वित् पठति। विनैव किमा प्रश्नोऽवगम्यते। प्राप्तविभाषेयं किमर्थेन योगात्। पूर्ववत् प्रत्युदाहरणानि॥

एहि मन्ये प्रहासे लृट्॥ ४६ ॥

एहि मन्य इत्यनेन युक्तं लडन्तं नानुदात्तं भवति प्रहासे। प्रकृष्टो हासः प्रहासः, क्रीडा। एहि मन्य ओदनं भोक्ष्यसे, नहि भोक्ष्यसे, भुक्तः सोऽतिथिभिः। एहि मन्ये रथेन यास्यसि, नहि यास्यसि, यातस्तेन ते पिता। प्रहास इति किम् ? एहि मन्यस ओदनं भोक्ष्य१ इति, सुष्ठु मन्यसे, साधु मन्यसे। 'गत्यर्थलोटा लृट्०' (८.१.५१) इत्येव सिद्धे सत्यारम्भो नियमार्थः—एहिमन्येयुक्ते प्रहास एव यथा स्यात्, अन्यत्र मा भूदिति। एहि मन्यस ओदनं भोक्ष्य१ इति। एहि मन्य इत्युत्तमोपादानमतन्त्रम्। प्रहास एव हि मन्यतेरुत्तमो विहितः, ततोऽन्यत्र मध्यम एव भवति। तत्रानेन नियमेन निवृत्तिः क्रियते—एहि मन्यस ओदनं भोक्ष्य१ इति॥

जात्वपूर्वम्॥ ४७ ॥

जातु इत्येतदविद्यमानपूर्वम्, तेन युक्तं तिङन्तं नानुदात्तं भवति। जातु भोक्ष्यसे। जातु क१रिष्यामि। अपूर्वमिति किम् ? कटं जातु क१रिष्य१ति॥

किंवृत्तं च चिदुत्तरम्॥ ४८ ॥

किमो वृत्तं किंवृत्तम्। किंवृत्तग्रहणेन तद्विभक्त्यन्तं प्रतीयात्, डतरडतमौ च प्रत्ययौ, तत् किंवृत्तं चिदुत्तरमविद्यमानपूर्वं यत् तेन युक्तं तिङन्तं नानुदात्तं भवति। कश्चिद् भुङ्क्ते। कश्चिद् भोजयति। कश्चिदधीते। केनचित् क१रोति। कस्मैचिद् ददाति। कतरश्चित् क१रोति। कतमश्चिद् भुङ्क्ते। चिदुत्तरमिति किम् ? को भुङ्क्ते। अपूर्वमित्येव—देवदत्तः किंचित् प१ठ१ति॥

---

१ - पक्षे पचतिपठतिशब्दौ निहन्येते।

आहो उताहो चानन्तरम्॥ ४९ ॥

निघातप्रतिषेधोऽनुवर्तते, अपूर्वमिति च। आहो उताहो इत्येताभ्यामपूर्वाभ्यां युक्तमनन्तरं तिङन्तं नानुदात्तं भवति। आहो भुङ्क्ते। उताहो भुङ्क्ते। आहो पठति। उताहो पठति। अनन्तरमिति किम् ? शेषे विभाषां (८.१.५०) वक्ष्यति। अपूर्वमित्येव—देवदत्त आहो भुङ्क्ते। देवदत्त उताहो भुङ्क्ते॥

शेषे विभाषा॥ ५० ॥

आहो उताहो इत्येताभ्यां युक्तं तिङन्तं नानुदात्तं शेषे विभाषा भवति। कश्च शेषः? यदन्यदनन्तरात्। आहो देवदत्तः पचति, पचति। उताहो देवदत्तः पचति, पचति। आहो देवदत्तः पठति, पठति। उताहो देवदत्तः पठति, पठति॥

गत्यर्थलोटा लृण्न चेत् कारकं सर्वान्यत्॥ ५१ ॥

गमिना समानार्था गत्यर्थाः। गत्यर्थानां लोट् गत्यर्थलोट्। तेन गत्यर्थलोटा युक्तं लृङन्तं तिङन्तं नानुदात्तं भवति, न चेत् कारकं सर्वान्यद् भवति। यत्रैव कारके कर्तरि कर्मणि वा लोट् , तत्रैव यदि लृडपि भवतीत्यर्थः। कर्तृकर्मणी एवात्र तिङन्तवाच्ये कारकग्रहणेन गृह्येते, न करणादि कारकान्तरम्। आगच्छ देवदत्त ग्रामं द्रक्ष्यसि एनम्। आगच्छ देवदत्त ग्राममोदनं भोक्ष्यसे। उह्यन्तां देवदत्तेन शालयः, तेनैव भोक्ष्यन्ते। उह्यन्तां देवदत्तेन शालयः, यज्ञदत्तेन भोक्ष्यन्ते। गत्यर्थग्रहणं किम् ? पच देवदत्तौदनं भोक्ष्यस एनम्। लोटेति किम् ? आगच्छेर्देवदत्त ग्रामं द्रक्ष्यसि एनम्। लृडिति किम् ? आगच्छ देवदत्त ग्रामं पश्यसि एनम्। न चेत् कारकं सर्वान्यदिति किम् ? आगच्छ देवदत्त ग्राममम्, पिता त ओदनं भोक्ष्यते। उह्यन्तां देवदत्तेन शालयः, सक्तवस्तेन पास्यन्ते। सर्वग्रहणं किम्? आगच्छ देवदत्त ग्राममम् , त्वं चाहं च द्रक्ष्यावं एनमित्यत्रापि निघातप्रतिषेधो यथा स्यात्। लृङन्तवाच्ये हि सर्वस्मिन् कारकेऽन्यस्मिन् न भवितव्यम् , इह तु यत् लोडन्तस्य कारकं तत् चान्यत् च लृङन्तेनोच्यत इति॥

लोट् च ॥ ५२ ॥

लोडन्तं तिङन्तं गत्यर्थलोटा युक्तं नानुदात्तं भवति, न चेत् कारकं सर्वान्यद् भवति। लोडन्तयोरेकं कारकं यदि भवतीत्यर्थः। आगच्छ देवदत्त, ग्रामं पश्य। आगच्छ विष्णुमित्र, ग्रामं शाधि। आगम्यतां देवदत्तेन ग्रामो दृश्यतां यज्ञदत्तेन। गत्यर्थानामित्येव—पच देवदत्तौदनं भुङ्क्ष्व एनम्। लोटेत्येव—आगच्छेर्देवदत्त ग्रामं पश्य एनम्। न चेत् कारकं

---

१ - ‘ आव्रज ’ इति बाल०।

सर्वान्यदित्येव—आगच्छ देवदत्त ग्रामं पश्यतु एनं यज्ञदत्तः। सर्वग्रहणानुवृत्तेस्त्विह भवत्येव—आगच्छ देवदत्त ग्रामं त्वं चाहं च पश्यावः। पृथग्योगकरणमुत्तरार्थम्॥

विभाषितं सोपसर्गमनुत्तमम्॥ ५३ ॥

पूर्वं सर्वमनुवर्तते। प्राप्तविभाषेयम्। लोडन्तं सोपसर्गमुत्तमवर्जितं गत्यर्थलोटा युक्तं तिङन्तं विभाषितं नानुदात्तं भवति, न चेत् कारकं सर्वान्यद् भवति। आगच्छ देवदत्त ग्रामं प्रविश, प्रविंश। आगच्छ देवदत्त ग्रामं प्रशाधि, प्रशांधि। सोपसर्गमिति किम् ? आगच्छ देवदत्त ग्रामं पश्यं। अनुत्तममिति किम् ? अगच्छानि देवदत्त ग्रामं प्रविशानिं॥

हन्त च॥ ५४॥

पूर्वं सर्वमनुवर्तते गत्यर्थलोटं वर्जयित्वा। हन्त इत्यनेन युक्तं लोडन्तं सोपसर्गमुत्तमवर्जितं विभाषितं नानुदात्तं भवति। हन्त प्रविश, प्रविंश। हन्त प्रशाधि, प्रशांधि। सोपसर्गमित्येव—हन्त कुरु। 'निपातैर्यद्यदिहन्त ०' (८.१.३०) इति नित्यमत्र निघातप्रतिषेधो भवति। अनुत्तममित्येव—हन्त प्रभुनजावहै। हन्त प्रभुनजामहै॥

आम एकान्तरमामन्त्रितमनन्तिके॥ ५५ ॥

आम उत्तरमेकपदान्तरमामन्त्रितान्तमनन्तिके नानुदात्तं भवति। आम् पचसि देवदत्त३। आम् भो देवदत्त३। भो इत्यामन्त्रितान्तमपि 'नामन्त्रिते समानाधिकरणे सामान्यवचनम्' (८.१.७३) इति नाविद्यमानवद् भवति। आम इति किम् ? शाकं पचसि देवदत्त३। एकान्तरमिति किम् ? आम् प्रपचसि देवदत्त३। आमन्त्रितमिति किम्? आम् देवदत्तः पचतिं। अनन्तिक इति किम् ? आम् पचसि देवदत्तं। आम एकान्तरमामन्त्रितं यत् तस्य एकश्रुतेरनुदात्तस्य च प्रतिषेध इष्यते। तदुभयमनेन क्रियत इति केचिदाहुः। प्लुतोदात्तः पुनरसिद्धत्वाद् न प्रतिषिध्यते। अपरेषां दर्शनम्—अनन्तिक इत्यनेन यद् न दूरं न सन्निकृष्टं तत् परिगृह्यते, तेनास्मिन्नेकश्रुतेः प्राप्तिरेव नास्ति, प्लुतोदात्तोऽपि नोदाहर्तव्य इति॥

यद्धितुपरं छन्दसि॥ ५६ ॥

आमन्त्रितमित्येतदस्वरितत्वाद् नानुवर्तते। तिङिति वर्तत एव। यत्परं हिपरं तुपरं च तिङन्तं छन्दसि नानुदात्तं भवति। यत्परं तावत्—गवां गोत्रमुदसृजो यदङ्गिरः (ऋ० २.२३.१८)। हिपरम् — इन्दवो वामुशन्ति हि (ऋ० १.२.४)। तुपरम्—आख्यास्यामिं तु

१ - ' आम् पचति देवदत्तः ' इत्यपपाठो मुद्रितेषु।

२ - ' पचसि ' इति नास्ति मुद्रितेषु।

ते। 'निपातैर्यद्यदिहन्त०' (८.१.३०) इति, 'हि च' (८.१.३४) इति, 'तुपश्यपश्यताहैः०' (८.१.३६) इति च निघातप्रतिषेधे सिद्धे वचनमिदं नियमार्थम्—एभिरेव परैर्योगे प्रतिषेधो भवति, नान्यैरिति। इह न भवति—जाये स्वो रोहावैहिं । एहीत्यनेन गत्यर्थलोटा युक्तस्य रोहावेत्यस्य लोडन्तस्य निघातो भवत्येव॥

चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः॥ ५७ ॥

चन चिद् इव गोत्रादि तद्धित आम्रेडित इत्येतेषु परतोऽगतेरुत्तरं तिङन्तं नानुदात्तं भवति। चन—देवदत्तः पचति चन। चित्—देवदत्तः पचति चित्। इव—देवदत्तः पचतीव। गोत्रादि—देवदत्तः पचति गोत्रम्। देवदत्तः पचति ब्रुवम्। देवदत्तः पचति प्रवचनम्। इहापि गोत्रादयः कुत्सनाभीक्ष्ण्ययोः (८.१.२७) एव गृह्यन्ते। तद्धित—देवदत्तः पचतिकल्पम्। देवदत्तः पचतिरूपम्। अनुदात्तस्तद्धित इहोदाहरणमन्यत्र तद्धित-स्वरेण तिङ्स्वरो बाध्यते। प॒चति॒देश्यः। आम्रेडित—देवदत्तः पचतिपचति। अगतेरिति किम् ? देवदत्तः प्रप॒चति॒ चन। अत्रागतिग्रहणे 'सगतिरपि तिङ्' (८.१.६८) इत्यत्र चोपसर्गग्रहणं द्रष्टव्यम्। इह मा भूत्—शुक्लीक॒रोतिं चन। यत् काष्टं शुक्लीक॒रोतिं। यत् काष्टं कृष्णीक॒रोतिं॥

चादिषु च॥ ५८ ॥

चादिषु च परतः तिङन्तमगतेः परं नानुदात्तं भवति। चादयो 'न चवाहाहैवयुक्ते' (८.१.२४) इत्यत्र ये निर्दिष्टाः, त इह परिगृह्यन्ते। चशब्दे तावत्—देवदत्तः पचति च, खादति च। वा—देवदत्तः पचति वा, खादति वा। ह—देवदत्तः पचति ह, खादति ह। अह—देवदत्तः पचत्यह, खादत्यह। एव—देवदत्तः पचत्येव, खादत्येव। अगतेरित्येव—देवदत्तः प्र॒पचति च, प्रखादति च। प्रथमस्यात्र तिङन्तस्य 'चवायोगे प्रथमा' (८.१.५६) इति निघातः प्रतिषिध्यत एव, परं तु निहन्यते॥

चवायोगे प्रथमा॥ ५९ ॥

अगतेरिति पूर्वसूत्रे चानुकृष्टमित्यत्र नानुवर्तते (परि० ७८)। च वा इत्येताभ्यां योगे प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति। गर्दभांश्च का॒लयति, वीणां च वा॒द॒य॒ति॒। गर्दभान् वा का॒लयति, वीणां वा वा॒द॒य॒ति॒। योगग्रहणं पूर्वाभ्यामपि योगे निघातप्रतिषेधो यथा स्यादिति। प्रथमाग्रहणं द्वितीयादेस्तिङन्तस्य मा भूदिति। चवायोगो हि द्विसमुच्चये विकल्पे च सति भवति। स चानेकस्य धर्म इति॥

---

१ - तु०—जा॒य ए॒हि॒ स्वो रो॒हाव (श० ब्रा० ५.२.१.१०)।

२ - इहोत्तरत्र च प्रथमान्येवोदाहरणानि, द्वितीयानि तु वाक्यादित्वादेव नानुदात्तानि।

हेति क्षियायाम्॥ ६० ॥

ह इत्यनेन युक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति क्षियायां गम्यमानायाम्। क्षिया धर्मव्यतिक्रमः, आचारभेदः। स्वयं ह रथेन यातिं३, उपाध्यायं पदातिं ग॒म॒य॒ति। स्वयं हौदनं भुङ्क्तें३, उपाध्यायं सक्तून् पा॒य॒ति। प्रथमस्य तिङन्तस्यात्र निघातः प्रतिषिध्यते। 'क्षियाशीःप्रैषेषु तिङाकाङ्क्षम्' (८.२.१०४) इति च प्लुतो भवति॥

अहेति विनियोगे च॥ ६१ ॥

अह इत्यनेन युक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति विनियोगे गम्यमाने, चशब्दात् क्षियायां च। नानाप्रयोजनो नियोगो विनियोगः। त्वमह ग्रामं गच्छ, त्वमहारण्यं ग॒च्छ॒। क्षियायाम्—स्वयमह रथेन यातिं३, उपाध्यायं पदातिं ग॒म॒य॒ति। स्वयमहौदनं भुङ्क्तें३, उपाध्यायं सक्तून् पा॒य॒ति। पूर्ववद् निघातप्रतिषेधः, प्लुतश्च॥

चाहलोप एवेत्यवधारणम्॥ ६२ ॥

चलोपेऽहलोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति, एवेत्येतत् चेदवधारणार्थं प्रयुज्यते। क्व चास्य लोपः ? यत्र गम्यते चार्थो न च प्रयुज्यते, तत्र लोपः। तत्र चशब्दः समुच्चयार्थः, अहशब्दः केवलार्थ इति समानकर्तृके चलोपः, नानाकर्तृकेऽहलोपः। चलोपे—देवदत्त एव ग्रामं गच्छतु, स देवदत्त एवारण्यं ग॒च्छ॒तु। ग्रामं चारण्यं च गच्छत्वित्यर्थः। अहलोपे—देवदत्त एव ग्रामं गच्छतु, यज्ञदत्त एवारण्यं ग॒च्छ॒तु। ग्रामं केवलम् , अरण्यं केवलमित्यर्थः। अवधारणमिति किम् ? देवदत्तः क्वेव भो॒क्ष्य॒ते॒। अनवक्लृप्तावयमेवशब्दः। न क्वचिद् भोक्ष्यत इत्यर्थः। 'एवे चानियोगे' (६.१.६४ वा०) इति पररूपम्॥

चादिलोपे विभाषा॥ ६३ ॥

चादयो 'न चवाहाहैवयुक्ते' (८.१.२४) इति सूत्रनिर्दिष्टा गृह्यन्ते। तेषां लोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति विभाषा। चलोपे—शुक्ला व्रीहयो भवन्ति, भ॒वा॒न्ति॒, श्वेता गा आज्याय दु॒हन्ति। भवन्तीत्येतद् विकल्पेन न निहन्यते। वालोपे—व्रीहिभिर्यजेत, य॒जे॒त॒, यवैर्य॒जे॒त॒। एवं शेषेष्वपि यथादर्शनमुदाहार्यम्॥

वैवावेति चच्छन्दसि॥ ६४ ॥

वै वाव इत्येताभ्यां युक्ता प्रथमा तिङ्विभक्तिर्विभाषा नानुदात्ता भवति छन्दसि विषये। अहर्वै दे॒वा॒नामासीद् रात्रिरसु॑राणाम् (तै० सं० १.५.६.२)। बृहस्पतिर्वै दे॒वा॒नां

पुरोहि॑त आसी॒त् शण्ड॒ामर्का॒वसु॑राणा॒म् (तै० सं० ६.४.१०.१)। वाव—अ॑यं वाव हस्त॑ आसी॑त् (काठ० सं० ३६.७)। न्तर आ॑सी॑त्॥

एकान्याभ्यां समर्थाभ्याम्॥ ६५ ॥

एक अन्य इत्येताभ्यां समर्थाभ्यां युक्ता प्रथमा तिङ्विभक्तिर्विभाषा नानुदात्ता भवति छन्दसि विषये। प्र॑जामेका॒ जिन्व॑त्यूर्ज॑मेका॑ रा॑ष्ट्रमेका॑ रक्षति देवयू॒नाम् (शौ० सं० ८.६.१३)। जिन्वतीत्येतत् पक्षे न निहन्यते। तयो॑रन्न॒ः पिप्प॑लं स्वा॒द्वत्त्यन॑श्नन्न॑न्यो अ॑भि चा॑कशीति (ऋ० १.१६४.२०)। अत्तीत्येतत् पक्षे न निहन्यते। समर्थाभ्यामिति किम्? एको देवानुपा॑ति॑ष्ठ॑त्। एक इति संख्यापदमेतद् अन्यार्थे न वर्तते। एकशब्दस्य व्यवस्थार्थं च समर्थग्रहणम्, व्यभिचारित्वात् तस्य॥

यद्वृत्तान्नित्यम्॥ ६६ ॥

प्रथमा छन्दसीति च निवृत्तम्। निघातप्रतिषेध इत्येव। यदो वृत्तं यद्वृत्तम्। यत्र पदे यच्छब्दो वर्तते तत् सर्वं यद्वृत्तम्। इह वृत्तग्रहणेन तद्विभक्त्यन्तं प्रतीयात्, डतरडतमौ च प्रत्ययौ इत्येतद् नाश्रीयते। तस्माद् यद्वृत्तादुत्तरं तिङन्तं नानुदात्तं भवति नित्यम्। यो भु॒ङ्क्ते। यं भो॒जय॑ति। येन भु॒ङ्क्ते। यस्मै ददा॑ति। यत्का॑मास्ते जु॒हु॒मः (ऋ० १०.१२१.१०)। य॑द्रिय॑ङ् वायुर्वाति॑ (तै० सं० ५.५.१.१)। यद्वायुः पव॑ते। पञ्चमीनिर्देशेऽप्यत्र व्यवहिते कार्यमिष्यते ॥ याथाकाम्ये वेति वक्तव्यम्॥ यत्र क्व चन यज॑न्ते॥

पूजनात् पूजितमनुदात्तं काष्ठादिभ्यः ॥ ६७ ॥

पूजनवचनेभ्यः काष्ठादिभ्य उत्तरपदं पूजितमनुदात्तं भवति। काष्ठ—काष्ठाध्यापकः। काष्ठाभिरूपकः। दारुण—दारुणाध्यापकः। दारुणाभिरूपकः। अमातापुत्र—अमातापुत्राध्यापकः। अयुत—अयुताभिरूपकः। अयुताध्यापकः। अद्भुत—अद्भुताध्यापकः। अनुक्त—अनुक्ताध्यापकः। भृश—भृशाध्यापकः। घोर—घोराध्यापकः। परम—परमाध्यापकः। सु—स्वध्यापकः। अति—अत्यध्यापकः ॥ मलोपश्च॥ इति वार्त्तिककारमतम्। मयूरव्यंसकादित्वात् समासः। समासे चैतदनुदात्तत्वम्। समासान्तोदात्तत्वापवाद इष्यते। दारुणमध्यापक इत्येवमादिषु न भवति। मलोपश्चेत्यनेनाप्ययमेव विषय आख्यायते। यत्र विभक्तेरभावाद् मकारो न श्रूयते, तत्रानुदात्तत्वमिति। असमासे हि मलोपो नैवेष्यते। दारुणमधीते दारुणमध्यापक इति। पूजनादित्येव पूजितपरिग्रहे सिद्धे

---

१ - यत्रैव क्वचनाग्निमाधाय य॑ज॒ते देवयजन एव य॑ज॒ते (मै० सं० ३.८.४)।

२ - ‘ पूजनेभ्यः ’ इति मुद्रितेषु।

पूजितग्रहणमनन्तरपूजितप्रतिपत्त्यर्थम्। एतदेव ज्ञापकमिह प्रकरणे पञ्चमीनिर्देशेऽपि नानन्तर्यमाश्रीयत इति। तथा च 'यद्वृत्तान्नित्यम्' (८.१.६६) इत्यत्रोदाहृतम्। अनुदात्त-मिति वर्तमाने पुनरनुदात्तग्रहणं प्रतिषेधनिवृत्त्यर्थम्॥

सगतिरपि तिङ्॥ ६८ ॥

सगतिरगतिरपि पूजनेभ्यः काष्ठादिभ्यः परं पूजितं तिङन्तमनुदात्तं भवति। यत् काष्ठं प॑चति। यत् काष्ठं प्र॑पचति। यद् दारुणं प॑चति। यद् दारुणं प्र॑पचति। 'तिङ्ङतिङः' (८.१.२८) इति निघातस्य 'निपातैर्यद्यदिहन्त०' (८.१.३०) इति प्रतिषेधे प्राप्ते पुनर्विधानम्। सगतिग्रहणात् च गतिरपि निहन्यते। गतिग्रहणे चात्रोपसर्गग्रहणमिष्यते। इह न भवति—यत् काष्ठं शुक्लीक॑रोति। यत् काष्ठं कृष्णीक॑रोति॥

कुत्सने च सुप्यगोत्रादौ॥ ६९ ॥

पदादिति निवृत्तम्। सगतिरपि तिङिति वर्तते। कुत्सने च सुबन्ते गोत्रादिवर्जिते परतः सगतिरपि तिङ् अगतिरप्यनुदात्तो भवति। प॑चति पूति। प्र॑पचति पूति। प॑चति मिथ्या। प्र॑पचति मिथ्या। कुत्सन इति किम्? पचति शोभनम्। सुपीति किम् ? पचति क्लिश्नाति। अगोत्रादाविति किम् ? पचति गोत्रम्। पचति ब्रुवम्। पचति प्रवचनम् ॥ क्रियाकुत्सन इति वक्तव्यम्॥ कर्तुः कुत्सने मा भूत्। पचति पूतिर्देवदत्तः। प्रपचति पूतिः ॥ पूतिश्चानुबन्धो भवतीति वक्तव्यम्॥ तेनायं चकारानुबन्धकत्वादन्तोदात्तो भवति ॥ विभाषितं चापि बह्वर्थमनुदात्तं भवतीति वक्तव्यम्॥ प॑चन्ति पूतिः, पचन्ति पूतिः। प्र॑पचन्ति पूतिः, प्रपचन्ति पूतिः।

सुपि कुत्सने क्रियाया मलोप इष्टोऽतिङीति चोक्तार्थम्।
पूतिश्च चानुबन्धो विभाषितं चापि बह्वर्थम् ॥

गतिर्गतौ॥ ७० ॥

गतिर्गतौ परतोऽनुदात्तो भवति। अ॑भ्युद्धरति। स॑मुदानयति[2]। अ॑भिसं॑पर्याहरति। गतिरिति किम्? दे॑वद॑त्तः प्रपचति। गताविति किम् ? आ म॑न्द्रैरिन्द्र हरिभिर्या॑हि म॑यूररोमभिः (ऋ० ३.४५.१)। याहीत्येतत् प्रति क्रियायोगादाङित्येष गतिः। तस्य गताविति तस्मिन्नसति गतिरित्यनाश्रितपरनिमित्तकमनुदात्तत्वं स्यात्॥

---

१ - भिन्नवाक्यत्वाद् इदं चिन्त्यमिति हरदत्तः।

२ - उ॑दानयति (तै० ब्रा० १.६.५.३)।

तिङि चोदात्तवति॥ ७१ ॥

गतिरिति वर्तते। तिङन्त उदात्तवति परतो गतिरनुदात्तो भवति। यत् प्र॒पचति। यत् प्र॒कर॒रोति। तिङ्ग्रहणमुदात्तवतः परिमाणार्थम्। अन्यथा हि यं प्रति गतिः, तत्रानुदात्तो भवतीति धातावेवोदात्तवति स्यात्, प्रत्यये न स्यात्—यत् प्र॒॒॑कर॒रोति इति। 'यत्क्रियायुक्ताः प्रादयस्तेषां तं प्रति गत्युपसर्गसंज्ञे भवतः' (महाभाष्य १.७५) इति तिङन्ते धातुमेव प्रति गतिसंज्ञा। आमन्ते तर्हि न प्राप्नोति—प्रपचतितराम्, प्रपचतितमामिति ? अत्र केचिदामन्तेन गतेः समासं कुर्वन्ति। तेषामव्ययपूर्वपदप्रकृतिस्वरत्वे (६.२.२) सत्यक्रियमाणेऽपि तिङ्ग्रहणे परमनुदात्तवद् भवतीति गतिनिघातो नैव सिध्यति। अथ तरबन्तस्य गतिसमासः? एवमपि सतिशिष्टत्वादाम एव स्वरे सति गतेः 'अनुदात्तं पदमेकवर्जम्' (६.१.१५८) इत्येवानुदात्तत्वं सिद्धम्। येषां 'गतिकारकोपपदानां कृद्भिः समासवचनं प्राक् सुबुत्पत्तेः' (परि० ७५) इत्यनेन वचनेन कृदन्तेनैव प्राक् सुबुत्पत्तेः समासो भवति नान्येनेति दर्शनम्, तेषामेवंविधे विषये समासेन नैव भवितव्यमिति। पृथक्स्वरप्रवृत्तौ सत्यामनेन निघातेन प्रयोजनमस्ति। तदर्थं यत्नः कर्तव्यः। उदात्तवतीति किम् ? प्रपचति। प्रकरोति॥

आमन्त्रितं पूर्वमविद्यमानवत्॥ ७२ ॥

आमन्त्रितं पूर्वमविद्यमानवद् भवति। तस्मिन् सति यत् कार्यं तद् न भवति, असति यत् तद् भवति। कानि पुनरविद्यमानवत्त्वे प्रयोजनानि ? आमन्त्रिततिङ्निघात-युष्मदस्मदादेशाभावाः। देवदत्त॒ यज्ञदत्त इत्यत्रामन्त्रितस्य पदात् परस्य (८.१.१९) इति निघातो न भवति। षाष्ठिकामन्त्रिताद्युदात्तत्वं (६.१.१९८) भवति। देवदत्त॒ पचसि इत्यत्र 'तिङ्ङतिङः' (८.१.२८) इति निघातो न भवति। देवदत्त तव ग्रामः स्वम्, देवदत्त मम ग्रामः स्वमित्येवमादिषु युष्मदस्मदादेशा न भवन्ति। पूजायामनन्तरप्रतिषेधः प्रयोजनम्। यावद् देवदत्त प॒चसि इत्यत्रापि 'पूजायां नानन्तरम्' (८.१.३७) इत्येव प्रतिषेधो भवति। 'जात्वपूर्वम्' (८.१.४७) इत्येतद् देवदत्त जातु पचसि इत्यत्रापि भवति। 'आहो उताहो चानन्तरम्' (८.१.४९) इति, आहो देवदत्त पचसि, उताहो देवदत्त पचसि इत्यत्रापि भवति। 'आम एकान्तरमामन्त्रितमनन्तिके' (८.१.५५) इति आम् भो॑ पचसि॒ देवदत्त इत्यत्रापि भवति। आमन्त्रितमिति किम् ? देवदत्तः प॒चति॒। पूर्वमिति किम् ? देवदत्त इत्येतस्यामन्त्रिताद्युदात्तत्वे कर्तव्ये नाविद्यमानवद् भवति। पूर्वत्वं च परापेक्षं भवतीति परस्यैव कार्ये स्वनिमित्तेऽन्यनिमित्ते वा तदविद्यमानवद् भवति, न तु स्वकार्ये। देवदत्त॒ पचसि इत्यत्रापि ह्यामन्त्रिताद्युदात्तत्वं भवत्येव। इह इ॒मं मे॑ गङ्गे यमुने सरस्वति॒ इति

---

१ - द्र०—पूर्वत्र (६.२.१३९) वृत्तिः ।

गङ्गेशब्दः पूर्वमामन्त्रितम्, ततः परस्य यमुनेशब्दस्यानुदात्तत्वे कर्तव्ये स्वयमविद्यमानवत्त्वाद् निमित्तं न भवति। मेशब्दस्य निमित्तभावं न प्रतिबध्नाति॥

नामन्त्रिते समानाधिकरणे सामान्यवचनम् ॥ ७३ ॥

अविद्यमानवत्त्वस्य प्रतिषेधः। आमन्त्रितान्ते समानाधिकरणे परतः पूर्वमामन्त्रितान्तं सामान्यवचनं नाविद्यमानवद् भवति। किं तर्हि ? विद्यमानवदेव। अग्नें गृहपते (तै० सं० २.४.५.२)। माणवक जटिलकाध्यापक। पूर्वस्य विद्यमानवत्त्वात् परमनुदात्तमेव भवति। आमन्त्रित इति किम् ? देवदत्त१ पचसि। समानाधिकरण इति किम् ? देवदत्त१ पण्डित यज्ञदत्त। अत्र यज्ञदत्तविशेषणं पण्डितशब्दः, न पूर्वेण समानाधिकरणः। सामान्यवचनमिति किम् ? पर्यायेषु मा भूत्। अघ्न्ये देवि सरस्वति ईडे काव्ये विहव्ये। पर्यायशब्दा एते। एवं ह्युक्तम्—ए१ता तें अघ्न्ये१ नामानि (मा० सं० ८.४३) इति॥

विभाषितं विशेषवचने बहुवचनम् ॥ ७४ ॥

पूर्वेणाविद्यमानवत्त्वे प्रतिषिद्धे विकल्प उच्यते। विशेषवचने समानाधिकरण आमन्त्रितान्ते परतः पूर्वमामन्त्रितं बहुवचनान्तं विभाषितमविद्यमानवद् भवति। देवाः शरण्याः, देवाः शरण्याः। ब्राह्मणा वैयाकरणाः, ब्राह्मणा वैयाकरणाः। सामान्यवचनाधिकारादेव विशेषवचन इति सिद्धे विशेषवचनग्रहणं विस्पष्टार्थम्। बहुवचनमिति किम्? माणवक जटिलक। नित्यमेतद् विद्यमानवदेव॥

इति श्रीवामनविरचितायां काशिकायां वृत्तावष्टमाध्यायस्य प्रथमः पादः॥



१ - इडे१ रन्ते१ हव्ये१ काम्ये१ चन्द्रे१ ज्योतेऽदिते१ सरस्वति (मा० सं० ८.४३)।

॥ अष्टमाध्यायस्य द्वितीयः पादः॥

पूर्वत्रासिद्धम्॥ १ ॥

पूर्वत्रासिद्धमित्यधिकारोऽयम् आध्यायपरिसमाप्तेः। यदित ऊर्ध्वमनुक्रमिष्यामः पूर्वत्रासिद्धमित्येवं तद् वेदितव्यम्। तत्र येयं सपादसप्ताध्याय्यनुक्रान्ता, एतस्यामयं पादोनोऽध्यायोऽसिद्धो भवति। इत उत्तरं चोत्तर उत्तरो योगः पूर्वत्रपूर्वत्रासिद्धो भवति, असिद्धवद् भवति। सिद्धकार्यं न करोतीत्यर्थः। तदेतदसिद्धत्ववचनमादेशलक्षण-प्रतिषेधार्थम्, उत्सर्गलक्षणभावार्थं च। अस्मा उद्धर, द्वा अत्र, द्वा आनय, असा आदित्य इत्यत्र व्यलोपस्यासिद्धत्वाद् 'आद् गुणः' (६.१.८७) इति, 'अकः सवर्णे दीर्घः' (६.१.१०१) इति च न भवति। अमुष्मै, अमुष्मात्, अमुष्मिन् इत्युत्वस्यासिद्धत्वाद् स्मायादयो भवन्ति।

शुष्किका शुष्कजङ्घा च क्षामिमानौजढत्तथा ।
मतोर्वत्वे झलां जश्त्वं गुडलिण्मान्निदर्शनम्॥

शुष्किकेत्यत्र 'शुषः कः' (८.२.५१) इत्यस्यासिद्धत्वाद् 'उदीचामातः स्थाने यक-पूर्वायाः' (७.३.४६) इत्येतद् न भवति। शुष्कजङ्घा इति 'न कोपधायाः' (६.३.३७) इति पुंवद्भावप्रतिषेधो न भवति। क्षामिमानिति क्षामस्यापत्यं क्षामिः, क्षामो वा अस्या-स्तीति क्षामी। क्षामिः क्षामी वा यस्यास्तीति क्षामिमान्। 'क्षायो मः' (८.२.५३) इत्यस्यासिद्धत्वाद् 'मादुपधायाश्च०' (८.२.६) इति वत्वं न भवति। औजढदिति वहेर्निष्ठायामूढः, तमाख्यदिति णिच्, तदन्ताद् लुङ्, 'चङि' (६.१.११) इति द्विर्वचने कर्तव्ये ढत्वधत्वष्टुत्वढलोपानामसिद्धत्वाद् णौ च यष्टिलोपस्तस्य स्थानिवद्भावाद् हूत इत्येतद् द्विरुच्यते। अनग्लोपे (७.४.६३) इति प्रतिषेधात् सन्वदित्वं नास्ति। तेनौजढदिति भवति। औजिढदित्येतत् तु क्त्विन्नन्तस्य ऊढिशब्दस्य भवति। गुडलिण्मानिति गुडलिहोऽस्य सन्तीति मतुप्, तत्र ढत्वजश्त्वयोरसिद्धत्वाद् 'झयः' (८.२.१०) इति वत्वं न भवति। येऽत्र षष्ठीनिर्देशाः, सप्तमीनिर्देशाः, पञ्चमीनिर्देशाश्च, तेषां 'षष्ठी स्थानेयोगा' (१.१.४६), 'तस्मिन्निति निर्दिष्टे पूर्वस्य' (१.१.६६), 'तस्मादित्युत्तरस्य' (१.१.६७) इति च कर्तव्ये नासिद्धत्वं भवति। 'कार्यकालं हि संज्ञापरिभाषम्' (परि० ३) इति पूर्वत्वमासां परिभाषाणां नास्तीति। 'विप्रतिषेधे परम्०' (१.४.२) इत्येषा तु परिभाषा येन पूर्वेण लक्षणेन सह स्पर्धते परं लक्षणम् , तत् प्रति तस्यासिद्धत्वाद् न प्रवर्तते। तथा च विस्फोर्यम् , अवगोर्यम् इति गुणः परेण 'हलि च' (८.२.७७) इति दीर्घत्वेन न बाध्यते। अपवादस्य तु परस्यापि उत्सर्गे कर्तव्ये वचनप्रामाण्यादसिद्धत्वं न भवति। तेन

---

१ - ' जश्त्वे ' इति है० तारा०।

दोग्धा, दोग्धुमित्यत्र घत्वस्यासिद्धत्वाद् 'हो ढः' (८.२.३१) इति न भवति॥

नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति॥ २ ॥

नलोपः पूर्वत्रासिद्धो भवति सुब्विधौ, स्वरविधौ, संज्ञाविधौ, तुग्विधौ च कृति। विधिशब्दोऽयं प्रत्येकमभिसंबध्यमानः स्वरसंज्ञातुकां विधेयत्वात् तैः कर्मषष्ठीयुक्तैर्भाव-साधनोऽभिसंबध्यते। सुपा तु संबन्धसामान्यवचनषष्ठ्यन्तेन कर्मसाधनः। तेन सुपः स्थाने यो विधिः, सुपि च परभूते, सर्वोऽसौ सुब्विधिरिति सर्वत्रासिद्धत्वं भवति। सुब्विधौ तावत्—राजभिः, तक्षभिः इत्यत्र नलोपस्यासिद्धत्वाद् 'अतो भिस ऐस्' (७.१.९) इति न भवति। राजभ्याम्, तक्षभ्याम्, राजसु, तक्षस्विति 'सुपि च' (७.३.१०२) इति, 'बहुवचने झल्येत्' (७.३.१०३) इति दीर्घत्वमेत्वं च न भवति। स्वरविधौ—राजवतीत्यत्र नलोपस्यासिद्धत्वाद् 'अन्तोऽवत्याः' (६.१.२२०) इति न भवति। पञ्चार्मम्, दशार्ममित्यत्र नलोपस्यासिद्धत्वाद् 'अर्मे चावर्णं द्व्यच् त्र्यच्' (६.२.९०) इति पूर्वपदस्याद्युदात्तत्वं न भवति। पञ्चदण्डी इत्यत्र नलोपस्यासिद्धत्वादिगन्ते द्विगौ (६.२.२९) इति पूर्वपद- प्रकृतिस्वरो न भवति। संज्ञाविधौ—पञ्च ब्राह्मण्यः, दश ब्राह्मण्य इति नलोपस्यासिद्धत्वाद् 'ष्णान्ता षट्' (१.१.२४) इति षट्संज्ञा भवति। ततश्च 'न षट्स्वस्रादिभ्यः' (४.१.१०) इति टापः प्रतिषेधो भवति। तदेतत् प्रयोजनं कथं भवति ? यदि प्रतिकार्यं संज्ञाप्रवृत्तिरित्येतद् दर्शनम्। या हि जश्शसोर्लुगर्था षट्संज्ञा प्रवृत्ता तया स्त्रीप्रत्ययप्रतिषेधो न क्रियत इति सा पुनः प्रवर्तयितव्येति। तुग्विधौ—वृत्रहभ्याम्, वृत्रहभिरिति नलोपस्यासिद्धत्वाद् 'ह्रस्वस्य पिति कृति तुक्' (६.१.७१) इति तुग् न भवति। अत्र केचित् 'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' (परि० ८५) इति तुकं प्रति नलोपस्यानिमित्तत्वाद् बहिरङ्गलक्षणेन वासिद्धत्वात् (परि० ५०) तुग्विधिग्रहणमनर्थकमिति प्रतिपन्नाः। तत् तु क्रियते परिभाषाद्वयस्यानित्यत्वं ज्ञापयितुम्। कृतीति किम् ? वृत्रहच्छत्रम्, वृत्रहच्छाया 'छे च' (६.१.७३) इति तुग् भवति। अत्र सिद्धे सत्यारम्भो नियमार्थः—एतेष्वेव नलोपोऽसिद्धो भवति, नान्यत्र। तेन राजीयति, राजायते, राजाश्व इतीत्वम्, दीर्घत्वम्, एकादेशश्च सिद्धो भवति॥

न मु ने॥ ३ ॥

मुभावो नाभावे कर्तव्ये नासिद्धो भवति। किं तर्हि ? सिद्ध एव। अमुना। मुभावस्यासिद्धत्वाद् घिलक्षणो नाभावो (७.३.१२०) न स्यात्। कृते तु नाभावे मुभावस्या-सिद्धत्वात् 'सुपि च' (७.३.१०२) इति दीर्घत्वं यत् प्राप्नोति, तत् 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' (परि० ८५) इति न भवति। अथ वा योगद्वयमिदमुभयार्थं तन्त्रेणोच्चारितम्। अथ वा ने परतो यत् प्राप्नोति, तस्मिन् कर्तव्ये मुभावो नासिद्ध इत्येष

एवात्र सूत्रार्थः। ने तु कर्तव्ये मुभावस्य यत् सिद्धत्वं तदर्थात् संगृहीतम्। तेनात्र मुभावस्य सिद्धत्वाद् नाभावश्च भवति, दीर्घत्वं च न भवति ॥ एकादेशस्वरोऽन्तरङ्गः सिद्धो वक्तव्यः॥ किं प्रयोजनम् ? अयायावेकादेशशतृस्वरैकाननुदात्तसर्वानुदात्तार्थम्। वृक्ष इदम्, प्ल॑क्ष इदम्। अत्र प्रातिपदिकान्तसप्तम्येकवचनयोरुदात्तानुदात्तयोरेकादेशः। स 'एकादेश उदात्तेनोदात्तः' (८.२.५) इत्युदात्तः। तस्य सिद्धत्वं वक्तव्यम्। आन्तर्यतोऽ-यादेश उदात्तो यथा स्यात्। आय्—कुमार्या इदम्। कथमिदमुदाहरणम् ? यदि 'उदात्तयणो हल्पूर्वात्' (६.१.१७४) इत्युदात्तत्वे कृते विभक्तेः 'आटश्च' (६.१.९०) एकादेशः तदा भवतीदमुदाहरणम्। अथ तु कृत एकादेश 'उदात्तयणो हल्पूर्वात्' (६.१.१७४) इति स्वरः, तदा नैतदस्य प्रयोजनं भवति। आव्—वृक्षावि॑दम्। प्ल॑क्षावि॑दम्। एकादेशस्वरः—गाङ्गेऽनूप इति गाङ्गेशब्द एकार 'एकादेश उदात्तेनोदात्तः' (८.२.५) इत्युदात्तः। तस्य सिद्धत्वाद् यः पुनः 'एङः पदान्तादति' (६.१.१०९) इत्येकादेशः स 'एकादेश उदात्तेनोदात्तः' (८.२.५) इति, अतः 'स्वरितो वानुदात्ते पदादौ' (८.२.६) इत्येतद् भवति। शतृस्वरः—तुदती। नुदती। अदुपदेशात् (६.१.१८६) इति लसार्वधातुकानुदात्तत्वे कृत एकादेशः, तदुदात्तस्य सिद्धत्वात् 'शतुरनुमो नद्यजादी' (६.१.१७३) अन्तोदात्तादित्येष स्वरो भवति। अनुमः (६.१.१७३) इति प्रतिषेधो ज्ञापकः—एकादेशस्वरः शतृस्वरे सिद्ध इति। न हि सनुंकं शत्रन्तं किंचिदेकादेशस्वरमन्तरेणान्तोदात्तमस्ति। एकाननुदात्तः—तुदन्ति॑। लिखन्ति॑। एकादेशस्वरस्य सिद्धत्वात् तेन 'अनुदात्तं पदमेकवर्जम्' (६.१.१५८) इति वर्ज्यमानता भवति। सर्वानुदात्तः—ब्राह्मणास्तुदन्ति। ब्राह्मणा लि॑ख॑न्ति॑। एकादेशस्वरस्य सिद्धत्वात् कृते तस्मिन् 'तिङ्ङतिङः' (८.१.२८) इति निघातो भवति। अन्तरङ्ग इति वचनाद् बहिरङ्गस्यासिद्धत्वम् (परि० ५०) एव—पच॑तीति॑। प्रप॑च॑तीति॑ ॥ संयोगान्तलोपो रोरुत्वे सिद्धो वक्तव्यः॥ किं प्रयोजनम् ? हरिवो मे॑दिनं॑ त्वा (तै० सं० ४.७.१४.४)। हरिव इति मतुबन्तमेतत्। तत्र 'छन्दसीरः' (८.२.१५) इति वत्वे, संयोगान्तस्य लोपे च कृते, 'मतुवसो रु संबुद्धौ छन्दसि' (८.३.१) इति रुत्वम्। तस्य संयोगान्तस्य लोपस्यासिद्धत्वाद् 'हशि च' (६.१.११४) इत्युत्वं न प्राप्नोति ॥ सिज्लोप एकादेशे सिद्धो वक्तव्यः॥ अलावीत्। अपावीत्। 'इट ईटि' (८.२.२८) इति सिज्लोपस्य सिद्धत्वात् सवर्णदीर्घत्वं भवति ॥ निष्ठादेशः षत्वस्वरप्रत्ययविधीड्विधिषु सिद्धो वक्तव्यः॥ वृक्णः। वृक्णवान्। निष्ठादेशस्य सिद्धत्वाद् झलि (८.२.३६) इति षत्वं न भवति। कुत्वं तु प्रत्यसिद्ध एवेति तद् भवति। स्वरप्रत्ययविधीड्विधिषु क्षीबशब्द उदाहियते। तत्र च निपातनमनेकधा समाश्रीयते। यदा क्षीबेर्निष्ठायामिटि कृत इत्शब्दलोपो निपात्यते, तदा क्षीब॑ इति संज्ञायामित्शब्दलोपस्यासिद्धत्वाद् 'निष्ठा च द्व्यजनात्' (६.१.२०५) इत्येष स्वरो न प्राप्नोति, क्षीबेन तरति क्षीबि॑क इति द्व्यज्लक्षणष्ठन् (४.४.७) न प्राप्नोति। यदा तु तकारलोपो निपात्यते, तदा तस्यासिद्धत्वादिडागमः प्राप्नोति ॥

प्लुतविकारस्तुग्विधौ छे सिद्धो वक्तव्यः॥ अग्ना३इच्छत्रम्। पटा३उच्छत्रम्। प्लुतविकारस्यासिद्धत्वात् 'छे च' (६.१.७३) इति ह्रस्वलक्षणो नित्यस्तुग् न प्राप्नोति ॥ श्चुत्वं धुटि सिद्धं वक्तव्यम्॥ 'श्च्युतिर् क्षरणे' (भ्वा० ३४) इत्ययं धातुः सकारादिः पठ्यते, तस्य श्चुत्वस्यासिद्धत्वाद् अट्श्च्योतति, रट्श्च्योतति इति 'डः सि धुट्' (८.३.२९) इति प्राप्नोति। अटतीत्यड्, रटतीति रड्, क्विबन्तोऽयम्। किमर्थं पुनः सकारादिः पठ्यते ? इह मधु श्च्योततीति मधुश्च्युत्, क्विबन्तः। मधुश्च्युतमाचष्ट इति णिच्, मधुश्च्यायति। मधुश्च्यायतेः पुनः क्विपि कृते संयोगादित्वात् (८.२.२९) सलोपः, संयोगान्तत्वाद् यलोपः, चकारस्य कुत्वम्, मधुगिति सिद्धम्। शकारादौ पुनरेतस्मिन् संयोगान्तलोपेन यकारचकारयोर्लुप्तयोः शकारस्य षत्वे सति मधुडिति स्यात् ॥ अभ्यासजश्त्वचर्त्वे एत्वतुकोः सिद्धे वक्तव्ये॥ बभणतुः। बभणुः। अभ्यासजश्त्वस्यासिद्धत्वादनादेशादेरित्येत्वं प्राप्नोति। छिदेः विचिच्छित्सति, उच्छेः उचिच्छिषति इति अभ्यासादेशस्यासिद्धत्वात् 'छे च' (६.१.७३) इति तुक् प्राप्नोति ॥ द्विर्वचने परसवर्णत्वं सिद्धं वक्तव्यम्॥ सय्य्यन्ता, सव्व्यत्सरः, यल्ल्लोकम् , तल्ल्लोकमिति परसवर्णस्यासिद्धत्वाद् यरः (८.४.४७) इति द्विर्वचनं न स्यात् ॥ पदाधिकारश्चेल् लत्वधत्वढत्वनत्वरुत्वषत्वणत्वानुनासिकछत्वानि सिद्धानि वक्तव्यानि॥ लत्वम्—गलोगलः, गरोगरः। धत्वम्—द्रोग्धाद्रोग्धा, ढत्वम्—द्रोढाद्रोढा। नत्वम्—नुन्नोनुन्नः, नुत्तोनुत्तः। रुत्वम्—अभिनोऽभिनः, अभिनदभिनत्। षत्वम्—मातुःष्वसामातुःष्वसा, मातुःस्वसामातुःस्वसा। पितुःष्वसापितुःष्वसा, पितुःस्वसापितुःस्वसा। णत्वम्—माषवापाणिमाषवापाणि, माषवापानिमाषवापानि। अनुनासिकम्—वाङ्नयनंवाङ्नयनम्, वाग्नयनंवाग्नयनम्। छत्वम्—वाक्च्छयनंवाक्च्छयनम्, वाक्शयनंवाक्शयनम्। लत्वादीनां विकल्पितानामसिद्धत्वात् कृते द्विर्वचने सत्युपरिष्टाद् विकल्पे सति गरोगलः, गलोगरः इत्येवं रूपमपि द्विरुक्तं स्यात्। तदेतत् सर्वं न मु ने इति योगविभागेन साध्यते। न इत्येतावदनिष्टे विषये पूर्वत्रासिद्धस्य प्रतिषेधार्थम्। ततो मु ने इति। नेत्येतदनुवर्तते॥

उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य॥ ४ ॥

उदात्तयणः स्वरितयणश्च परस्यानुदात्तस्य स्वरित आदेशो भवति। उदात्तयणः—कुमार्यौ[1], कुमार्यः। उदात्तनिवृत्तिस्वरेण (६.१.१६१) अयमीकार उदात्तः, तस्य स्थाने यणादेशः, स उदात्तयण्, तस्मात् परस्यानुदात्तस्य स्वरित आदेशो भवति। स्वरितयणः—सक्तूल्व्याशा। ख१ल१प्व्याशा। सक्तूल्वः, ख१ल१पूरिति कृत्स्वरेण (६.२.१३९) अन्तोदात्तौ,

---

१ - 'लोपो व्योर्वलि' (६.१.६६) इति यलोप इति नागेशः (८.२.६ उद्योत)।

२ - ' तुक् न प्राप्नोति ' इति है० तारा० अपपाठः।

तयोः 'ओः सुपि' (६.४.८३) इति यणादेशः, स उदात्तयण्, ततः परस्य सप्तम्येकवचनस्य स्वरितत्वम्, तस्य यणादेशः स्वरितयण्, तस्मात् स्वरितयणः परस्याशाशब्दाकारस्यानुदात्तस्य स्वरितो भवति। ननु च सप्तम्येकवचनस्य यदुदात्तयण इति स्वरितत्वम्, तदसिद्धं यणादेशे, तत् कथमयं स्वरितयण् भवति? आश्रयात् सिद्धत्वं भविष्यति। यद्येवम् 'उदात्तादनुदात्तस्य स्वरितः' (८.४.६६) इत्येतस्याप्याश्रयात् सिद्धत्वं प्राप्नोति। ततश्च दध्याशेत्यत्रापि स्वरितः स्यात् ? तस्मादयमेव यण्स्वरो यणादेशे सिद्धो वक्तव्यः। केचित् तु ब्रुवते—उदात्तात् स्वरितयणोऽपि परस्यानुदात्तस्य स्वरितत्वं दृश्यते। तथा च तैत्तिरीयके शाखान्तरे पठ्यते—यास्ते॒ विश्वाः स॒मिध॒ः सन्त्य॑ग्ने॒ (तै० सं० ३.५.५.३) इति। अग्न इत्ययमकारः स्वरितः पठ्यते। तथा ब्राह्मणेऽपि दध्या॑शयति (तै० ब्रा० १.७.६.५) इत्याकारः स्वरितः पठ्यत इति। यथा तु वार्त्तिकं भाष्यं च तथा उदात्तात् स्वरितयणः परस्यानुदात्तस्यानेन स्वरितत्वं न भवतीति स्थितम्। तथा च भाष्ये स्वरितयण्ग्रहणमिदं प्रत्याख्यायते, स॒कृ॒ल्ल्व्या॑शा इत्येवमादावुदात्तयण इत्येव स्वरितस्य सिद्धत्वात्। स्वरितयण्व्यवधानमव्यवधानमेव—'स्वरविधौ व्यञ्जनमविद्यमानवत्' (परि० ७६) इति। तत् तु क्रियते, पूर्वस्मादपि विधौ स्थानिवद्भावाद् व्यवधानमस्ति, स्वरदीर्घयलोपेषु च लोपाजादेशस्य स्थानिवद्भावः प्रतिषिध्यत इति। उदात्तस्वरितयोरिति किम् ? बै॒दी॒ आ॒शा बै॒द्या॒शा। शार्ङ्ग॑रव्या॒शा। अनुदात्तयणादेशोऽयम्। अनुदात्तस्येति किम् ? कु॒मा॒र्यत्र॑। कि॒शो॒र्यत्र॑। अत्रेत्ययमाद्युदात्तो लित्स्वरेण (६.१.१६३)॥

एकादेश उदात्तेनोदात्तः॥ ५ ॥

उदात्तेन सहानुदात्तस्य य एकादेशः स उदात्तो भवति। अनुदात्तस्येति वर्तते। अ॒ग्नी। वा॒यू। वृ॒क्षैः। प्ल॒क्षैः। उदात्तेनेति किम् ? पर्चन्ति। यर्जन्ति। लसार्वधातुकानुदात्तत्वे (६.१.१८६) कृते द्वयोरनुदात्तयोरयमेकादेशः, पररूपे कर्तव्ये स्वरितस्य (८.४.६६) असिद्धत्वात्॥

स्वरितो वानुदात्ते पदादौ॥ ६ ॥

अनुदात्ते पदादावुदात्तेन सह य एकादेशः स स्वरितो वा भवत्युदात्तो वा। सु उत्थितः—सू॑त्थितः, सूत्थि॑तः। वि ईक्षते—वी॑क्षते, वीक्ष॑ते। वसुकः असि—व॒सु॒को॑ऽसि, व॒सु॒कोऽसि॑। सूत्थित इति सुशब्दः 'सुः पूजायाम्' (१.४.६४) इति कर्मप्रवचनीयः, तस्य

---

१ - केचिदत्र ' अनुदात्तस्य ' इति नानुवर्तयन्ति। तथा च स्वरितस्यापि उदात्तेन सहैकादेश उदात्तो भवति। वृत्तिकारमतमेव भाष्यानुमोदितमिति स्वरसिद्धान्तचन्द्रिकात्रैव सूत्रे।

२ - ' वृक्षौ प्लक्षौ ' इति न्यासे।

३ व्यवस्थितेयं विभाषा—मैत्रायण्यां संहितायां स्वरित एव, तैत्तिरीयायां तूदात्त एव स्वरो दृश्यत इति युधिष्ठिरमीमांसकाः। तथा हि — न॑मो॒ऽस्यद्भ्य॒ः (मै० सं० २.६.४), नमोऽस्य॑द्भ्यः॒ (तै० सं० ४.५.३.२)।

प्रादित्वात् समासे सत्यव्ययपूर्वपदप्रकृतिस्वरत्वेन (६.२.२) आद्युदात्तत्वम्, शेषमनुदात्तम् (६.१.१५८) इति चानुदात्ते पदादावेकादेशो भवति। वीक्षते, वसुकोऽसीत्यत्रापि 'तिङ्ङतिङः' (८.१.२८) इति निघाते कृतेऽनुदात्ते पदादावेकादेशः। स्वरितग्रहणं विस्पष्टार्थम्। उदात्ते हि विकल्पिते तस्मिन्नसत्यान्तर्यत एव स्वरितो भविष्यतीति। अनुदात्त इति किम्? देवदत्तोऽत्र। पदादाविति किम् ? वृक्षौ। वृक्षाः॥

नलोपः प्रातिपदिकान्तस्य॥ ७ ॥

पदस्येति वर्तते। प्रातिपदिकस्य पदस्य योऽन्त्यो नकारस्तस्य लोपो भवति। राजा। राजभ्याम्। राजभिः। राजता। राजतरः। राजतमः। प्रातिपदिकग्रहणं किम् ? अहन्नहिम् (ऋ० १.३२.२)। अन्तग्रहणं किम् ? राजानौ। राजानः। प्रातिपदिकग्रहणमसमस्तमेव 'सुपां सुलुक् ०' (७.१.३९) इति षष्ठ्या लुका निर्दिष्टम् ॥ अह्नो नलोपप्रतिषेधो वक्तव्यः॥ अहः। अहोभ्याम्, अहोभिः। 'अहन्', 'रोऽसुपि' (८.२.६८, ६९) इति रेफरुत्वयोरसिद्धत्वाद् नलोपः प्राप्नोति, सावकाशं तदुभयं संबुद्धौ—हेऽहः, हे दीर्घाहो निदाघेति ? तत्र समाधिमाहुः। 'अहन्' (८.२.६८) इति रुविधौ यदुपादीयते प्रथमैकवचनान्तमकृतनलोपं तदावर्त्यते, तत्रैकयावृत्त्या तदेवंरूपं नलोपाभावार्थमन्वाख्यायते, द्वितीययापि तस्य रुर्विधीयते॥

न ङिसंबुद्ध्योः॥ ८ ॥

ङौ परतः संबुद्धौ च नकारलोपो न भवति। आर्द्रे चर्मन्[1] (तै० सं० ७.५.९.३)। लोहिते चर्मन् (काठ० सं० २४.२)। 'सुपां सुलुक् ०' (७.१.३९) इति ङेर्लुक्। संबुद्धौ—हे राजन्। हे तक्षन्। एतस्मादेव नलोपप्रतिषेधवचनाद् अप्रत्ययः (१.२.४५) इति प्रत्ययलक्षणेन प्रातिपदिकसंज्ञा न प्रतिषिध्यत इति ज्ञाप्यते, भसंज्ञा च न भवतीति। तथा च राज्ञः पुरुषो राजपुरुष इत्यत्र नलोपः (८.२.७) च भवति, अल्लोपः (६.४.१३४) च न भवति ॥ ङावुत्तरपदे प्रतिषेधस्य प्रतिषेधो वक्तव्यः॥ चर्मणि तिला अस्य चर्मतिलः। हे राजवृन्दारक[4] इत्यत्र तु समुदायार्थसंबोधनं न पूर्वपदार्थसंबोधनं प्रतीयत इति संबुद्ध्यन्तं पूर्वपदं नैव समस्यते ॥ वा नपुंसकानामिति वक्तव्यम्॥ हे चर्मन्। हे चर्म॥

---

१ - ' आद्युदात्तः ' इत्यपपाठो मुद्रितेषु ।
२ - विपर्ययेण सूत्रे उद्दिश्येते।
३ - ' रोहिते ' इति काठ० सं०।
४ - ' राजन्वृन्दारक ' इत्यपपाठो है०।

मादुपधायाश्च मतोर्वोऽयवादिभ्यः॥ ९ ॥

मतोरिह कार्यित्वेनोपादानात् सामर्थ्यलब्धं प्रातिपदिकम्, तद् मादिति मकारावर्णाभ्यां विशिष्यते, मकारावर्णविशिष्टया चोपधया इत्ययमर्थो भवति—मकारान्ताद् मकारोपधादवर्णान्तादवर्णोपधात् चोत्तरस्य मतोर्व इत्ययमादेशो भवति, यवादिभ्यस्तु परतो न भवति। मकारान्तात् तावत्—किंवान्। शंवान्। मकारोपधात्—शमीवान्। दाडिमीवान्। अवर्णान्तात्—वृक्षवान्। प्लक्षवान्। खट्वावान्। मालावान्। अवर्णोपधात्—पयस्वान्। यशस्वान्। भास्वान्। मादुपधायाश्चेति किम् ? अग्निमान्। वायुमान्। अयवादिभ्य इति किम् ? यवमान्। दल्मिमान्। ऊर्मिमान्॥ यव। दल्मि। ऊर्मि। भूमि। कृमि। क्रुञ्चा। वशा। द्राक्षा। एतेषां 'मादुपधायाश्च०' (८.२.९) इति प्राप्नोति। ध्रजि, ध्वजि, सञ्जि इत्येतेषां 'छन्दसीरः' (८.२.१५) इति। हरित्, ककुत्, गरुत् इत्येतेषां 'झयः' (८.२.१०) इति। इक्षु, मधु, द्रुम, मण्ड, धूम इत्येतेषां 'संज्ञायाम्' (८.२.११) इति। आकृतिगणश्च यवादिः। अकृतवत्वो मतुब् यवादिषु द्रष्टव्यः। यस्य सति निमित्ते मतुपो वत्वं न दृश्यते, स यवादिषु द्रष्टव्यः। इह नृमत इदं नार्मतमिति बहिरङ्गलक्षणत्वात् (परि० ५०) अवर्णोपधस्य मतुपो वत्वं न भवति॥

झयः॥ १० ॥

झयन्तादुत्तरस्य मतोर्व इत्ययमादेशो भवति। अग्निचित्वान् ग्रामः। उदश्वित्वान् घोषः। विद्युत्वान् बलाहकः। इन्द्रो मरुत्वान् (आ० श्रौ० २.११.१०)। दृषद्वान् देशः॥

संज्ञायाम्॥ ११ ॥

संज्ञायां विषये मतोर्व इत्ययमादेशो भवति। अहीवती। कपीवती। ऋषीवती। मुनीवती॥

आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती॥ १२ ॥

आसन्दीवद् अष्ठीवत् चक्रीवत् कक्षीवद् रुमण्वत् चर्मण्वती इत्येतानि संज्ञायां निपात्यन्ते। वत्वं पूर्वेणैव सिद्धम्, आदेशार्थानि निपातनानि। आसन्दीवदिति आसनशब्दस्यासन्दीभावो निपात्यते। आसन्दीवान् ग्रामः। आसन्दीवदहिस्थलम्। आसनवानित्येवान्यत्र। अपरे त्वाहुः—आसन्दीशब्दोऽपि प्रकृत्यन्तरमेवास्ति, तथा चोक्तम्—औदुम्बरी राजासन्दी भवति (श० ब्रा० ३.३.४.२६, २७) इति। तस्य 'संज्ञायाम्' (८.२.११)

---

१ - 'उदश्वित्वान् घोषः' इति नास्ति है०।

इति वत्वेन सिद्धम्, आसन्दीवदित्येतत् प्रपञ्चार्थमिह पठ्यते। अष्ठीवदिति अस्थ्नोऽष्ठीभावः। अष्ठीवानिति शरीरैकदेशसंज्ञा। अस्थिमानित्येवान्यत्र। चक्रीवदिति चक्रशब्दस्य चक्रीभावो निपात्यते। चक्रीवान् राजा। चक्रवानित्येवान्यत्र। चक्रीवन्ति सदो हविर्धानानि (का० श्रौ० २४.३.२६) भवन्तीत्येतत् तु छान्दसत्वाद् अनुगन्तव्यम्। कक्षीवदिति कक्ष्यायाः संप्रसारणं निपात्यते। कक्षीवान् नाम ऋषिः। कक्ष्यावानित्येवान्यत्र। रुमण्वदिति लवणशब्दस्य रुमण्भावो निपात्यते। लवणवानित्येवान्यत्र। अपरे त्वाहुः—रुमन्निति प्रकृत्यन्तरमस्ति, तस्यैतद् निपातनं नकारलोपाभावार्थम्, णत्वार्थं च, मतोर्वा नुडर्थमिति। चर्मण्वतीति चर्मणो नलोपाभावो णत्वं च निपात्यते, मतोर्वा नुडागमः। चर्मण्वती नाम नदी। चर्मवतीत्येवान्यत्र॥

उदन्वानुदधौ च॥ १३ ॥

उदन्वानित्युदकशब्दस्य मतावुदन्भावो निपात्यत उदधावर्थे संज्ञायां च विषये। उदन्वान् नाम ऋषिर्यस्यौदन्वतः पुत्रः। उदधौ—उदन्वान्। यस्मिन्नुदकं धीयते, स एवमुच्यते। उदधाविति किम् ? उदकवान् घट इत्यत्र तु दधात्यर्थो न विवक्ष्यते। किं तर्हि ? उदकसत्तासंबन्धसामान्यम्॥

राजन्वान् सौराज्ये॥ १४ ॥

राजन्वानिति निपात्यते सौराज्ये गम्यमाने। शोभनो राजा यस्मिन्निति स राजन्वान् देशः। राजन्वती पृथ्वी। राजवानित्येवान्यत्र॥

छन्दसीरः॥ १५ ॥

छन्दसि विषय इवर्णान्ताद् रेफान्तात् चोत्तरस्य मतोर्वत्वं भवति। इवर्णान्तात् तावत्—त्रिवती याज्यानुवाक्या भवति। हरिवो मे॑दिनं॑ त्वा (तै० सं० ४.७.१४.४)। अधिपतिवतीर्जुहोति । चरुरं॑ग्निवाँ इ॑व (ऋ० ७.१०४.२)। आरेवानेतु मा विशत्। 'रयेर्मतौ०' (६.१.३७ वा०) इति संप्रसारणम्। सर॑स्वतीवान् भा॑रतीवान् (मै० सं० ३.१०.६)। दधि॑वांश्च॒ रुः (शौ० सं० १८.४.१७)। 'छन्दसि सर्वे विधयो विकल्प्यन्ते' (परि० ३५) इतीह न भवति—सप्तर्षिमन्तम्, ऋषिमान्, ऋतीमान्, सूर्यं ते द्यावापृथिवीमन्तमिति। रेफान्तात्—गीर्वान्। धूर्वान्। आशीर्वान्॥

---

१ - त्रिवतीर्याज्यानुवाक्या भवन्ति (काठ० सं० ११.१)।

२ - अधिपतिवतीर्भवन्ति (काठ० सं० २१.३)।

अनो नुट्॥ १६ ॥

छन्दसीति वर्तते। अनन्तादुत्तरस्य मतोर्नुडागमो भवति छन्दसि विषये। अ॒क्ष॒ण्वन्त॒ः कर्णवन्त॒ः सखा॑यः (ऋ० १०.७१.७)। अस्थ॒न्वन्त॒ं यदन॒स्था बिभर्ति (ऋ० १.१६४.४)। अक्षण्वता लाङ्गलेन (पै० सं० ६.८.१)। शी॒र्ष॒ण्वती॑ (शौ० सं० १०.१.२)। मू॒र्ध॒न्वती॑ (तै० सं० २.६.२.२)। नुटोऽसिद्धत्वात् तस्य च वत्वं न भवति, ततः परस्य च भवति॥

नाद् घस्य॥ १७ ॥

नकारान्तादुत्तरस्य घसंज्ञकस्य नुडागमो भवति छन्दसि विषये। सुपथिन्तरः। दस्यु-हन्तमः॥ भूरिदाव्नस्तुड् वक्तव्यः॥ भूरिदाव॑त्तरः॒ (ऋ० ८.५.३६)॥ ईद्रथिनः॥ रथिन ईकारान्तादेशो घे परतः। र॒थीत॑रः॒ (ऋ० १.८४.६)। रथशब्दादेव वा मत्वर्थीयोऽयमीकारः 'छन्दसीवनिपौ ०' (५.२.१०९ वा०) इति॥

कृपो रो लः॥ १८ ॥

कृपेर्धातो रेफस्य लकारादेशो भवति। र इति श्रुतिसामान्यमुपादीयते। तेन यः केवलो रेफः, यश्च ऋकारस्थः तयोर्द्वयोरपि ग्रहणम्। ल इत्यपि सामान्यमेव। ततोऽयं केवलस्य रेफस्य स्थाने लकारादेशो विधीयते। ऋकारस्याप्येकदेशविकारद्वारेण ऌकारः, एवं च 'लुटि च क्लृपः' (१.३.९३) इत्येवमादयो निर्देशा उपपद्यन्ते। कल्प्ता, कल्प्तारौ, कल्प्तारः। चिक्लृप्सति। क्लृप्तः। क्लृप्तवान्। कृपा इत्येतत् 'क्रपेः संप्रसारणं च' (ग० सू० ३०) इति भिदादिषु पाठाद् भवति। तस्य हि कृतसंप्रसारणस्य लाक्षणिकत्वाद् (परि० १०५) इह कृप इति ग्रहणं नास्ति। कृपणकृपीटकर्पूरादयोऽपि क्रपेरेव द्रष्टव्याः। 'उणादयो बहुलम्' (३.३.१) इति वा कृपेरेव लत्वाभावः॥ वालमूललघ्वसुरालमङ्गुलीनां वा रो लमापद्यत इति वक्तव्यम्॥ वालः, वारः। मूलम्, मूरम्। लघु, रघु। असुरः, असुलः। अलम्, अरम्। अङ्गुलिः, अङ्गुरिः॥ कपिलकादीनां संज्ञाछन्दसोर्वा रो लमापद्यत इति वक्तव्यम्॥ कपिरकः, कपिलकः। तिल्पिलीकम्, तिर्पिरीकम्। लोमानि, रोमाणि। पांशुरम्, पांशुलम्। कर्म, कल्म। शुक्रः, शुक्लः। रलयोरेकत्वस्मरणमिति केचित्। किमिदमेकत्वस्मरणमिति ? समानविषयत्वमेव तयोः स्मर्यत इत्यर्थः॥

---

१ - 'अकृण्वता' इति मुद्रितसंहितायाम्।

२ - दस्युहन्त॑मम् (ऋ० ६.१६.१५)।

३ - 'उपादीयते' इत्यधिकं बाल०।

४ - अत्र वार्त्तिकेऽसुरशब्दः प्रक्षिप्तः प्रतीयते। 'लो रमापद्यते' इति पाठो युक्तः स्यात्, भाष्ये तथा दर्शनात्। ५ - 'लो रमापद्यते' इति युक्तः पाठः।

उपसर्गस्यायतौ॥ १९ ॥

अयतौ परत उपसर्गस्य यो रेफस्तस्य लकार आदेशो भवति। प्लायते। पलायते। अत्र च योऽयमेकादेशः, तस्य स्थानिवद्भावादयतेरुपसर्गस्य च विभागे सति, यद्ययतिग्रहणं रेफस्य विशेषणम्, तदा 'येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्' (व्या० प० ४६) इत्येकेन वर्णेन व्यवधानेऽपि सति लत्वं भवति। तथा च पल्ययत इत्यत्रापि भवति। उपसर्गविशेषणे त्वयतिग्रहणे सिद्धमेवैतत् सर्वम्, प्रतेरपि तु व्यवहितेऽपि प्राप्नोति। तत्र केषांचिद् दर्शनम्—भवितव्यमेव प्लत्ययत इति। प्रथमपक्षदर्शनाभिनिविष्टास्तु प्रत्ययत इत्येव भवतीति मन्यन्ते। अपरे तु प्रतिशब्दोपसृष्टस्यायतेः प्रयोगमेव नेच्छन्ति। निस् दुस् इत्येतयोस्तु रुत्वस्यासिद्धत्वाद् लत्वेन नैव भवितव्यम्। निरयणम्। दुरयणम्॥

ग्रो यङि॥ २० ॥

गृ इत्येतस्य धातो रेफस्य लकार आदेशो भवति यङि परतः। निजेगिल्यते, निजेगिल्येते, निजेगिल्यन्ते। भावगर्हायां ग्रो यङ् विहितः (३.१.२४)। केचिद् ग्र इति गिरतेर्गृणातेश्च सामान्येन ग्रहणमिच्छन्ति। अपरे तु गिरतेरेव, न गृणातेः। गृणातेर्हि यङेव नास्ति, अनभिधानादिति। यङीति किम् ? निगीर्यते॥

अचि विभाषा॥ २१ ॥

अजादौ प्रत्यये परतो ग्रो रेफस्य विभाषा लकारादेशो भवति। निगिरति, निगिलति। निगरणम् , निगलनम्। निगारकः, निगालकः। इयं तु व्यवस्थितविभाषा। तेन गल इति प्राण्यङ्गे नित्यं लत्वं भवति, गर इति विषे नित्यं न भवति। निगार्यते, निगाल्यत इति णिलोपस्य स्थानिवद्भावादचि विभाषेति लत्वविकल्पः। 'पूर्वत्रासिद्धे न स्थानिवत्' (महाभाष्य १.१५४) इत्येतदपि सापवादमेव, तस्य दोषः संयोगादिलोपलत्वणत्वेषु (महाभाष्य १.१५५) इति। अन्तरङ्गत्वाद् वा कृते लत्वविकल्पे णिलोपो भविष्यति। गिरौ, गिर इत्यत्र 'धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम्' (पु० वृ० ५५) इति लत्वं न भवति। गिरतिर्वा लत्वविधावधिकृतो गृणातेरेतद् रूपम्॥

परेश्च घाङ्कयोः॥ २२॥

परि इत्येतस्य यो रेफस्तस्य घशब्देऽङ्कशब्दे च परतो विभाषा लकार आदेशो भवति। परिघः, पलिघः। पर्यङ्कः, पल्यङ्कः। घ इति स्वरूपग्रहणमत्रेष्यते, न 'तरप्तमपौ ०' (१.१.२२) इति ॥ योगे चेति वक्तव्यम्॥ परियोगः, पलियोगः॥

संयोगान्तस्य लोपः॥ २३ ॥

संयोगान्तस्य पदस्य लोपो भवति। गोमान्। यवमान्। कृतवान्। हतवान्। इह श्रेयान्, भूयानिति रुत्वं परमप्यसिद्धत्वात् संयोगान्तस्य लोपं न बाधते। जश्त्वे तु नाप्राप्ते तदारभ्यत इति तस्य बाधकं भवति—यशः, पय इति। दध्यत्र, मध्वत्रेत्यत्र तु यणादेशस्य बहिरङ्गलक्षणस्यासिद्धत्वात् संयोगान्तलोपो न भवति॥

रात् सस्य॥ २४ ॥

संयोगान्तस्य पदस्य यो रेफस्तस्मादुत्तरस्यान्त्यस्य सकारस्य लोपो भवति। गो- भि॑रक्षाः (ऋ० ६.१०७.६)। प्र॒त्यञ्च॑मत्साः (ऋ० १०.२८.४)। क्षरतेः त्सरतेश्च लुङि सिचश्छान्दसत्वादीडभावो 'बहुलं छन्दसि' (७.३.९७) इति वचनात्। वृद्धौ सत्यां रूपमेतत्। मातुः, पितुरिति 'ऋत उत्' (६.१.१११) इत्युत्वे कृते रपरत्वे (१.१.५१) च सति रात् सस्येति सलोपः। सिद्धे सत्यारम्भो नियमार्थः—रात् सस्यैव लोपो भवति, नान्यस्येति। ऊर्जेः क्विप्—ऊर्क्। मृजेर्लङि—न्यमार्ट्॥

धि च॥ २५ ॥

धकारादौ प्रत्यये परतः सकारस्य लोपो भवति। अलविध्वम्, अलविढ्वम्। अपवि- ध्वम्, अपविढ्वम्। यद्यत्र सकारलोपो न स्यात्, सिचः षत्वे जश्त्वे च 'विभाषेटः' (८.३.७९) इति मूर्धन्याभावपक्षेऽपि न धकारः श्रूयेत। इतः प्रभृति सिचः सकारस्य लोप इष्यते। इह न भवति—चकाद्धि पलितं शिर इति। तथा पयो धावतीत्येवमादावपि न भवति। सम्धिः (मा० सं० १८.६) ब॒ब्धाम् (निरु० ५.१२) इति छान्दसो वर्णलोपः। भाष्यकारस्त्वाह—चकाधीत्येव भवितव्यमिति। तेन पयो धावतीत्येवमादौ यत्नान्तरमास्थेयम्॥

धि सकारे सिचो लोपश्चकाद्धीति प्रयोजनम् ।
आशाध्वं तु कथं जश्त्वं सकारस्य भविष्यति॥ १॥
सर्वमेवं प्रसिद्धं स्याच्छ्रुतिश्चापि न भिद्यते ।
लुङश्चापि न मूर्धन्ये ग्रहणं सेटि दुष्यति॥ २॥
घसिभसोर्न सिध्येत तस्मात् सिज्ग्रहणं न तत्।
छान्दसो वर्णलोपो वा यथेष्कर्तारमध्वरे ॥ ३॥

नि॒ष्क॒॑र्तास्मध्व॒॑रस्य॒॑ (तै० सं० ४.२.७.३) इत्येवं प्राप्ते॥

---

१ - समस्तमेतद् मुद्रितेषु ।
२ - ' उत्तरस्यान्तस्य ' इति मुद्रितेषु।
३ - ' दीर्घे सति ' इत्यपपाठो मुद्रितेषु।
४ - इ॒॑ष्क॒॑र्तास्मध्व॒॑रस्य॒॑ (ऋ० १०.१४०.५)।

झलो झलि॥ २६ ॥

झल उत्तरस्य सकारस्य झलि परतो लोपो भवति। अभित्त। अभित्थाः। अच्छित्त। अच्छित्थाः। अवात्ताम् , अवात्तेत्यत्र वा सिचः सकारलोपस्यासिद्धत्वात् 'सः स्यार्धधातुके' (७.४.४६) इति सकारस्य तकारः। झल इति किम् ? अमंस्त। अमंस्थाः। झलीति किम् ? अभित्साताम्। अभित्सत। अयमपि सिच एव लोपः, तेनेह न भवति—सोमसुत् स्तोता, दृषत्स्थानमिति॥

ह्रस्वादङ्गात्॥ २७ ॥

ह्रस्वान्तादङ्गादुत्तरस्य सकारस्य लोपो भवति झलि परतः। अकृत। अकृथाः। अहृत। अहृथाः। ह्रस्वादिति किम् ? अच्योष्ट। अप्लोष्ट। अङ्गादिति किम् ? अलाविष्टाम्, अलाविषुः। झलीत्येव—अकृषाताम्, अकृषत। अयमपि सिच एव लोपः, तेनेह न भवति—द्विष्टराम्, द्विष्टमामिति। सुजन्ताद् द्विशब्दात्तरप्तमपौ, अद्रव्यप्रकर्ष आतिशायिकाद् आम् प्रत्ययः॥

इट ईटि॥ २८ ॥

इट उत्तरस्य सकारस्य लोपो भवतीटि परतः। अदेवीत्। असेवीत्। अकोषीत्। अमोषीत्। इट इति किम् ? अकार्षीत्। अहार्षीत्। ईटीति किम् ? अलाविष्टाम्, अलाविषुः॥

स्कोः संयोगाद्योरन्ते च॥ २९ ॥

पदस्यान्ते यः संयोगः, झलि परतो वा यः संयोगः, तदाद्योः सकारककारयोर्लोपो भवति। लस्जेः—लग्नः। लग्नवान्। साधुलक्। मस्जेः—मग्नः। ककारस्य—तक्षेः—तट्। तष्टः। तष्टवान्। काष्ठतट् ॥ झलि सडीति वक्तव्यम्॥ किमिदं सडीति ? सनः सप्रभृति महिङो ङकारेण प्रत्याहारः। इह मा भूत्—काष्ठशक्स्थातेति। थकारे झलि ककारस्य संयोगादेर्लोपः प्राप्नोति। तदत्र शकेः क्विबन्तस्य प्रयोग एव नास्तीत्याह—'काष्ठशगेव नास्ति कुतोऽयं काष्ठशकि तिष्ठेत्' (महाभाष्य ३.४००) इति। वास्यर्थम्, काक्व्यर्थम् इत्यत्रापि बहिरङ्गलक्षणस्य यणादेशस्यासिद्धत्वात् (परि० ५०) संयोगादिलोपो

---

१ - ' सकारस्य ' इति नास्ति मुद्रितेषु।

२ - ' आतिशायिकः ' इत्यपपाठो मुद्रितेषु।

३ - ' अदावीत् , अलावीत् ' इति है०। ' आदावीत् ' इति बाल०।

४ - ' यः ' इति महाभाष्यपाठः।

५ - ' काक्वर्थम् ' इति है०।

न भवति। स्कोरिति किम् ? नर्नर्त्ति। वर्वर्त्ति । संयोगाद्योरिति किम् ? पयः। शक्। अन्ते चेति किम् ? तक्षिता। तक्षकः ॥

चोः कुः॥ ३० ॥

चवर्गस्य कवर्गादेशो भवति झलि परतः पदान्ते च। पक्ता। पक्तुम्। पक्तव्यम्। ओदनपक्। वक्ता। वक्तुम्। वक्तव्यम्। वाक्। क्रुञ्चेत्यत्र सङीति वचनाद् ञकारस्य चकारे झलि कुत्वं न भवति। युजिक्रुञ्चां च (३.२.५६) इति निपातनाद् वा। नकारोपधो वा धातुरयं रेफरहितश्च 'कुञ्च कौटिल्याल्पीभावयोः' (भ्वा० ११३) इति पठ्यते। नकारलोपे हि निकुचितिः (महाभाष्य १.२००) इति दृश्यते। युजिक्रुञ्चां च (३.२.५६) इति तस्यैव रेफोऽधिकः, नकारस्य लोपाभावश्चेति निपात्यते। तत्रानुस्वारस्य परसवर्णस्य चासिद्धत्वाद् ञकार एव नास्तीति कुत्वं न भविष्यति॥

हो ढः॥ ३१ ॥

हकारस्य ढकारादेशो भवति झलि परतः, पदान्ते च। सोढा। सोढुम्। सोढव्यम्। जलाषाट्। वोढा। वोढुम्। वोढव्यम्। प्रष्ठवाट्। दित्यवाट्॥

दादेर्धातोर्घः॥ ३२ ॥

दकारादेर्धातोर्हकारस्य घकारादेशो भवति झलि परतः पदान्ते च। दग्धा। दग्धुम्। दग्धव्यम्। काष्ठधक्। दोग्धा। दोग्धुम्। दोग्धव्यम्। गोधुक्। दादेरिति किम् ? लेढा। लेढुम्। लेढव्यम्। गुडलिट्। धातोरिति दादिसमानाधिकरणमेतद् न। किं तर्हि ? तद्विशेषणमवयवषष्ठ्यन्तम्—धातोरवयवो यो दादिः शब्दस्तदवयवस्य हकारस्येति। किं कृतं भवति ? अधोगित्यत्रापि घकारः सिद्धो भवति। कथं दोग्धा, दोग्धुमिति ? व्यपदेशिवद्भावात् (परि० ३०)। अथवा धातूपदेशे यो दादिरित्येवं विज्ञायते। तथा च दामलिहमिच्छति दामलिह्यति, दामलिह्यतेः क्विप् प्रत्ययो दामलिडित्यत्रापि न भवति॥

वा द्रुहमुहष्णुहष्णिहाम् ॥ ३३ ॥

द्रुह मुह ष्णुह ष्णिह इत्येतेषां धातूनां हकारस्य वा घकारादेशो भवति झलि परतः, पदान्ते च। द्रुह—द्रोग्धा, द्रोढा। मित्रध्रुक्, मित्रध्रुट्। मुह—उन्मोग्धा, उन्मोढा। उन्मुक्,

---

१ - ' स्कोरिति.....वर्वर्त्ति' इति मूले न स्यात् न्यासे स्वातन्त्र्येण व्याख्यातत्वात्।

२ - ' अन्ते.....तक्षकः ' इति मूले न स्यात् न्यासे स्वातन्त्र्येण व्याख्यानात्।

३ - ' तुराषाट् ' इति बाल०।

४ - ' दिव्यवाट् ' इति है०।

उन्मुट्। ष्णुह—उत्स्नोग्धा, उत्स्नोढा। उत्स्नुक्, उत्स्नुट्। ष्णिह—स्नेग्धा, स्नेढा। स्निक्, स्निट्। द्रुहेर्दादित्वाद् घत्वं नित्यं प्राप्तम्, इतरेषामप्राप्तमेव घत्वं विकल्प्यते॥

नहो धः॥ ३४ ॥

नहो हकारस्य धकारादेशो भवति झलि परे, पदान्ते च। नद्धम्। नद्धुम्। नद्धव्यम्। उपानत्। परीणत्॥

आहस्थः॥ ३५ ॥

आहो हकारस्य थकारादेशो भवति झलि परतः। इदमात्थ। किमात्थ। आदेशान्तरकरणं 'झषस्तथोर्धोऽधः' (८.२.४०) इत्यस्य निवृत्त्यर्थम्। झलीत्येव—आह, आहतुः, आहुः ॥ हग्रहोर्भश्छन्दसि हस्येति वक्तव्यम्॥ गर्दभेन संभरति (तै० सं० ५.१.५.५)। ग्रभीता। जभ्रिरे। उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन् (तै० सं० १.१.१३.१)॥

व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः॥ ३६ ॥

व्रश्च भ्रस्ज सृज मृज यज राज भ्राज इत्येतेषाम्, छकारान्तानाम्, शकारान्तानां च षकार आदेशो भवति झलि परतः, पदान्ते च। व्रश्च—व्रष्टा। व्रष्टुम्। व्रष्टव्यम्। मूलवृट्। भ्रस्ज—भ्रष्टा। भ्रष्टुम्। भ्रष्टव्यम्। धानाभृट्। सृज—स्रष्टा। स्रष्टुम्। स्रष्टव्यम्। रज्जुसृट्। मृज—मार्ष्टा। मार्ष्टुम्। मार्ष्टव्यम्। कंसपरिमृट्। यज—यष्टा। यष्टुम्। यष्टव्यम्। उपयट्। राज—सम्राट्। स्वराट्। विराट्। भ्राज—विभ्राट्। राजभ्राजोः पदान्तार्थं ग्रहणम्, झलादिराभ्यामिटा पर्यवपद्यते। केचित् तु राष्टिर्भ्राष्टिरिति क्तिन्नन्तम् इच्छन्ति। छकारान्तानाम्—प्रच्छ—प्रष्टा। प्रष्टुम्। प्रष्टव्यम्। शब्दप्राट्। 'च्छ्वोः शूडनुनासिके च' (६.४.१९) इत्यत्र क्ङितीत्यनुवर्तत इति छग्रहणमिह क्रियते। शकारान्तानाम्—लिश्—लेष्टा। लेष्टुम्। लेष्टव्यम्। लिट्। विश्—वेष्टा। वेष्टुम्। वेष्टव्यम्। विट्॥

एकाचो बशो भष् झषन्तस्य स्ध्वोः॥ ३७ ॥

धातोरवयवो य एकाच् झषन्तः तदवयवस्य बशः स्थाने भष् आदेशो भवति झलि सकारे ध्वशब्दे च परतः, पदान्ते च। अत्र चत्वारो बशः स्थानिनो भषादेशाश्चत्वार एव, तत्र संख्यातानुदेशे प्राप्ते डकारस्य स्थानिनोऽभावात् ढकारादेशो न भवति ? आन्तर्यतो व्यवस्था विज्ञास्यते। बुध—भोत्स्यते। अभुद्ध्वम्। अर्थभुत्। गुह—निघोक्ष्यते। न्यघूढ्वम्।

---

१ - ' क्विन्नन्तम् ' इत्यपपाठो मुद्रितेषु।

२ - ' अत्र.....विज्ञास्यते ' इति पाठोऽन्ते न्यस्तो बाल०। न्यासे न व्याख्यातः।

३ - ' भोत्स्यन्ते ' इति मुद्रितेषु।

पर्णघुट्। दुह—धोक्ष्यते। अधुग्ध्वम्। गोधुक्। अजघाः—गृधेर्यङ्लुगन्तस्य लङि सिपि लघूपधगुणे कृते सिपो हल्ङ्यादिलोपे च धातोरवयवस्यैकाचो बशः स्थाने भष्भावः, ततो धकारस्य जश्त्वम्, 'दश्च' (८.२.७५) इति रुत्वम्, 'रो रि' (८.३.१४) इति पूर्वरेफस्य लोपः, 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' (६.३.१११) इति दीर्घत्वम्। गर्दभयतेरप्रत्ययः—गर्द्भप्। एकाच इति किम् ? दामलिहमिच्छति दामलिह्यति, दामलिह्यतेरप्रत्ययो दामलिट्। असति ह्येकाज्ग्रहणे धातोरित्येतद् बशो विशेषणं स्यात्। बश इति किम् ? क्रुध — क्रोत्स्यति। झषन्तस्येति किम् ? दास्यति। स्ध्वोरिति किम् ? बोद्धा। बोद्धुम्। बोद्धव्यम्। धकारस्य वकारोपसृष्टस्य ग्रहणं किम् ? दादद्धि। 'दध धारणे' (भ्वा० ७) इत्येतस्य यङ्लुकि लोटि 'हुझल्भ्यो हेर्धिः' (६.४.१०१) इति धिभावे सत्येतद् भवति॥

दधस्तथोश्च॥ ३८ ॥

दध इति दधातिः कृतद्विर्वचनो निर्दिश्यते। तस्य झषन्तस्य बशः स्थाने भष् आदेशो भवति तकारथकारयोः परतः, चकारात् स्ध्वोश्च परतः। धत्तः। धत्थः। धत्से। धत्स्व। धद्ध्वम्। वचनसामर्थ्यादातो लोपस्य स्थानिवद्भावो न भवति, अभ्यासजश्त्वस्य चासिद्धत्वम्। तथोरिति किम् ? आनन्तर्यात् स्ध्वोरेव विज्ञायेत। चकारस्तयोरनुवृत्त्यर्थः। झषन्तस्येत्येव—दधाति॥

झलां जशोऽन्ते॥ ३९ ॥

झलां जश आदेशा भवन्ति पदस्यान्ते वर्तमानानाम्। वागत्र। श्वलिडत्र। अग्निचिदत्र। त्रिष्टुबत्र। अन्तग्रहणं झलीत्येतस्य निवृत्त्यर्थम्। वस्ता। वस्तव्यम्॥

झषस्तथोर्धोऽधः॥ ४० ॥

झष उत्तरयोस्तकारथकारयोः स्थाने धकार आदेशो भवति, दधातिं वर्जयित्वा। लब्धा। लब्धुम्। लब्धव्यम्। अलब्ध। अलब्धाः। दुह—दोग्धा। दोग्धुम्। दोग्धव्यम्। अदुग्ध। अदुग्धाः। लिह—लेढा। लेढुम्। लेढव्यम्। अलीढ। अलीढाः। बुध—बोद्धा। बोद्धुम्। बोद्धव्यम्। अबुद्ध। अबुद्धाः। अध इति किम् ? धत्तः। धत्थः॥

षढोः कः सि॥ ४१ ॥

षकारढकारयोः ककारादेशो भवति सकारे परतः। षकारस्य—पिष्—पेक्ष्यति। अपेक्ष्यत्। पिपिक्षति। ढकारस्य—लिह—लेक्ष्यति। अलेक्ष्यत्। लिलिक्षति। सीति किम्? पिनष्टि। लेढि॥

---

१ - ' झलन्तस्य ' इत्यपपाठो मुद्रितेषु।

रदाभ्यां निष्ठातो नः पूर्वस्य च दः॥ ४२ ॥

रेफदकाराभ्यामुत्तरस्य निष्ठातकारस्य नकार आदेशो भवति, पूर्वस्य च दकारस्य। रेफात् तावत्—आस्तीर्णम्। विस्तीर्णम्। विशीर्णम्। निगीर्णम्। अवगूर्णम्। दकारात्—भिन्नः। भिन्नवान्। छिन्नः। छिन्नवान्। रदाभ्यामिति किम् ? कृतः। कृतवान्। र इत्यत्र रश्रुतिसामान्यं नोपादीयते। किं तर्हि ? व्यञ्जनमात्रम्। रेफसामान्यनिर्देशेऽपि सति रेफात् परा याञ्भक्तिः, तद्व्यवधानाद् नत्वं न भवति। निष्ठेति किम् ? कर्ता। हर्ता। त इति किम् ? चरितम्। मुदितम्। पूर्वस्येति किम् ? परस्य मा भूत्—भिन्नवद्भ्याम्, भिन्नवद्भिः। इह कृतस्यापत्यं कार्तिरिति वृद्धेर्बहिरङ्गलक्षणाया असिद्धत्वाद् (परि० ५०) नत्वे कर्तव्ये रेफस्यासिद्धत्वम्॥

संयोगादेरातो धातोर्यण्वतः॥ ४३ ॥

संयोगादिर्यो धातुराकारान्तो यण्वान्, तस्मादुत्तरस्य निष्ठातकारस्य नकारादेशो भवति। प्रद्राणः। प्रद्राणवान्। म्लानः। म्लानवान्। संयोगादेरिति किम् ? यातः। यातवान्। आत इति किम् ? च्युतः। च्युतवान्। प्लुतः। प्लुतवान्। धातोरिति किम्? निर्यातः। निर्वातः। यण्वत इति किम् ? स्नातः। स्नातवान्॥

ल्वादिभ्यः॥ ४४ ॥

'लूञ् छेदने' (क्र्या० १२) इत्येतत्प्रभृति 'व्री वरणे' (क्र्या० ३७) इति यावत् वृत्करणेन समापिता ल्वादयो गृह्यन्ते। तेभ्य उत्तरस्य निष्ठातकारस्य नकारादेशो भवति। लूनः। लूनवान्। धूनः। धूनवान्। जीनः। जीनवान् ॥ [a]कारल्वादिभ्यः क्तिन्निष्ठावद् भवतीति वक्तव्यम्॥ कीर्णिः। गीर्णिः। शीर्णिः। लूनिः। धूनिः ॥ दुग्वोर्दीर्घश्चेति वक्तव्यम्॥ दु—आदूनः। गु—विगूनः ॥ पूञो विनाश इति वक्तव्यम्॥ पूना यवाः। विनष्टा इत्यर्थः। विनाश इति किम् ? पूतं धान्यम् ॥ सिनोतेर्ग्रासकर्मकर्तृकस्येति वक्तव्यम्॥ सिनो ग्रासः स्वयमेव। ग्रासकर्मकर्तृकस्येति किम् ? सिता पाशेन सूकरी। ग्रासोऽपि यदा कर्मैव भवति न कर्मकर्ता, तदा न भवति—सितो ग्रासो देवदत्तेनेति॥

---

१ - 'रेफान्तात्' इति मुद्रितेषु ।

२ - 'वृञ्' इत्यपपाठो है०। 'वृ' इत्यप्यपपाठो बाल०। साम्प्रतिकधातुपाठे 'ष्ली गतौ, वृत्, व्री वरणे' इत्यानुपूर्वी। एकविंशतिल्ँल्वादीन् गणयामास दीक्षितः।

३ - 'ऋकारल्वादिभ्यः' इति ह्रस्वर्कारयुक्तोऽपपाठो मुद्रितेषु।

४ - 'पूनिः' इति मुद्रितेषु। हरदत्तः पवतेः पूनिं साधयति ? नागेशोऽपि पुनातेः ?

ओदितश्च॥ ४५ ॥

ओकारेतो धातोरुत्तरस्य निष्ठातकारस्य नकारादेशो भवति। ओलस्जी—लग्नः। लग्नवान्। ओविजी—उद्विग्नः। उद्विग्नवान्। 'ओप्यायी वृद्धौ' (भ्वा० ३२८) — आपीनः। आपीनवान्। 'स्वादय ओदितः' (दिवा० ३१)। षूङ्—सूनः। सूनवान्। दूङ्—दूनः। दूनवान्। दीङ्—दीनः। दीनवान्। डीङ्—डीनः। डीनवान्। धीङ्—धीनः। धीनवान्। मीङ्—मीनः। मीनवान्। रीङ्—रीणः। रीणवान्। लीङ्—लीनः। लीनवान्। व्रीङ्—व्रीणः। व्रीणवान्॥

क्षियो दीर्घात्॥ ४६ ॥

क्षियो धातोर्दीर्घादुत्तरस्य निष्ठातकारस्य नकारादेशो भवति। क्षीणाः क्लेशाः। क्षीणो जाल्मः। क्षीणस्तपस्वी। 'क्षियः', 'निष्ठायामण्यदर्थे', 'वाक्रोशदैन्ययोः' (६.४.५९, ६०, ६१) इति दीर्घत्वं भवति। दीर्घादिति किम् ? अक्षि॑तमसि॒ मा मे॑क्षेष्ठाः (तै० सं० १.६.५.१)। अक्षितमिति क्तप्रत्ययो भावे, भावश्च ण्यदर्थ इति दीर्घाभावः। ह्रस्वस्यापि हि धात्वनुकरणस्य दृष्ट इयङा निर्देशः—'क्षियः', 'निष्ठायामण्यदर्थे' (६.४.५९, ६०) इत्यत्र दीर्घग्रहणं क्रियते। 'विपराभ्यां जेः' (१.३.१९) इत्येवमादौ तु धातुत्वमनुकार्यगतं सदप्यविवक्षितत्वाद् जिरूपसामान्यानुकरणं द्रष्टव्यम्॥

श्योऽस्पर्शे॥ ४७ ॥

श्यायतेरुत्तरस्य निष्ठातकारस्यास्पर्शे नकार आदेशो भवति। शीनं घृतम्। शीनं मेदः। शीना वसा। अस्पर्श इति किम् ? शीतं वर्तते। शीतो वायुः। शीतमुदकमित्यत्र गुणभूतोऽपि स्पर्शो नत्वप्रतिषेधस्य संप्रसारणस्य च निमित्तं भवति। गुणे च स्पर्शे प्रतिषेधोऽयं न रोगे, तेन प्रतिशीन इत्यत्र नत्वं भवत्येव॥

अञ्चोऽनपादाने॥ ४८ ॥

अञ्चतेरुत्तरस्य निष्ठातकारस्य नकारादेशो भवति, न चेदपादानं तत्र भवति। समक्नौ शकुनेः पादौ। तस्मात् पशवो न्यक्नाः (काठ० सं० २९.९)। अनपादान इति किम् ? उदक्तमुदकं कूपात्। व्यक्तमित्येतदञ्जे रूपम्॥

---

१ - यथान्यासपदमञ्जरि शोधितः पाठः। ' इष्टः ' इति बाल०। ' इह ' इति तारा०, है०।

२ - ' उत्तरपदस्य ' इत्यपपाठो मुद्रितेषु।

दिवोऽविजिगीषायाम्॥ ४९ ॥

दिव उत्तरस्य निष्ठातकारस्य नकारादेशो भवति अविजिगीषायामर्थे। आद्यूनः। परिद्यूनः। अविजिगीषायामिति किम् ? द्यूतं वर्तते। विजिगीषया हि तत्राक्षपातनादि क्रियते॥

निर्वाणोऽवाते॥ ५० ॥

निर्वाण इति निस्पूर्वाद् वातेरुत्तरस्य निष्ठातकारस्य नकारो निपात्यते, न चेद् वाताधिकरणो वात्यर्थो भवति। निर्वाणोऽग्निः। निर्वाणः प्रदीपः। निर्वाणो भिक्षुः। अवात इति किम्? निर्वातो वातः। निर्वातं वातेन। निर्वाणः प्रदीपो वातेनेत्यत्र तु प्रदीपाधिकरणो वात्यर्थः, वातस्तु तस्य करणमिति भवत्येव नत्वम्॥

शुषः कः॥ ५१ ॥

शुषेर्धातोरुत्तरस्य निष्ठातकारस्य ककारादेशो भवति। शुष्कः। शुष्कवान्॥

पचो वः॥ ५२ ॥

पचेर्धातोरुत्तरस्य निष्ठातकारस्य वकारादेशो भवति। पक्वः। पक्ववान्॥

क्षायो मः॥ ५३ ॥

क्षैधातोरुत्तरस्य निष्ठातकारस्य मकारादेशो भवति। क्षामः। क्षामवान्॥

प्रस्त्योऽन्यतरस्याम्॥ ५४ ॥

प्रपूर्वात् स्त्यायतेरुत्तरस्य निष्ठातकारस्यान्यतरस्यां मकारादेशो भवति। प्रस्तीमः। प्रस्तीमवान्। प्रस्तीतः। प्रस्तीतवान्। यदा मत्वं नास्ति तदा 'संयोगादेरातो धातोर्यण्वतः' (८.२.४३) इत्यस्य पूर्वत्रासिद्धत्वात् संप्रसारणं प्रथमं क्रियते। तत्र कृते निमित्तव्याघाताद् नत्वं न भवति॥

अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः॥ ५५ ॥

फुल्ल क्षीब कृश उल्लाघ इत्येते निपात्यन्ते, न चेदुपसर्गादुत्तरा भवन्ति। फुल्ल इति 'ञिफला विशरणे' (भ्वा० ३४६) इत्येतस्माद् धातोरुत्तरस्य निष्ठातकारस्य लकारो निपात्यते। उत्वमिडभावश्च सिद्ध एव। क्तवत्वन्तस्याप्येतद् लत्वमिष्यते—फुल्लः, फुल्लवानिति। क्षीबकृशोल्लाघा इति क्षीबिकृशिभ्यामुत्पूर्वात् च लाघेः क्तप्रत्ययस्य तलोप

इडभावश्च निपात्यते, कृते वेटि इच्छब्दलोपः। क्षीबः। कृशः। उल्लाघः। अनुपसर्गादिति किम् ? प्रफुल्लाः सुमनसः। प्रक्षीबितः। प्रकृशितः। प्रोल्लाघितः। लाघेरुदोऽन्य उपसर्गः प्रतिषिध्यते ॥ उत्फुल्लसंफुल्लयोरिति वक्तव्यम्॥ उत्फुल्लः। संफुल्लः। परिकृश इत्यत्र यः परिशब्दः स क्रियान्तरयोगात् कृशिं प्रत्यनुपसर्ग एव—परिगतः कृशः परिकृश इति॥

नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्॥ ५६ ॥

नुद विद उन्द त्रा घ्रा ह्री इत्येतेभ्य उत्तरस्य निष्ठातकारस्य नकार आदेशो भवत्यन्यतरस्याम्। नुद—नुन्नः, नुत्तः। विद—विन्नः, वित्तः। उन्द—समुन्नः, समुत्तः। त्रा—त्राणः, त्रातः। घ्रा—घ्राणः, घ्रातः। ह्री—ह्रीणः, ह्रीतः। ह्री इत्येतस्मादप्राप्तं नत्वम्, इतरेषां नित्यं प्राप्तं विकल्प्यते। 'विद विचारणे' (रुधा० १३) इत्यस्य विदेरिह ग्रहणमिष्यते। एवं ह्युक्तम्—

वेत्तेस्तु विदितो निष्ठा विद्यतेर्विन्न इष्यते।
विन्तेर्विन्नश्च वित्तश्च भोगवित्तश्च विन्दतेः॥ इति॥

न ध्याख्यापॄमूर्च्छिमदाम्॥ ५७ ॥

ध्या ख्या पॄ मूर्च्छि मद इत्येतेषां निष्ठातकारस्य नकारादेशो न भवति। ध्यातः। ध्यातवान्। ख्यातः। ख्यातवान्। पूर्तः। पूर्तवान्। मूर्तः। मूर्तवान्। मत्तः। मत्तवान्। 'रदाभ्यां०' (८.२.४२), 'संयोगादेः०' (८.२.४३) इति च प्राप्तः प्रतिषिध्यते॥

वित्तो भोगप्रत्यययोः॥ ५८ ॥

वित्त इति विदेर्लाभार्थात् (तुदा० १४१) उत्तरस्य क्तस्य नत्वाभावो निपात्यते भोगे प्रत्यये चाभिधेये। वित्तमस्य बहु। धनमस्य बह्वित्यर्थः। धनं हि भुज्यत इति भोगोऽभिधीयते। प्रत्यये—वित्तोऽयं मनुष्यः। प्रतीत इत्यर्थः। प्रतीयत इति प्रत्ययः। भोगप्रत्यययोरिति किम् ? विन्नः॥

भित्तं शकलम्॥ ५९ ॥

भित्तमिति निपात्यते शकलं चेत् तद् भवति। भित्तं तिष्ठति। भित्तं प्रपतति। शकलपर्यायोऽयम्। अत्र भिदिक्रिया शब्दव्युत्पत्तेरेव निमित्तम्। भिदिक्रियाविवक्षायां हि शकलविषये भिन्नं भित्तमित्येव भवति॥

---

१ - 'वित्तो भोगेषु' इति महाभाष्ये।

ऋणमाधमर्ण्ये॥ ६० ॥

ऋणमिति ऋ इत्येतस्माद् धातोरुत्तरस्य निष्ठातकारस्य नकारो निपात्यत आधमर्ण्य-विषये। अधम ऋणेऽधमर्णः। एतस्मादेव निपातनात् सप्तम्यन्तेनोत्तरपदेन समासः, तद्भाव आधमर्ण्यम्। यद्येवम्, उत्तमर्ण इति न सिध्यति ? नैष दोषः। कालान्तरदेय-विनिमयोपलक्षणार्थं चेदमुपात्तम्। तेनोत्तमर्ण इत्यपि हि भवति। ऋणं ददाति। ऋणं धारयति। आधमर्ण्य इति किम् ? ऋतं वक्ष्यामि नानृतम्॥

नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानि छन्दसि॥ ६१ ॥

नसत्त निषत्त अनुत्त प्रतूर्त सूर्त गूर्त इत्येतानि छन्दसि विषये निपात्यन्ते। नसत्त निषत्तेति सदेर्नञ्पूर्वाद् निपूर्वात् च नत्वाभावो निपात्यते। नसत्तमञ्जसा। नसन्नमिति भाषायाम्। निषत्तः (ऋ० १.५८.३)। निषण्ण इति भाषायाम्। अनुत्तमित्युन्देर्नञ्पूर्वस्य निपातनम्। अनुत्तꣳ॒मा तेमघव॑न्। (ऋ० १.१६५.६)। अनुन्नमिति भाषायाम्। प्रतूर्तमिति त्वरतेः, तुर्वी इत्येतस्य वा निपातनम्। प्रतूर्तं वाजि॒न्। (तै० सं० ४.१.२.१)। प्रतूर्णमिति भाषायाम्। सूर्तमिति सृ इत्येतस्योत्वं निपात्यते। सूर्ता गावः। सृता गाव इति भाषायाम्। गूर्तमिति गूरी इत्येतस्य नत्वाभावो निपात्यते। गूर्ता अ॒मृत॑स्य। (मा० सं० ६.३४)। गूर्णमिति भाषायाम्॥

क्विन्प्रत्ययस्य कुः॥ ६२ ॥

पदस्येति वर्तते। क्विन्प्रत्ययस्य सर्वत्र पदान्ते कुत्वमिष्यते। क्विन् प्रत्ययो यस्माद् धातोः स क्विन्प्रत्ययः, तस्य पदस्यालोऽन्त्यस्य कवर्गादेशो भवति। 'स्पृशोऽनुदके क्विन्' (३.२.५८)—घृतस्पृक्। हलस्पृक्। मन्त्रस्पृक्। क्विनः कुरिति वक्तव्ये प्रत्ययग्रहणं कृतं बहुव्रीहिविज्ञानार्थम्, क्विन् प्रत्ययो यस्माद् विहितस्तस्मादन्यस्मिन्नपि प्रत्यये कुत्वं यथा स्यात्। मा नो अस्राक्। मा नो अद्राक्। सृजिदृशिभ्यां हि क्विन् विहितः, तयोर्लुङि कुत्वमेतत्। माङ्योगेऽपि छान्दसत्वादडागमः। ईट् च न भवति 'बहुलं छन्दसि' (७.३.९७) इति। तथा दृग्भ्याम्, दृग्भिरिति क्विबन्तस्यापि दृशेः कुत्वं भवति। एवं च सति रज्जुसृड्भ्यामित्यत्रापि कुत्वं प्राप्नोति। अथ तु नेष्यते, प्रतिविधानं कर्तव्यमिति॥

नशेर्वा॥ ६३ ॥

पदस्येति वर्तते। नशेः पदस्य वा कवर्गादेशो भवति। सा वै जीवनगाहुतिः। सा॑ वै॒ जी॒वन॒ऽडा॑हुतिः (मै० सं० १. ४. १३)। नशेरयं संपदादित्वाद् भावे क्विप्। जीवस्य नाशो जीवनक् , जीवनट्। षत्वे प्राप्ते कुत्वविकल्पः॥

मो नो धातोः॥ ६४ ॥

मकारान्तस्य धातोः पदस्य नकारादेशो भवति। प्रशान्। प्रतान्। प्रदान्। शमितमिदमादीनां क्विप्। 'अनुनासिकस्य क्विझलोः क्ङिति' (६.४.१५) इति दीर्घत्वम्। नत्वस्यासिद्धत्वाद् नलोपो न भवति। म इति किम् ? भित्। छित्। धातोरिति किम् ? इदम्। किम्। पदस्येत्येव—प्रतामौ। प्रतामः॥

म्वोश्च॥ ६५ ॥

मकारवकारयोश्च परतः मकारान्तस्य धातोर्नकारादेशो भवति। अगन्म॑ तमं सस्पा॑रम् (मा० सं० १२.७३)। अगन्व। गमेर्लङि 'बहुलं छन्दसि' (२.४.७३) इति शपो लुक्। जगन्वान्। 'विभाषा गमहनविदविशाम्' (७.२.६८) इति क्वसाविडागमस्याभावः। अपदान्तार्थ आरम्भः॥

ससजुषो रुः॥ ६६ ॥

सकारान्तस्य पदस्य सजुष् इत्येतस्य च रुर्भवति। सकारान्तस्य—अग्निरत्र। वायुरत्र। सजुषः—स॑जूर्ऋ॑तुभिः (मै० सं० २.८.१)। स॑जूर्दे॑वेभिः (ऋ० ७.३४.१५)। जुषेः क्विपि सपूर्वस्य रूपमेतत्॥

अवयाःश्वेतवाःपुरोडाश्च॥ ६७ ॥

अवयाः श्वेतवाः पुरोडाः इत्येते निपात्यन्ते। अवपूर्वस्य यजेः, श्वेतपूर्वस्य वहेः, पुरस्पूर्वस्य दाशतेः 'मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्' , 'अवे यजः' (३.२.७१, ७२) इति ण्विनि कृते, 'श्वेतवहादीनां डस्पदस्य' (३.२.७१ वा०) इति डस्प्रत्यये निपातनान्येतानि। किमर्थं तर्हि निपातनं यावता पूर्वेणैव रुः सिद्धः, दीर्घत्वमपि 'अत्वसन्तस्य चाधातोः' (६.४.१४) इति ? संबुद्धौ दीर्घार्थमेते निपात्यन्ते। 'अत्वसन्तस्य चाधातोः' (६.४.१४) इत्यत्र ह्यसंबुद्धाविति वर्तते। हे अव॑याः (मा० सं० ३.४६)। हे श्वेतवाः। हे पु॒रोडाः (ऋ० ३.२८.२)। चकारोऽनुक्तसमुच्चयार्थः। हे उक्थ॑शाः (तै० सं० ३.२.६.१)॥

अहन्॥ ६८ ॥

अहन्नित्येतस्य पदस्य रुर्भवति। अहोभ्याम्। अहोभिः। नलोपमकृत्वा निर्देशो ज्ञापकः—नलोपाभावो यथा स्यादिति। दीर्घाहा निदाघः। हे दीर्घाहोऽत्रेति। अहन्नित्यत्र

---

१ - ' शमितमि.....दीर्घत्वम् ' इति पाठो न स्याद् यथान्यासम्।

तु लाक्षणिकत्वात् (परि० १०५) अहन्शब्दस्य रुर्न भवति ॥ अह्नो रुविधौ रूपरात्रि-रथन्तरेषूपसंख्यानं कर्तव्यम्॥ अहोरूपम्। अहोरात्रः। अहोरथन्तरम्। 'रोऽसुपि' (८. २.६९) इत्यस्यापवादो रुत्वमुपसंख्यायते। अपर आह—सामान्येन रेफादौ रुत्वं भवति—अहोरम्यम्, अहोरत्नानीति॥

रोऽसुपि॥ ६९ ॥

अहन्नित्येतस्य रेफादेशो भवत्यसुपि परतः। अहर्ददाति। अहर्भुङ्क्ते। असुपीति किम् ? अहोभ्याम्। अहोभिः। ननु चात्रापि प्रत्ययलक्षणेन (१.१.६२) सुबस्ति—अहर्ददाति, अहर्भुङ्क्त इति ? नैतदस्ति। उक्तमेतत्—'अह्नो रविधौ लुमता लुप्ते प्रत्ययलक्षणं न भवति' (महाभाष्य १.१६६) इति नायमहःशब्दः सुप्परो भवति। यत्र तु लोपशब्देन लुप्यते तत्र प्रत्ययलक्षणं भवत्येव, यथा हे दीर्घाहोऽत्र, दीर्घाहा निदाघ इति। अत्र हि 'हल्ङ्याब्भ्यः०' (६.१.६८) इति लोपेन प्रत्ययस्य निवृत्तिः॥

अम्नरूधरवरित्युभयथा छन्दसि॥ ७० ॥

अम्नस् ऊधस् अवस् इत्येतेषां छन्दसि विषय उभयथा भवति, रुर्वा रेफो वा। अम्नस्—अ१म्नं ए१व (मै० सं० १.६.१०)। अम्नरेव। ऊधस्—ऊध एव (काठ० सं० ७.५)। ऊध१र् (ऋ० १०.१००.११) एव। अवस्—अ१वः (शौ० सं० २०.२५.२) एव। अवरेव। यदा रुत्वं तदा 'भोभगोअघोअपूर्वस्य योऽशि' (८.३.१७) इति यकारः ॥ छन्दसि भाषायां च विभाषा प्रचेतसो राजन्युपसंख्यानं कर्तव्यम्॥ प्रचेता राज१न् (ऋ० १.२४.१४), प्रचेतो राज१न् (तै० सं० १.५.११.३) ॥ अहरादीनां पत्यादिषूपसंख्यानं कर्तव्यम्॥ अहर्पतिः, अहःपतिः। गीर्पतिः, गीःपतिः। धूर्पतिः, धूःपतिः। विसर्जनीय-बाधनार्थमत्र पक्षे रेफस्यैव रेफो विधीयते॥

भुवश्च महाव्याहृतेः॥ ७१ ॥

भुवस् इत्येतस्य महाव्याहृतेश्छन्दसि विषय उभयथा भवति, रुर्वा रेफो वा। भुव इत्यन्तरिक्षम्। भुवरित्यन्तरिक्षम्। महाव्याहृतेरिति किम् ? भुवो विश्वेषु सवनेषु य१ज्ञियः (ऋ० १०.५०.४)। भुवरित्येतदव्ययमन्तरिक्षवाचि महाव्याहृतिः॥

वसुस्रंसुध्वंस्वनडुहां दः॥ ७२ ॥

---

१ - 'दीर्घाह' (बाल०), 'दीर्घाहो' (है०) इत्यपपाठौ।

२ - अ१ह१र्भ्यः (मा० सं० ६.२०)।

'ससजुषोः०' (८.२.६६) इत्यतः स इति वर्तते। तेन संभवाद् व्यभिचारात् च वसुरेव विशेष्यते, न स्रंसुध्वंसू व्यभिचाराभावाद् , असंभवात् च नानडुह्शब्दः। वस्वन्तस्य पदस्य सकारान्तस्य, स्रंसु, ध्वंसु, अनडुह् इत्येतेषां च दकारादेशो भवति। वसु—विद्वद्भ्याम्, विद्वद्भिः। पपिवद्भ्याम्, पपिवद्भिः। स्रंसु—उखास्रद्भ्याम्, उखास्रद्भिः। ध्वंसु—पर्णध्वद्भ्याम्, पर्णध्वद्भिः। अनडुह्—अनडुद्भ्याम्, अनडुद्भिः। स इत्येव—विद्वान्। पपिवान्। नकारस्य न भवति। रुत्वे नाप्राप्त इदमारभ्यत इति तद् बाध्यते। संयोगान्तलोपस्तु नैवमिति तेनैतदेव दत्वं बाध्यते। अनडुहोऽपि ढत्वमनेन बाध्यते। नुमस्तु विधानसामर्थ्याद् न भवति—अनड्वान्। हे अनड्वन्निति। पदस्येत्येव—विद्वांसौ, विद्वांसः॥

तिप्यनस्तेः॥ ७३ ॥

तिपि परतः सकारान्तस्य पदस्यानस्तेर्दकार आदेशो भवति। अचकाद् भवान्। अन्वशाद् भवान्। तिपीति किम् ? चकास्तेः क्विप् , चकाः। अनस्तेरिति किम् ? आप एवेदं सलिलं सर्वमाः। आ इत्यस्तेर्लङि तिपि 'बहुलं छन्दसि' (७.३.९७) इतीड् न कृतः॥

सिपि धातो रुर्वा॥ ७४ ॥

सिपि परतः सकारान्तस्य पदस्य धातो रुरित्ययमादेशो भवति, दकारो वा। अचकास्त्वम्, अचकात् त्वम्। अन्वशास्त्वम्, अन्वशात् त्वम्। धातुग्रहणं चोत्तरार्थं रुग्रहणं च॥

दश्च ॥ ७५ ॥

दकारान्तस्य धातोः पदस्य सिपि परतो रुर्भवति, दकारो वा। अभिनस्त्वम्, अभिनत् त्वम्। अच्छिनस्त्वम्, अच्छिनत् त्वम्॥

र्वोरुपधाया दीर्घ इकः ॥ ७६ ॥

रेफवकारान्तस्य धातोः पदस्योपधाया इको दीर्घो भवति। गीः। धूः। पूः। आशीः। वकारग्रहणमुत्तरार्थम्। उपधाग्रहणं किम् ? अबिभर्भवान्। अभ्यासेकारस्य मा भूत्। इक इति किम् ? अत्रैव प्रत्युदाहरणे भशब्दाकारस्य मा भूत्। धातोरित्येव—अग्निः। वायुः। पदस्येत्येव—गिरौ, गिरः॥

---

१ - अग्रकेऽ॒तं स॑लि॒लं सर्व॑मा इ॒दम् (ऋ० १०.१२९.३)।

हलि च ॥ ७७ ॥

हलि च परतो रेफवकारान्तस्य धातोरुपधाया इको दीर्घो भवति। आस्तीर्णम्। विस्तीर्णम्। विशीर्णम्। अवगूर्णम्। वकारान्तस्य—दीव्यति। सीव्यति। धातोरित्येव—दिवमिच्छति दिव्यति। चतुर इच्छति चतुर्यति। इक इत्येव—स्मर्यते। भव्यम्। अपदान्तार्थोऽयमारम्भः॥

उपधायां च ॥ ७८ ॥

हलीत्यनुवर्तते। धातोरुपधाभूतौ यौ रेफवकारौ हल्परौ तयोरुपधाया इको दीर्घो भवति। हुर्छा—हूर्छिता। मुर्छा—मूर्छिता। उर्वी—ऊर्विता। धुर्वी—धूर्विता। हलीत्येव—चिरि जिरि—चिरिणोति। जिरिणोति। इह कस्माद् न भवति—'रि गतौ' (तुदा० ११४) रिर्यतुः, रिर्युः, वी गत्यादिषु (अदा० ४१) विव्यतुः, विव्युरिति ? यणादेशस्य स्थानिवत्त्वाद् असिद्धत्वात् च बहिरङ्गलक्षणत्वेन हल्परौ रेफवकारौ न भवतः। चतुर्यितेत्यत्रापि बहिरङ्गलक्षणत्वादतो लोपस्य (६.४.४८) धातोरुपधाभूतो रेफो न भवति। प्रतिदीव्नेत्यत्र तु 'हलि च' (८.२.७७) इति दीर्घत्वम्, दीर्घविधौ लोपाजादेशस्य स्थानिवद्भाव-प्रतिषेधात् (१.१.५८) 'असिद्धं बहिरङ्गमन्तरङ्गे' (परि० ५०) इत्येतत् तु नाश्रयितव्यम् (८.२.२ का०)। 'उणादयोऽव्युत्पन्नानि प्रातिपदिकानि' (परि० २२) इति जिव्रिः किर्योर्गिर्योरित्येवमादिषु दीर्घो न भवति॥

न भकुर्छुराम् ॥ ७९ ॥

रेफवकारान्तस्य भस्य कुर् छुर् इत्येतयोश्च दीर्घो न भवति। धुरं वहति धुर्यः। धुरि साधुर्धुर्यः। दिव्यम्। कुर्—कुर्यात्। छुर्—छुर्यात्। रेफवकाराभ्यां भविशेषणं किम् ? प्रतिदीव्ना। प्रतिदीव्ने॥

अदसोऽसेर्दादु दो मः ॥ ८० ॥

अदसोऽसकारान्तस्य वर्णस्य दात् परस्योवर्णादेशो भवति, दकारस्य च मकारः। अमुम्, अमू, अमून्। अमुना, अमूभ्याम्। 'भाव्यमानेनाप्युकारेण सवर्णानां ग्रहणमिष्यते' (परि० २०) इत्येकमात्रिकस्य मात्रिकः, द्विमात्रिकस्य द्विमात्रिक आदेशो भवति। असेरिति किम् ? अद इच्छति अदस्यति ॥ अदसोऽनोस्र इति वक्तव्यम्॥ ओकाररेफयोरपि प्रतिषेधो यथा स्यादिति। अदोऽत्र। अदः। तदर्थं केचित् सूत्रं वर्णयन्ति—अः सेर्यस्य सोऽयमसिः, यत्र सकारस्याकारः क्रियत इति। तेन त्यदाद्यत्वविधान एतद्, अन्यत्र न भवितव्यमेवेति। अद्र्यादेशे कथम् ?

अदसोऽद्रेः पृथङ् मुत्वं केचिदिच्छन्ति लत्ववत्।
केचिद् अन्त्यसदेशस्य नेत्येकेऽसेर्हि दृश्यते॥ इति॥

यैरसेरिति सकारस्य प्रतिषेधः क्रियते, 'अनन्त्यविकारेऽन्त्यसदेशस्य०' (परि० ६५) इति च परिभाषा नाश्रीयते, तेषामुभयोरपि मुत्वेन भवितव्यम्—अमुमुयङ्, अमुमुयञ्चौ, अमुमुयञ्च इति, यथा चलीक्लृप्यत इति लत्वम्। ये तु परिभाषामाश्रयन्ति, तेषामन्त्यसदेशस्यैव भवितव्यम्—अदमुयङ्, अदमुयञ्चौ, अदमुयञ्च इति। येषां तु त्यदाद्यत्वविषय एव मुत्वेन भवितव्यमिति दर्शनम्, तेषामत्र न भवितव्यम्—अदद्र्यङ्, अदद्र्यञ्चौ, अदद्र्यञ्च इति। दादिति किम् ? अलोऽन्त्यस्य मा भूत्—अमुया। अमुयोः॥

एत ईद् बहुवचने॥ ८१ ॥

अदसो दकारादुत्तरस्य एकारस्य ईकारादेशो भवति, दकारस्य च मकारः, बहुवचने बहूनामर्थानामुक्तौ। अमी। अमीभिः। अमीभ्यः। अमीषाम्। अमीषु। बहुवचन इत्यर्थनिर्देशोऽयम्, पारिभाषिकस्य हि बहुवचनस्य ग्रहणेऽमी इत्यत्र न स्यात्॥

वाक्यस्य टेः प्लुत उदात्तः॥ ८२ ॥

अधिकारोऽयम्। वाक्यस्य टेरिति, प्लुत इति च, उदात्त इति च, एतत्त्रयमप्यधिकृतं वेदितव्यमा पादपरिसमाप्तेः। यदित ऊर्ध्वमनुक्रमिष्यामो वाक्यस्य टेः प्लुत उदात्त इत्येवं तद् वेदितव्यम्। वक्ष्यति—'प्रत्यभिवादेऽशूद्रे' (८.२.८३)। अभिवादये देवदत्तोऽहं भोः, आयुष्मानेधि दे३वद३त्त३। पदाधिकारोऽनुवर्तत एव। वाक्यग्रहणमनन्त्यस्य पदस्य प्लुत-निवृत्त्यर्थम्। टिग्रहणं व्यञ्जनान्तस्यापि टेरचः प्लुतो यथा स्यात्—अ३ग्निचि३त् इति॥

प्रत्यभिवादेऽशूद्रे॥ ८३ ॥

प्रत्यभिवादो नाम यदभिवाद्यमानो गुरुराशिषं प्रयुङ्क्ते, तत्राशूद्रविषये यद् वाक्यं वर्तते तस्य टेः प्लुत उदात्तो भवति। अभिवादये देवदत्तोऽहं भोः, आयुष्मानेधि दे३वद३त्त३। अशूद्र इति किम् ? अभिवादये तुषजकोऽहं भोः, आयुष्मानेधि तुषजक ॥ स्त्रियामपि प्रतिषेधो वक्तव्यः॥ अभिवादये गार्ग्यहं भोः, आयुष्मती भव गार्गि। असूयकेऽपि केचित् प्रतिषेधमिच्छन्ति। अभिवादये स्थाल्यहं भोः, आयुष्मानेधि स्थालिन्। यावच्च तस्यासूयकत्वं न ज्ञायते, तावदेव प्रत्यभिवादवाक्यम्। तस्मिंस्त्वसूयकत्वेन निर्ज्ञाते प्रत्य-भिवाद एव नास्ति, कुतः प्लुतः ? तथा ह्युक्तम्—'असूयकस्त्वं जाल्म, न त्वं प्रत्यभिवादम्

---

१ - 'प्रत्यभिवादनम्' इत्यपपाठो मुद्रितेषु।

अर्हसि, भिद्यस्व वृषल स्थालिन्' (महाभाष्य ३.४१६) इति। अभिवादवाक्ये यत् संकीर्तितं नाम गोत्रं वा, तद् यत्र प्रत्यभिवादवाक्यान्ते प्रयुज्यते तत्र प्लुतिरिष्यते। इह न भवति—देवदत्त कुशल्यसि, देवदत्त आयुष्मानेधीति ॥ भोराजन्यविशां वेति वक्तव्यम्॥ भो अभिवादये देवदत्तोऽहम् , आयुष्मानेधि देवदत्त भो३:, आयुष्मानेधि देवदत्त भोः। राजन्य—अभिवादय इन्द्रवर्माहं भोः, आयुष्मानेधीन्द्र१व१र्म३न्, आयुष्मानेधीन्द्रवर्मन्। विश्—अभिवादय इन्द्रपालितोऽहं भोः, आयुष्मानेधीन्द्र१पालि१त३। आयुष्मानेधीन्द्रपालित॥

दूराद्धूते च॥ ८४ ॥

दूराद्धूते यद् वाक्यं वर्तते तस्य टेः प्लुतो भवति, स चोदात्तः। आह्वानं हूतम्, शब्देन संबोधनम्। आगच्छ भो माणवक देवद१त्त३। आगच्छ भो माणवक यज्ञद१त्त३। दूरं यद्यप्यपेक्षाभेदादनवस्थितम्, तथापि हूतापेक्षं यत् तदाश्रीयत इति यत्र प्राकृतात् प्रयत्नात् प्रयत्नविशेष आश्रीयमाणे शब्दः श्रूयते तद् दूरम्। हूतग्रहणं च सम्बोधनमात्रोपलक्षणार्थं द्रष्टव्यम्। तेन यत्राप्याह्वानं नास्ति, तत्रापि प्लुतिर्भवति—सक्तून् पिब देवद१त्त३, पलायस्व क्वेदद१त्त३ इति। अस्याश्च प्लुतेरेकश्रुत्या समावेश इष्यते। दूरादिति किम् ? आगच्छ भो माणवक देवदत्त। दूरादाह्वाने वाक्यस्यान्ते यत्र संबोधनपदं भवति, तत्रायं प्लुत इष्यते। तेनेह न भवति—देवदत्त आगच्छ॥

हैहेप्रयोगे हैहयोः॥ ८५ ॥

हैहेप्रयोगे दूराद्धूते यद् वाक्यं वर्तते तत्र हैहयोरेव प्लुतो भवति। है३ देवदत्त। हे३ देवदत्त। देवदत्त है ३। देवदत्त हे३। पुनर्हैहयोर्ग्रहणम् अनन्त्ययोरपि यथा स्यात्॥

गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्॥ ८६ ॥

'प्रत्यभिवादेऽशूद्रे' (८.२.८३) इत्येवमादिना यः प्लुतो विहितः, तस्यैवायं स्थानिविशेष उच्यते। ऋकारवर्जितस्य गुरोरनन्त्यस्य, अपिशब्दादन्त्यस्यापि टेरेकैकस्य संबोधने वर्तमानस्य प्लुतो भवति प्राचामाचार्याणां मतेन। दे३वक्त्त, दे१व१द३त्त, दे१व१द१त्त३। य३ज्ञक्त्त, य१ज्ञ१द३त्त, य१ज्ञ१द१त्त३। गुरोरिति किम् ? वकारात् परस्य मा भूत्। अनृत इति किम् ? कृष्णमि३त्र, कृष्णमि१त्र३। एकैकग्रहणं पर्यायार्थम्। प्राचामिति ग्रहणं विकल्पार्थम्—आयुष्मानेधि देवदत्त। तदनेन यदेतदुच्यते—'सर्व एव प्लुतः साहसमनिच्छता

---

१ - ' अभिवादनवाक्ये ' इति न्यासे , मुद्रितेषु च।

२ - ' दूरादाह्वाने.....आगच्छ ' इति पाठो न सार्वत्रिकः।

३ - ' दूराद्धूते ' इति नास्ति है०।

४ - ' अन्त्ययोरपि ' इत्यपपाठो है०।

विभाषा कर्तव्यः' (महाभाष्य ३.४२०) इति, तदुपपन्नं भवति॥

ओमभ्यादाने॥ ८७ ॥

अभ्यादानं प्रारम्भः, तत्र य ओम्शब्दः तस्य प्लुतो भवति। ओ३म् अ॒ग्निमीळे पुरोहि॑तम् (ऋ० १.१.१)। अभ्यादान इति किम् ? ओमित्येतदक्षरमुद्गीथमुपासीत (छा० उप० १.१.१)॥

ये यज्ञकर्मणि॥ ८८ ॥

ये इत्येतस्य यज्ञकर्मणि प्लुतो भवति। ये३ यजामहे। यज्ञकर्मणीति किम् ? ये यजा॑महा॒ इति॒ पञ्चा॑क्षरम् (तै० सं० १.६.११.१) इति स्वाध्यायकाले मा भूत्। ये यजामह इत्यत्रैवायं प्लुत इष्यते। इह हि न भवति — ये दे॑वासो दि॒व्येका॑दशा॒ स्थ (ऋ० १.१३६.११) इति॥

प्रणवष्टेः॥ ८९ ॥

यज्ञकर्मणीति वर्तते। यज्ञकर्मणि टेः प्रणव आदेशो भवति। क एष प्रणवो नाम? पादस्य वार्द्धर्चस्य वान्त्यमक्षरमुपसंगृह्य तदाद्यक्षरशेषस्य स्थाने त्रिमात्रमोकारमोङ्कारं वा विदधति, तं प्रणवमित्याचक्षते। अ॒पां रेतां॑सि जिन्वतो३म् (ऋ० ८.४४.१६)। दे॒वान् जि॑गाति सु॒म्नयो३म् (ऋ० ३.२७.१)। टिग्रहणं सर्वादिशार्थम्। ओकारः सर्वादेशो यथा स्यात्, व्यञ्जनान्तेऽन्त्यस्य मा भूदिति। यज्ञकर्मणीत्येव—अ॒पां रेतां॑सि जिन्वति (ऋ० ८.४४.१६)॥

याज्यान्तः॥ ९० ॥

याज्या नाम ये याज्याकाण्डे पठ्यन्ते मन्त्रास्तेषामन्त्यो यष्टिः स प्लवते यज्ञकर्मणि। स्तोमै॑र्विधे॒मा॒ग्नये३ (ऋ० ८.४३.११)। जि॒ह्वाम॑ग्ने चकृषे हव्य॒वाह॑म् (तै० सं० ४.४.४.१)। अन्तग्रहणं किम् ? याज्या नाम ऋचः काश्चिद् वाक्यसमुदायरूपाः, तत्र यावन्ति वाक्यानि तेषां सर्वेषां टेः प्लुतः प्राप्नोति। सर्वान्त्यस्यैवेष्यते, तदर्थमन्तग्रहणम्॥

ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः॥ ९१ ॥

ब्रूहि प्रेष्य श्रौषट् वौषट् आवह इत्येतेषामादेः प्लुतो भवति यज्ञकर्मणि। अग्नये॒ऽ-

---

१ - तु०—आ० श्रौ० १.२.१० ।

२ - द्र०—मै० सं० ४.१०-१४।

नुब्रू३हि (श० ब्रा० २.५.३.१२)। प्रेष्य—अग्नये गोमयान् प्रे३ष्य। श्रौषट्—अस्तु श्रौ३ष॑ट् (तै० सं० १.६.११.१)। वौषट् — सोमस्याग्ने वीही३वौ३ष॑ट् (ऐ० ब्रा० ३.५,६)। आवह — अ॑ग्निमा३व॑ह (तै० ब्रा० ३.५.३.२)। आव॑ह दे॑वान् यज॑मानाय (तै० ब्रा० ३.५.३.२) इत्येवमादावयं प्लुतो न भवति। 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' (परि० ३५) इति॥

अग्नीत्प्रेषणे परस्य च॥ ६२ ॥

अग्नीधः प्रेषणमग्नीत्प्रेषणम्। तत्रादेः प्लुतो भवति परस्य च। आ३ श्रा॑ ३व॑य (तै० सं० १.६.११.२)। ओ३श्रा३व॑य। अत्रैवायं प्लुत इष्यते। तेनेह न भवति—अग्नींद॑ग्नीन् विह॑र ब॑र्हिःस्तृ॑णाहि (तै० सं० ६.३.१.२) इति। तदर्थं केचिद् वक्ष्यमाणं विभाषेत्यभिसंबध्नन्ति। सा च व्यवस्थितविभाषेति। अपर आह—'सर्व एव प्लुतः साहसमनिच्छता विभाषा विज्ञेयः' (महाभाष्य ३.४२०) इति। इह तु उद्ध॑र३उद्ध॑र, अभिहर३अभिहर इति छान्दसः प्लुतव्यत्ययः। यज्ञकर्मणीत्येव—ओ श्रावय॥

विभाषा पृष्टप्रतिवचने हेः॥ ६३ ॥

पृष्टप्रतिवचने विभाषा हेः प्लुतो भवति। अकार्षीः कटं देवदत्त ? अकार्षं हि३, अकार्षं हि। अलावीः केदारं देवदत्त ? अलाविषं हि३, अलाविषं हि। पृष्टप्रतिवचन इति किम् ? कटं करिष्यति हि। हेरिति किम् ? करोमि ननु॥

निगृह्यानुयोगे च॥ ६४ ॥

स्वमतात् प्रच्यावनं निग्रहः। अनुयोगस्तस्य मतस्याविष्करणम्। तत्र निगृह्यानुयोगे यद् वाक्यं वर्तते तस्य टेः प्लुतो भवति विभाषा। अनित्यः शब्द इति केनचित् प्रतिज्ञातम्, तमुपालिप्सुरुपपत्तिभिर्निगृह्य साभ्यसूयमनुयुङ्क्ते—अनित्यः शब्द इत्यात्थ३, अनित्यः शब्द इत्यात्थ। अद्य श्राद्धमित्यात्थ३, अद्य श्राद्धमित्यात्थ। अद्यामावास्येत्यात्थ३, अद्यामावास्येत्यात्थ। अद्यामावास्येत्येवं वादी युक्त्या प्रच्याव्य स्वमतादेवमनुयुज्यते॥

आम्रेडितं भर्त्सने॥ ६५ ॥

'वाक्यादेरामन्त्रितस्य०' (८.१.८) इति भर्त्सने द्विर्वचनमुक्तम्, तस्याम्रेडितं प्लवते। चौर॑चौ॑र३, वृष॑लवृष॑ल३, दस्यो॑द॑स्यो३ घातयिष्यामि त्वा, बन्धयिष्यामि त्वा ॥ भर्त्सने पर्यायेणेति वक्तव्यम्॥ चौ॑र३चौ॑र, चौर॑चौ॑र ३। तदर्थमाम्रेडितग्रहणं द्विरुक्तोपलक्षणार्थं वर्णयन्ति॥

अङ्गयुक्तं तिङाकाङ्क्षम्॥ ९६ ॥

अङ्ग इत्यनेन युक्तं तिङन्तमाकाङ्क्षं भर्त्सने प्लवते। अङ्ग कुज३, अङ्ग व्या॑ह॑र३ इदानीं ज्ञास्यसि जाल्म। तिङिति किम् ? अङ्ग देवदत्त, मिथ्या वदसि। आकाङ्क्षमिति किम् ? अङ्ग पच। नैतदपरमाकाङ्क्षति। भर्त्सन इत्येव—अङ्गाधीष्व, ओदनं ते दास्यामि॥

विचार्यमाणानाम्॥ ९७ ॥

प्रमाणेन वस्तुपरीक्षणं विचारः, तस्य विषये विचार्यमाणानां वाक्यानां टेः प्लुतो भवति। हो॑त॑व्यं॑ दीक्षि॑तस्य॑ गृ॒ह्या३इ (तै० सं० ६.१.४.५)। होतव्यं न होतव्यमिति विचार्यते। तिष्ठेद्यूपा३इ। अनुप्रहरेद्यूपा३इ। यूपे तिष्ठेत् , यूपेऽनुप्रहरेदिति विचार्यते॥

पूर्वं तु भाषायाम्॥ ९८ ॥

भाषायां विषये विचार्यमाणानां पूर्वमेव प्लवते। अहिर्नु३ रज्जुर्नु। लोष्टो नु३ कपोतो नु। प्रयोगापेक्षं पूर्वत्वम्। इह भाषाग्रहणात् पूर्वयोगश्छन्दसि विज्ञायते॥

प्रतिश्रवणे च॥ ९९ ॥

प्रतिश्रवणमभ्युपगमः, प्रतिज्ञानम्, श्रवणाभिमुख्यं च। तत्राविशेषात् सर्वस्य ग्रहणम्। प्रतिश्रवणे यद् वाक्यं वर्तते तस्य टेः प्लुतो भवति। देवदत्त भोः, किमा॒त्थ३। गां मे देहि भोः, अहं ते द॑दा॒मि३। नित्यः शब्दो भवितुम॑र्ह॑ति३॥

अनुदात्तं प्रश्नान्ताभिपूजितयोः॥ १०० ॥

अनुदात्तः प्लुतो भवति प्रश्नान्ते, अभिपूजिते च । अगम॑३: पूर्वा॑३न् ग्रामा॑३न् अग्निभूता३ इ, पटा३उ। अग्निभूते, पटो इत्येतयोः प्रश्नान्ते वर्तमानयोरनुदात्तः प्लुतो भवति। अगम इत्येवमादीनां तु 'अनन्त्यस्यापि प्रश्नाख्यानयोः' (८.२.१०५) इति स्वरितः प्लुतो भवति। अभिपूजिते—शोभनः खल्वसि माणवक॑३॥

---

१ - 'लोष्टः' इत्यपपाठो है०।

२ - इदमुदाहरणमन्ते न्यस्तं मुद्रितेषु।

३ - 'नानेन प्लुतो विधीयते किं तु दूराद्भूतादिषु विहितस्यानन्त्यस्यापि प्रश्नाख्यानयोरिति स्वरितप्लुतस्यानुदात्तत्वं गुणमात्रं विधीयते' इत्यधिकं क्वचित्।

चिदिति चोपमार्थे प्रयुज्यमाने॥ १०१ ॥

अनुदात्तमिति वर्तते। चिदित्येतस्मिन् निपात उपमार्थे प्रयुज्यमाने वाक्यस्य टेरनुदात्तः प्लुतो भवति। प्लुतोऽप्यत्र विधीयते, न गुणमात्रम्। अग्निचिद् भाया३त्। राजचिद् भाया३त्। अग्निरिव भायात्, राजेव भायादित्यर्थः। उपमार्थ इति किम् ? कथंचिदाहुः। प्रयुज्यमान इति किम् ? अग्निर्माणवको भायात्॥

उपरिस्विदासीदिति च॥ १०२ ॥

अनुदात्तमिति वर्तते। उपरिस्विदासीदित्येतस्य टेरनुदात्तः प्लुतो भवति। अ॒धस्विद्दासी३द् उ॒परि॑ स्विदासी३त् (तै० ब्रा० २.८.६.५)। अधः स्विदासीदित्यत्र 'विचार्यमाणानाम्' (८.२.९७) इत्युदात्तः प्लुतः। उपरिस्विदासीदित्यत्र तु अनेनानुदात्तः॥

स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सनेषु॥ १०३ ॥

स्वरितः प्लुतो भवति आम्रेडिते परतोऽसूयायाम्, संमतौ, कोपे, कुत्सने च गम्यमाने। 'वाक्यादेरामन्त्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु' (८.१.८) इति द्विर्वचनमुक्तम्, तत्रायं प्लुतविधिः। असूयायां तावत्—मा॒ण॒॑व॒॑क३ माणवक, अ॒॑भि॒रू॒प॒॑क३ अभिरूपक रिक्तं ते आभिरूप्यम्। संमतौ—मा॒ण॒॑व॒॑क३ माणवक, अ॒॑भि॒रू॒प॒॑क३ अभिरूपक शोभनः खल्वसि। कोपे—मा॒ण॒॑व॒॑क३ माणवक, अ॒॑वि॒नी॒त॒॑क३ अविनीतक इदानीं ज्ञास्यसि जाल्म। कुत्सने—शा॒क्ती॒क३ शाक्तीक, या॒ष्टी॒क३ याष्टीक रिक्ता ते शक्तिः ॥ असूयादिषु वावचनं कर्तव्यम्॥ माणवक माणवकेत्येवमाद्यपि यथा स्यात्॥

क्षियाशीःप्रैषेषु तिङाकाङ्क्षम्॥ १०४ ॥

स्वरित इति वर्तते। क्षिया आचारभेदः, आशीः प्रार्थनाविशेषः, शब्देन व्यापारणं प्रैषः—एतेषु गम्यमानेषु तिङन्तमाकाङ्क्षं यत् तस्य स्वरितः प्लुतो भवति। आकाङ्क्षतीत्याकाङ्क्षम्, तिङन्तमुत्तरपदमाकाङ्क्षतीत्यर्थः। क्षियायां तावत्—स्वयं रथेन याति३, उपाध्यायं पदातिं गमयतीति। स्वयम् आदेनं ह भुङ्क्ते३, उपाध्यायं सक्तून् पाययति। पूर्वमत्र तिङन्तमुत्तरपदमाकाङ्क्षतीति आकाङ्क्षं भवति। आशिषि—सुतांश्च लप्सीष्ट३ धनं च तात। छन्दोऽध्येषीष्ट३ व्याकरणं च भद्र। प्रैषे—कटं कुरु३ ग्रामं च गच्छ। यवान् लुनीहि३ सक्तूंश्च पिब। आकाङ्क्षमिति किम् ? दीर्घं त आयुरस्तु। अग्नीन् विहर॥

---

१ - 'साकाङ्क्षम्' इति मुद्रितेषु ।

अनन्त्यस्यापि प्रश्नाख्यानयोः॥ १०५ ॥

पदस्येति वर्तते, स्वरितमिति च। अनन्त्यस्यापि अन्त्यस्यापि पदस्य टेः प्लुतो भवति प्रश्न आख्याने च। अगमं३ः पूर्वा३न् ग्रामा३न् अग्निभूता३इ, पटा३उ। सर्वेषामेव पदानामेष स्वरितः प्लुतः। अन्त्यस्य 'अनुदात्तं प्रश्नान्ताभिपूजितयोः' (८.२.१००) इति अनुदात्तोऽपि पक्षे भवति। आख्याने—अगमं३म् पूर्वा३न् ग्रामा३न् भोः३॥

प्लुतावैच इदुतौ॥ १०६ ॥

दूराद्भूतादिषु प्लुतो विहितः। तत्र ऐचः प्लुतप्रसङ्गे तदवयवभूताविदुतौ प्लुतौ। ऐ३तिकायन। औ३पमन्यव। अत्र यदेवर्णोवर्णयोरवर्णस्य च समविभागः, तदेदुतौ द्विमात्रावनेन प्लुतौ क्रियेते। प्लुताविति हि क्रियानिमित्तोऽयं व्यपदेशः। इदुतौ प्लवेते वृद्धिं गच्छत इत्यर्थः। तावती च सा प्लुतिर्भवति, यावत्या तावैचौ त्रिमात्रौ संपद्येते। यदा त्वर्धमात्रावर्णस्याध्यर्धमात्रेवर्णोवर्णयोः, तदा तावर्धतृतीयमात्रौ क्रियेते इति। भाष्ये तूक्तम्—इष्यत एव चतुर्मात्रः प्लुत इति। तत् कथम् ? समग्रविभागपक्ष इदुतोरनेन त्रिमात्रः प्लुतो विधीयते॥

एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ॥ १०७ ॥

एचोऽप्रगृह्यस्यादूराद्धूते प्लुतविषयस्य पूर्वस्यार्धस्याकार आदेशो भवति, स च प्लुतः, उत्तरस्येकारोकारावादेशौ भवतः। विषयपरिगणनं कर्तव्यम् ॥ प्रश्नान्ताभिपूजितविचार्यमाणप्रत्यभिवादयाज्यान्तेष्विति वक्तव्यम् ॥ प्रश्नान्ते—अगम३ः पूर्वा३न् ग्रामा३न् अग्निभूता३इ, पट१ा३उ। अभिपूजिते—भद्रं करोषि माणवक३ अग्निभूता३इ, पटा३उ। विचार्यमाणे—होत१व्यं दीक्षितस्य गृहा३इ (तै० सं० ६.१.४.५)। प्रत्यभिवादे—आयुष्मानेधि अग्निभूता३इ, प१टा३उ। याज्यान्ते—उ१क्षान्नाय व१शान्नाय१ सोमपृष्ठाय वे१धसे। स्तोमैर्विधेमाग्नया३इ (ऋ० ८.४३.११)। सोऽयम् अकारः प्लुतो यथाविषयमुदात्तोऽनुदात्तः स्वरितो वेदितव्यः। इदुतौ पुनरुदात्तावेव भवतः। परिगणनं किम् ? विष्णुभूते विष्णुभूते३ घातयिष्यामि त्वा। आगच्छ भो माणवक विष्णुभूते। परिगणने च सत्यदूराद्भूत इति न वक्तव्यम्। पदान्तग्रहणं तु कर्तव्यम्। इह मा

---

१ - ' अगम३ः ' इत्यपपाठो मुद्रितेषु।
२ - ' यया ' इति मुद्रितेषु ।
३ - ' एव ' इति नास्ति बाल०।
४ - ' पूर्वस्य ' इति नास्ति मुद्रितेषु ।
५ - ' आकारः ' इत्यपपाठो मुद्रितेषु।

भूत्—भद्रं करोषि गौ३ः इति। अप्रगृह्यस्येति किम्? शोभने खलु स्तः खट्वे१३ ॥ आमन्त्रिते छन्दसि प्लुतविकारोऽयं वक्तव्यः॥ अग्ना३इ पत्नी३वा३ः (तै० सं० १.४.२७.१)॥

तयोर्य्वावचि संहितायाम्॥ १०८ ॥

तयोरिदुतोर्यकारवकारादेशौ भवतोऽचि संहितायां विषये। संहितायामित्येतत् चाधिकृतम्। इत उत्तरमाध्यायपरिसमाप्तेर्यद् वक्ष्यामः संहितायामित्येवं तद् वेदितव्यम्। अग्ना३याशा। पटा३वाशा। अग्ना३यिन्द्रम्। पटा३वुदकम्। अचीति किम्? अग्ना३इ। पटा३उ। संहितायामिति किम्? अग्ना३इ इन्द्रम्। पटा३उ उदकम्। इदुतोरसिद्धत्वात् 'इको यणचि' (६.१.७७) इति न प्राप्नोतीत्ययमारम्भः। अथापि कथंचित् तयोः सिद्धत्वं स्यात्, एवमपि सवर्णदीर्घत्वनिवृत्त्यर्थम् (६.१.१०१) शाकलनिवृत्त्यर्थं (६.१.१२७) च वक्तव्यमेतत्। अथापि तन्निवृत्त्यर्थं यत्नान्तरमस्ति, तथापि यण्स्वर-निवृत्त्यर्थमिदमारभ्यते। यणादेशस्यासिद्धत्वाद् 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (८.२.४) इत्येष स्वरो न भवति।

किं तु यणा भवतीह न सिद्धं व्याविदुतोर्यदयं विदधाति।
तौ च मम स्वरसन्धिषु सिद्धौ शाकलदीर्घविधी तु निवर्त्यौ॥
इक्तु यदा भवति प्लुतपूर्वस्तस्य यणं विदधात्यपवादम्।
तेन तयोश्च न शाकलदीर्घो यण्स्वरबाधनमेव तु हेतुः॥

इति श्रीवामनविरचितायां काशिकायां वृत्तावष्टमाध्यायस्य द्वितीयः पादः॥



१ - 'नु' इति है०।

॥ अष्टमाध्यायस्य तृतीयः पादः ॥

मतुवसो रु संबुद्धौ छन्दसि॥ १ ॥

संहितायामिति वर्तते। मत्वन्तस्य वस्वन्तस्य च पदस्य रुरित्ययमादेशो भवति संबुद्धौ परतश्छन्दसि विषये। मत्वन्तस्य तावत् — इन्द्र॑ मरुत्व इ॒ह पा॑हि सोम॒म् (तै० सं० १.४.१८.१)। हरिवो मे॒दिन॑ं त्वा (तै० सं० ४.७.१४.४)। मरुतोऽस्य सन्ति, हरयोऽस्य सन्तीति मतुप्। सुतकारयोः[1] हल्ङ्यादिलोपे (६.१.६८) संयोगान्तस्य लोपे (८.२.२३) च कृते नकारस्य रुर्भवति। वस्वन्तस्य खल्वपि—मीढ्व॑स्तो॒काय॒ तन॑याय मृळ (ऋ० २.३३.१४)। इन्द्र साह्वः। क्वसोर्निपातनं 'दाश्वान्साह्वान्मीढ्वांश्च (६.१.१२) इति। मतुवसोरिति किम् ? ब्रह्मन् स्तोष्यामः। संबुद्धाविति किम् ? य॑ ए॒वं वि॒द्वा॑न॒ग्नि॑मुप॒ति॑ष्ठते (मै० सं० १.५.७)। छन्दसीति किम् ? हे गोमन्। हे पपिवन्॥ वन उपसंख्यानं कर्तव्यम्॥ यस्त्वा॒यन्तं॒ वसु॑ना प्रातरित्वः (ऋ० १.१२५.२)। इणः प्रातःपूर्वस्य छन्दसि क्वनिप्॥ विभाषा भवद्भगवदघवतामोच्चावस्य॥ छन्दसि भाषायां च भवद् भगवद् अघवद् इत्येतेषां विभाषा रुर्वक्तव्यः, अवशब्दस्य च ओकारादेशः। सामान्येन छन्दसि भाषायां चेदं वचनम्। भवत्—हे भोः, हे भवन्। भगवत्—हे भगोः, हे भगवन्। अघवत्—हे अघोः, हे अघवन्। निपातविज्ञानाद्[2] वा सिद्धम्। अथवा भो इत्येवमादयो निपाता द्रष्टव्याः। असंबुद्धावपि द्विवचनबहुवचनयोरपि दृश्यन्ते। भो देवदत्त-यज्ञदत्तौ। भो देवदत्तयज्ञदत्तविष्णुमित्राः। तथा स्त्रियामपि च दृश्यन्ते—भो ब्राह्मणि इत्यादि। संहिताधिकार[3] उत्तरत्रोपयुज्यते, यत्र भिन्नपदस्थौ निमित्तनिमित्तिनौ—'नश्छव्य-प्रशान्' (८.३.७) इति॥

अत्रानुनासिकः पूर्वस्य तु वा॥ २ ॥

अधिकारोऽयम्। इत उत्तरं यस्य स्थाने रुर्विधीयते, ततः पूर्वस्य तु वर्णस्य वानुनासिको भवतीत्येतदधिकृतं वेदितव्यम्, यदित ऊर्ध्वमनुक्रमिष्यामस्तत्र। वक्ष्यति—'समः सुटि' (८.३.५)—सँस्स्कर्ता। सँस्स्कर्तुम्। सँस्स्कर्तव्यम्। अत्रग्रहणं रुणा सह संनियोगप्रतिपत्त्यर्थम्। अधिकारपरिमाणापरिग्रहे हि सति 'ढो ढे लोपः' (८.३.१३) इत्यत्रापि पूर्वस्यानुनासिक आशङ्क्येत॥

---

१ - ' सुप्नुमोः ' इति बाल० ' सुप्तकारयोः ' इति तारा०, है०। सर्वत्रापपाठः।

२ - ' निपातनविज्ञानाद् ' इत्यपपाठो बाल० , है०।

३ - ' संहिताधिकार ····· इति ' इति पाठः क्वाचित्कः ।

आतोऽटि नित्यम्॥ ३ ॥

अटि परतो रोः पूर्वस्याकारस्य स्थाने नित्यमनुनासिकादेशो भवति। 'दीर्घादटि समानपादे' (८.३.९) इति रुत्वं वक्ष्यति, ततः पूर्वस्यातोऽनुनासिकविकल्पे प्राप्ते नित्यार्थं वचनम्। म॑हाँ असि (ऋ० ३.४६.२)। म॒हाँ इन्द्रो॒ य ओज॑सा (ऋ० ८.६.१)। दे॑वाँ अच्छा॒ दीर्घ॑त् (ऋ० ३.१.१)। केचिदनुस्वारमधीयते, सच्छान्दसो व्यत्ययो द्रष्टव्यः। आत इति किम् ? ये वा॒ वन॑स्पती॑ँरनु॑ (मा० सं० १३.७)। अटीति किम् ? भवांश्चरति। भवांश्छादयति। नित्यग्रहणं विस्पष्टार्थम्॥

अनुनासिकात् परोऽनुस्वारः॥ ४ ॥

अन्यशब्दोऽत्राध्याहर्तव्यः। तदपेक्षया चेयमनुनासिकादिति पञ्चमी। अनुनासिकादन्यो यो वर्णो रोः पूर्वः, यस्यानुनासिको न कृतः, ततः परोऽनुस्वार आगमो भवति। वक्ष्यति—'समः सुटि' (८.३.५)—संस्कर्ता। संस्कर्तुम्। संस्कर्तव्यम्। 'पुमः खय्यम्परे' (८.३.६)—पुंस्कामा। 'नश्छव्यप्रशान्' (८.३.७)—भवांश्चरति। केचित् तु परशब्दमेवान्यार्थं वर्णयन्ति। अनुनासिकात् परोऽनुनासिकादन्योऽनुस्वारो भवति। यस्मिन् पक्षेऽनुनासिको नास्ति, तत्रानुस्वारागमो भवति। स तु कस्यागमो भवति? रोः पूर्वस्यैवेति वर्तते, व्याख्यानादादेशो न भवति॥

समः सुटि॥ ५ ॥

रुर्वर्तते। सम् इत्येतस्य रुर्भवति सुटि परतः संहितायां विषये। सँस्कर्ता। सँस्कर्तुम्। सँस्कर्तव्यम्। संस्कर्ता। संस्कर्तुम्। संस्कर्तव्यम्। अत्र रोर्विसर्जनीये कृते 'वा शरि' (८.३.३६) इति पक्षे विसर्जनीय एव प्राप्नोति। व्यवस्थितविभाषा द्रष्टव्या। तेनात्र नित्यं सकार एव भवति। अस्मिन्नेव सूत्रे सकारादेशो वा निर्दिश्यते। समः स्सुटीति द्विसकारको निर्देशः। सम इति किम् ? उपस्कर्ता। सुटीति किम् ? संकृतिः। कश्चिदाह—॥ संपुंकानां सो वक्तव्यः॥ रुविधौ ह्यनिष्टप्रसङ्गः—संस्कर्ता, पुंस्कामा, कांस्कानिति॥

पुमः खय्यम्परे॥ ६ ॥

पुमित्येतस्य रुर्भवत्यम्परे खयि परतः। पुँस्कामा, पुंस्कामा। पुँस्पुत्रः, पुंस्पुत्रः।

---

१ - ' भवांश्लाघयति ' इत्यपपाठो है० तारा०।

२ - ' समः ' इत्यपपाठो मुद्रितेषु।

३ - अत्र ' समो वा लोपमेक इच्छन्ति ' इति वचनमपि महाभाष्येऽधीयते।

पुँस्फलम्, पुंस्फलम्। पुँश्चली, पुंश्चली। पुंस्कामेत्यत्र विसर्जनीयस्य 'कुप्वोः × क × पौ च' (८.३.३७) इति प्राप्नोति। तस्मादत्र सकार एवादेशो वक्तव्यः। द्विसकारकनिर्देशपक्षे तु पूर्वस्मादेव सूत्रात् स इत्यनुवर्तते। रुत्वं त्वनुवर्तमानमपि नात्राभिसंबध्यते, संबन्धानुवृत्तिस्तस्येति। खयीति किम् ? पुंदासः। पुंगवः। अम्पर इति किम् ? पुंक्षीरम्। पुंक्षुरम्। परग्रहणं किम्? पुमाख्यः। पुमाचारः॥

नश्छव्यप्रशान्॥ ७ ॥

अम्पर इति वर्तते। नकारान्तस्य पदस्य प्रशान्वर्जितस्य रुर्भवत्यम्परे छवि परतः। भवाँश्छादयति, भवांश्छादयति। भवाँश्चिनोति, भवांश्चिनोति। भवाँष्टीकते, भवांष्टीकते। भवाँस्तरति, भवांस्तरति। छवीति किम् ? भवान् करोति। अप्रशानिति किम् ? प्रशान् छादयति। प्रशान् चिनोति। अम्पर इत्येव—भवान् त्सरुकः॥

उभयथर्क्षु॥ ८ ॥

पूर्वेण नित्ये प्राप्ते विकल्पः क्रियते। नकारान्तस्य पदस्य छवि परतोऽम्पर उभयथा ऋक्षु भवति, रुर्वा नकारो वा। तस्मिंस्त्वा दधाति, तस्मिन्त्वा दधाति। ऋक्षिवति किम् ? ताँस्त्वं खादं[1] सुखादितान् (मा० सं० ११.७८)॥

दीर्घादटि समानपादे॥ ९ ॥

न इत्यनुवर्तते। दीर्घादुत्तरस्य पदान्तस्य नकारस्य रुर्भवत्यटि परतः तौ चेद् निमित्तनिमित्तिनौ समानपादे भवतः। ऋक्षिवति प्रकृतत्वाद् ऋक्पाद इह गृह्यते। परिधींरति (ऋ० ६.१०७.१६)। देवाँ अच्छा दीद्यत् (ऋ० ३.१.१)। महाँ इन्द्रो य ओजसा (ऋ० ८.६.१)। दीर्घादिति किम् ? अहन्हिम् (ऋ० १.३२.१)। अटीति किम्? इभ्यान् क्षत्रियान्। समानपाद इति किम् ? यातुधानानुपस्पृश (ऋ० १०.८७.२)। उभयथेत्येव—आदित्यान् हवामहे॥

नॄन् पे॥ १० ॥

नॄनित्येतस्य नकारस्य रुर्भवति पशब्दे परतः। अकार उच्चारणार्थः। नॄँः पाहि (ऋ० ८.८४.३), नॄंः पाहि। नॄँः प्रीणीहि, नॄंः प्रीणीहि। प इति किम् ? नॄन् भोजयति। उभयथेत्यपि केचिदनुवर्तयन्ति। नॄन् पाहि (ऋ० १.१७४.१) इत्यपि यथा स्यात्॥

---

१ - तु०—ऋ० १.६५.४।
२ - तु०—ऋ० १०.६६.४।

स्वतवान् पायौ॥ ११ ॥

स्वतवानित्येतस्य नकारस्य रुर्भवति पायुशब्दे परतः। स्वतवाँः पायुरग्ने (ऋ० ४.२.६)॥

कानाम्रेडिते॥ १२ ॥

कानित्येतस्य नकारस्य रुर्भवति आम्रेडिते परतः। कांस्कानामन्त्रयते। कांस्कान् भोजयति। अस्य कस्कादिषु (८.३.४८) पाठो द्रष्टव्यः। तेन 'कुप्वोः × क × पौ च' (८.३.३७) इति न भवति। 'समः सुटि' (८.३.५) इत्यतो वा सकारोऽनुवर्तते, स एवात्र विधीयते। पूर्वेषु योगेषु संबन्धानुवृत्त्यागतस्य रोरत्रानभिसंबन्धः। आम्रेडित इति किम्? कान् कान् पश्यति। एकोऽत्र कुत्सायाम्॥

ढो ढे लोपः॥ १३ ॥

ढकारस्य ढकारे लोपो भवति। सत्यपि पदाधिकारे तस्यासंभवादपदान्तस्य ढकारस्यायं लोपो विज्ञायते। लीढम्। मीढम्[1]। उपगूढम्। ष्टुत्वस्यात्र सिद्धत्वमाश्रयाद् द्रष्टव्यम्। श्वलिड् ढौकत इत्यत्र तु जश्त्वे कृते कार्यी[2] नास्तीति लोपाभावः। न च ढलोपो जश्त्वापवादो विज्ञातुं शक्यते, तस्य हि लीढादिर्विषयः संभवति। तत्र हि श्रुतिकृतमानन्तर्यमस्ति। शास्त्रकृतं तु यदनानन्तर्यं[3] ष्टुत्वस्यासिद्धत्वेन प्राप्तम्, तत् तु सूत्रकरणसामर्थ्याद् बाध्यते। श्वलिड् ढौकत इत्यत्र तु न श्रुतिकृतमानन्तर्यम्, न शास्त्रकृतमिति अविषयोऽयं ढलोपस्य॥

रो रि॥ १४ ॥

रेफस्य रेफे परतो लोपो भवति। नीरक्तम्। दूरक्तम्। अग्नी रथः। इन्दू रथः। पुना रक्तं वासः। प्राता राजक्रयः। पदस्येत्यत्र विशेषणे षष्ठी, तेनापदान्तस्यापि[4] रेफस्य लोपो भवति। जगृधेरजघाः, पास्पर्धेरपास्पा इति॥

खरवसानयोर्विसर्जनीयः॥ १५ ॥

र इति वर्तते। रेफान्तस्य पदस्य खरि परतोऽवसाने च विसर्जनीयादेशो भवति।

---

१ - 'मीढम्' इति नास्ति मुद्रितेषु।
२ - 'कार्यम्' इत्यपपाठो मुद्रितेषु।
३ - 'यदा नानन्तर्यम्' इति है०। तत्र 'यदा' 'तत्' न संवदेते।
४ - 'तेन पदान्तस्यापि' इति बाल०।

वृक्षश्छादयति। प्लक्षश्छादयति। वृक्षस्तरति। प्लक्षस्तरति। अवसाने—वृक्षः। प्लक्षः। खरवसानयोरिति किम् ? अग्निर्नयति। वायुर्नयति। इह नृकुट्यां भवो नार्कुटः, नृपतेरपत्यं नार्पत्य इति वृद्धेर्बहिरङ्गलक्षणत्वात् तदाश्रयस्य रेफस्य 'असिद्धं बहिरङ्गम्०' (परि० ५०) इत्यसिद्धत्वाद् विसर्जनीयो न भवति॥

रोः सुपि॥ १६ ॥

रु इत्येतस्य रेफस्य सुपि परतो विसर्जनीयादेशो भवति। पयःसु। सर्पिःषु। यशःसु। सुपीति सप्तमीबहुवचनं गृह्यते। सिद्धे सत्यारम्भो नियमार्थः। रोरेव सुपि विसर्जनीयादेशः, नान्यस्य। गीर्षु। धूर्षु॥

भोभगोअघोअपूर्वस्य योऽशि॥ १७ ॥

भोर् भगोर् अघोर् इत्येवंपूर्वस्यावर्णपूर्वस्य च रो रेफस्य यकारादेशो भवत्यशि परतः। भो अत्र। भगो अत्र। अघो अत्र। भो ददाति। भगो ददाति। अघो ददाति। अवर्णपूर्वस्य—क आस्ते, कय् आस्ते। ब्राह्मणा ददति। पुरुषा ददति। भोभगोअघोअपूर्वस्येति किम् ? अग्निरत्र। वायुरत्र। अश्ग्रहणं किम् ? वृक्षः। प्लक्षः। नैतदस्ति, 'संहितायाम्' (८.२.१०८) इत्यनुवर्तते। तर्ह्यश्ग्रहणमुत्तरार्थम्। 'हलि सर्वेषाम्' (८.३.२२) इत्ययं लोपोऽशि हलि यथा स्यात्। इह मा भूत्—वृक्षं वृश्चतीति वृक्षवृट्, तमाचष्टे यः स वृक्षवयति, वृक्षवयतेरप्रत्ययो वृक्षव् करोति। अथ तत्रैवाश्ग्रहणं कस्माद् न कृतम् ? उत्तरार्थम्, 'मोऽनुस्वारः' (८.३.२३) इति हल्मात्रे यथा स्यात्। 'व्योर्लघुप्रयत्नतरः शाकटायनस्य' (८.३.१८), 'लोपः शाकल्यस्य' (८.३.१९) इत्येतत् च वृक्षव् करोतीत्यत्र मा भूदित्यश्ग्रहणम्। रोरित्येव—प्रातरत्र। पुनरत्र॥

व्योर्लघुप्रयत्नतरः शाकटायनस्य॥ १८ ॥

वकारयकारयोर्भोभगोअघोअवर्णपूर्वयोः पदान्तयोर्लघुप्रयत्नतर आदेशो भवत्यशि परतः शाकटायनस्याचार्यस्य मतेन। भोयत्र, भो अत्र। भगोयत्र, भगो अत्र। अघोयत्र, अघो अत्र। कयास्ते, क आस्ते। अस्मायुद्धर, अस्मा उद्धर। असावादित्यः, असा आदित्यः। द्वावत्र, द्वा अत्र। द्वावानय, द्वा आनय। लघुप्रयत्नतरत्वमुच्चारणे स्थानकरण-शैथिल्यम्। स्थानं तालवादि। करणं जिह्वामूलादि। तयोरुच्चारणे शैथिल्यं मन्दप्रयत्नता॥

---

१ - ' वृक्षष्टकारः, प्लक्षष्टकारः, वृक्षश्चिनोति, प्लक्षश्चिनोति, वृक्षष्टीकते, प्लक्षष्टीकते ' इत्यधिकं क्वचित्।

२ - ' इत्यस्य ' इति है०।

लोपः शाकल्यस्य॥ १९ ॥

वकारयकारयोः पदान्तयोरवर्णपूर्वयोर्लोपो भवति शाकल्यस्याचार्यस्य मतेनाशि परतः। क आस्ते, कयास्ते। काक आस्ते, काकयास्ते। अस्मा उद्धर, अस्मायुद्धर। द्वा अत्र, द्वावत्र। असा आदित्यः, असावादित्यः। शाकल्यग्रहणं विभाषार्थम्। तेन यदापि लघुप्रयत्नतरो न भवत्यादेशः, तदापि व्योः पक्षे श्रवणं भवति॥

ओतो गार्ग्यस्य॥ २० ॥

ओकारादुत्तरस्य यकारस्य लोपो भवति गार्ग्यस्याचार्यस्य मतेनाशि परतः। भो अत्र। भगो अत्र। भो इदम्। भगो इदम्। नित्यार्थोऽयमारम्भः। गार्ग्यग्रहणं पूजार्थम्। योऽयमलघुप्रयत्नस्य विकल्पेन लोपः क्रियते सोऽनेन निवर्त्यते। लघुप्रयत्नतरस्तु भवत्येव यकारः। भो अत्र, भोयत्र। भगो अत्र, भगोयत्र। अघो अत्र, अघोयत्र। केचित् तु सर्वमेव यकारमत्र नेच्छन्ति॥

उञि च पदे॥ २१॥

अवर्णपूर्वयोर्व्योः पदान्तयोर्लोपो भवत्युञि च पदे परतः। सं उ एकविंशं वर्तनिः (मै० सं० २.७.२०)। स उ एकाग्निः। पद इति किम्? तन्त्र उतम्, तन्त्रयुतम्। वेञः संप्रसारणे कृत उञिति भूतपूर्वेण ञकारेण शक्यते प्रतिपत्तुमिति। अथोञित्येवंरूपो निपातः प्रतिपदोक्तोऽस्ति, तदा लाक्षणिकत्वाद् वेञादेशस्य ग्रहणमिह नास्ति (परि० १०५), उत्तरार्थं पदग्रहणं क्रियते॥

हलि सर्वेषाम्॥ २२ ॥

हलि परतो भोभगोअघोअपूर्वस्य यकारस्य पदान्तस्य लोपो भवति सर्वेषामाचार्याणां मतेन। भो हसति। भगो हसति। अघो हसति। भो याति। भगो याति। अघो याति। वृक्षा हसन्ति। सर्वेषांग्रहणं शाकटायनस्यापि लोपो यथा स्यात्, लघुप्रयत्नतरो मा भूदिति॥

मोऽनुस्वारः॥ २३ ॥

मकारान्तस्य पदस्य अनुस्वार आदेशो भवति हलि परतः। कुण्डं हसति। वनं हसति। कुण्डं याति। वनं याति। हलीत्येव—त्वमत्र। किमत्र। पदान्तस्येत्येव—गम्यते। रम्यते॥

---

१ - 'मकारस्य पदान्तस्य' इति मुद्रितेषु। स तु न युज्यते।

२ - 'वनं याति' इति नास्ति बाल०।

नश्चापदान्तस्य झलि॥ २४ ॥

नकारस्य मकारस्य चापदान्तस्यानुस्वारादेशो भवति झलि परतः। पयांसि। यशांसि। सर्पींषि। धनूंषि[1]। मकारस्य—आक्रंस्यते। आचिक्रंसते[2]। अधिजिगांसते। अपदान्तस्येति किम् ? राजन् भुङ्क्ष्व। झलीति किम् ? रम्यते। गम्यते॥

मो राजि समः क्वौ॥ २५ ॥

समो मकारस्य मकार आदेशो भवति राजतौ क्विप्रत्ययान्ते परतः। सम्राट्। साम्राज्यम्। मकारस्य मकारवचनमनुस्वारनिवृत्त्यर्थम्। राजीति किम् ? संयत्। सम इति किम् ? किंराट्। क्वाविति किम् ? संराजिता। संराजितुम्। संराजितव्यम्॥

हे मपरे वा॥ २६ ॥

हकारे मकारपरे परतो मकारस्य वा मकार आदेशो भवति। किम् ह्मलयति, किं ह्मलयति। कथम् ह्मलयति, कथं ह्मलयति ॥ यवलपरे यवला वा॥ यवलपरे हकारे मकारस्य यवला यथासंख्यं वा भवन्तीति वक्तव्यम्। कियँ् ह्यः, किं ह्यः। किवँ् ह्वलयति, किं ह्वलयति। किलँ् ह्लादयति, किं ह्लादयति॥

नपरे नः॥ २७ ॥

नकारपरे हे परतो मकारस्य वा नकारादेशो भवति। किन् ह्नुते, किं ह्नुते। कथन् ह्नुते, कथं ह्नुते॥

ङ्णोः कुक्टुक् शरि॥ २८ ॥

ङकारणकारयोः पदान्तयोः कुक् टुग् इत्येतावागमौ वा भवतः शरि परतः। प्राङ्क् शेते, प्राङ् शेते। प्राङ्क् षष्ठः, प्राङ् षष्ठः। प्राङ्क् साये, प्राङ् साये। णकारस्य—वण्ट् शेते, वण् शेते। पूर्वान्तकरणं प्राङ्क् छेते इत्यत्र छत्वार्थम्। 'शश्छोऽटि' (८.४.६३) इति हि पदान्ताद् झय इति तद् विज्ञायते। इह मा भूत्—पुरा क्रूरस्य विसृपो विरप्शिन् (मा० सं० १.२८), प्राङ्क् साय इत्यत्रापि 'सात्पदाद्योः' (८.३.१०९) इति षत्वप्रतिषेधार्थं च, वण्ट् साय इत्यत्र च 'न पदान्ताट्टोरनाम्' (८.४.४२) इति ष्टुत्वप्रतिषेधार्थम्॥

---

१ - ' धनूंषि ' इति नास्ति है०।

२ - ' आचिक्रंस्यते ' इति मुद्रितेषु।

ङः सि धुट्॥ २९ ॥

ङकारान्तात् पदादुत्तरस्य सकारादेः पदस्य वा धुडागमो भवति। श्वलिट्त्साये, श्वलिट् साये। मधुलिट्त्साये, मधुलिट् साये। परादिकरणं 'न पदान्ताट्टोरनाम्' (८.४.४२) इति ष्टुत्वप्रतिषेधार्थम्॥

नश्च॥ ३० ॥

नकारान्तात् पदादुत्तरस्य सकारस्य वा धुडागमो भवति। भवान्त्साये, भवान् साये। महान्त्साये, महान् साये। धुटश्चर्त्वस्य चासिद्धत्वाद् 'नश्छव्यप्रशान्' (८.३.७) इति रुत्वं न भवति॥

शि तुक्॥ ३१ ॥

नकारस्य पदान्तस्य शकारे परतो वा तुगागमो भवति। भवाञ्छेते। पूर्वान्तकरणं छत्वार्थम्। यद्येवं कुर्वञ्छेते इत्यत्र नकारस्यापदान्तत्वाद् णत्वं प्राप्नोति। तत्र समाधिमाहुः— 'स्तोः श्चुना श्चुः' (८.४.४०) इत्यत्र योगविभागः क्रियते णत्वप्रतिषेधार्थम् , स्तोः श्चुना णकारो न भवतीति, ततः श्चुरिति॥

ङमो ह्रस्वादचि ङमुण् नित्यम्॥ ३२ ॥

ह्रस्वात् परो यो ङम् तदन्तात् पदादुत्तरस्याचो ङमुडागमो भवति नित्यम्। ङणनेभ्यो यथासंख्यं ङणना भवन्ति—ङकारान्ताद् ङुट्—प्रत्यङ्ङास्ते। णकारान्ताद् णुट्—वण्णास्ते। वण्णवोचत्। नकारान्ताद् नुट्—कुर्वन्नास्ते। कुर्वन्नवोचत्। कृषन्नास्ते। कृषन्नवोचत्। ङम इति किम् ? त्वमास्से। ह्रस्वादिति किम् ? प्राङास्ते। भवानास्ते। अचीति किम्? प्रत्यङ् करोति। इह परमदण्डिनौ, परमदण्डिनेति 'उत्तरपदत्वे चापदादिविधौ' (महाभाष्य १.१६६) इति प्रत्ययलक्षणप्रतिषेधादुत्तरपदस्य पदत्वं नास्तीति ङमुड् न भवति। अथवा 'उञि च पदे' (८.३.२१) इत्यतः सप्तम्यन्तं पद इत्यनुवर्तते। तेनाजादौ पदे ङमुड् भवति॥

मय उञो वो वा॥ ३३ ॥

मय उत्तरस्य उञो वा वकारादेशो भवत्यचि परतः। शम्व॑स्तु (मा० सं० २३.४४)

---

१ - वस्तुतस्त्वत्र रुत्वप्राप्तिरेव नास्ति, छवोऽम्परत्वाभावात्। व्याख्याकृतोः कल्पना तु श्रद्धातिरेकमात्रम्। अग्रन्थोऽयमित्येव साम्प्रतम्।

वेदिः, शमु अस्तु वेदिः। तद्वस्य परेतः, तदु अस्य परेतः। किम्वावपनम् (मा० सं० २३. ६), किमु आवपनम्। प्रगृह्यत्वादुञः प्रकृतिभावे प्राप्ते वकारो विधीयते। तस्यासिद्धत्वाद् हलीति 'मोऽनुस्वारः' (८.३.२३) न भवति॥

विसर्जनीयस्य सः॥ ३४ ॥

खरीत्यनुवर्तते। विसर्जनीयस्य सकार आदेशो भवति खरि परतः। वृक्षश्छादयति। प्लक्षश्छादयति। वृक्षष्टकारः। प्लक्षष्टकारः। वृक्षस्थकारः। प्लक्षस्थकारः। वृक्षश्चिनोति। प्लक्षश्चिनोति। वृक्षष्टीकते। प्लक्षष्टीकते। वृक्षस्तरति। प्लक्षस्तरति॥

शर्परे विसर्जनीयः॥ ३५ ॥

शर्परे खरि परतो विसर्जनीयस्य विसर्जनीयादेशो भवति। शशः क्षुरम्। पुरुषः क्षुरम्। अद्भिः प्सातम्। वासः क्षौमम्। पुरुषः त्सरुः। घ॑नाघ॒नः क्षोभ॑णश्चर्षणी॒नाम् (ऋ० १०.१०३.१)। नेति वक्तव्ये विसर्जनीयस्य विसर्जनीयादेशविधानं विकार-निवृत्त्यर्थम्। तेन जिह्वामूलीयोपध्मानीयौ न भवतः॥

वा शरि॥ ३६ ॥

विसर्जनीयस्य विसर्जनीयादेशो वा भवति शरि परे। वृक्षः शेते, वृक्षश्शेते। प्लक्षः शेते, प्लक्षश्शेते। वृक्षः षण्डे, वृक्षष्षण्डे। वृक्षः साये, वृक्षस्साये ॥ खर्परे शरि वा लोपो वक्तव्यः॥ वृक्षा स्थातारः, वृक्षाः स्थातारः, वृक्षास्स्थातारः॥

कुप्वोः ×क×पौ च॥ ३७ ॥

कवर्गपवर्गयोः परतो विसर्जनीयस्य यथासंख्यं × क × प इत्येतावादेशौ भवतः, चकाराद् विसर्जनीयश्च। वृक्ष × करोति, वृक्षः करोति। वृक्ष × खनति, वृक्षः खनति। वृक्ष × पचति, वृक्षः पचति। वृक्ष × फलति, वृक्षः फलति। कपावुच्चारणार्थौ। जिह्वामूलीयो-पध्मानीयावेतावादेशौ। 'विसर्जनीयस्य सः' (८.३.३४) इत्येतस्मिन् नाप्राप्त इदमारभ्यत इत्येतस्य बाधकम्, 'शर्परे विसर्जनीयः' (८.३.३५) इत्येतत् तु न बाध्यते—वासः क्षौमम्, अद्भिः प्सातम्। पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येति 'शर्परे विसर्जनीयः' (८.३.३५) इत्येतदेव भवति। केचित् तु एतदर्थं योगविभागं कुर्वन्ति। कुप्वोः शर्परयोः विसर्जनीयस्य विसर्जनीय आदेशो भवति। किमर्थमिदम् ? × क × पौ चेति वक्ष्यति, तद्बाधनार्थमिति॥

सोऽपदादौ॥ ३८ ॥

सकार आदेशो भवति विसर्जनीयस्य कुप्वोरपदाद्योः परतः। पाशकल्पक-काम्येषु। 'याप्ये पाशप्' (५.३.४७)—पयस्पाशम्। 'ईषदसमाप्तौ कल्पप्०' (५.३.६७)—पयस्कल्पम्। यशस्कल्पम्। 'प्रागिवात् कः' (५.३.७०)—पयस्कम्। यशस्कम्। 'काम्यच्०' (३.१.६)—पयस्काम्यति। यशस्काम्यति। अपदादाविति किम् ? पय × कामयते। पय × पिबति ॥ सोऽपदादावित्यनव्ययस्येति वक्तव्यम्॥ इह मा भूत्—प्रातःकल्पम्, पुनःकल्पमिति ॥ रोः काम्ये नियमार्थम्॥ रोरेव काम्ये नान्यस्येति नियमार्थं वक्तव्यम्। पयस्काम्यति। यशस्काम्यति। इह मा भूत्—गीःकाम्यति। धूःकाम्यति ॥ उपध्मानीयस्य च॥ कवर्गे परतः सकार आदेशो भवतीति वक्तव्यम्। किं प्रयोजनम्? उब्जिरुपध्मानीयोपधः पठ्यत इति दर्शनेऽभ्युद्गः, समुद्ग इति यथा स्यात्॥

इणः षः॥ ३९ ॥

अपदादाविति वर्तते। इण उत्तरस्य विसर्जनीयस्य षकारादेशो भवति कुप्वोरपदाद्योः परतः। पाशकल्पककाम्येषु। पाश—सर्पिष्पाशम्। यजुष्पाशम्। कल्प—सर्पिष्कल्पम्। यजुष्कल्पम्। क—सर्पिष्कम्। यजुष्कम्। काम्य—सर्पिष्काम्यति। यजुष्काम्यति। अपदादा-वित्येव—अग्निः करोति। वायुः करोति। अग्निः पचति। वायुः पचति। कुप्वोरित्येव—सर्पिस्ते। यजुस्ते। इत उत्तरं स इति, इणः ष इति च वर्तते। तत्रेणः परो यो विसर्जनीयस्तस्य षकारो भवति, अन्यस्य सकारो भवति॥

नमस्पुरसोर्गत्योः॥ ४० ॥

नमस् पुरस् इत्येतयोर्गतिसंज्ञकयोर्विसर्जनीयस्य सकारादेशो भवति कुप्वोः परतः। नमस्कर्ता। नमस्कर्तुम्। नमस्कर्तव्यम्। पुरस्कर्ता। पुरस्कर्तुम्। पुरस्कर्तव्यम्। गत्योरिति किम् ? पूः, पुरौ, पुरः करोति॥

इदुदुपधस्य चाप्रत्ययस्य॥ ४१ ॥

इकारोपधस्य उकारोपधस्य चाप्रत्ययस्य विसर्जनीयस्य षकार आदेशो भवति कुप्वोः परतः। निर्दुर्बहिराविश्चतुर्प्रादुस्। निस्—निष्कृतम्। निष्पीतम्। दुस्—दुष्कृतम्। दुष्पीतम्। बहिस्—बहिष्कृतम्। बहिष्पीतम्। आविस्—आविष्कृतम्। आविष्पीतम्।

---

१ - ' च ' इति नास्ति मुद्रितेषु ।

२ - ' पुरस्कर्ता, पुरस्कर्तुम्, पुरस्कर्तव्यम् ' इति नास्ति मुद्रितेषु।

चतुर्—चतुष्कृतम्। चतुष्कपालम्। चतुष्कलम्। चतुष्कण्टकम्। चतुष्पीतम्। प्रादुस्—प्रादुष्कृतम्। प्रादुष्पीतम्। अप्रत्ययस्येति किम् ? अग्निः करोति। वायुः करोति। मातुः करोति। पितुः करोति। अत्र 'रात् सस्य' (८.२.२४) इति सकारलोपे कृते रेफस्य यो विसर्जनीयः, तस्याप्रत्ययविसर्जनीयत्वात् षत्वं प्राप्नोति। कस्कादिषु (८.३.४८) तु भ्रातुष्पुत्रग्रहणं ज्ञापकमेकादेशनिमित्तत्वात् षत्वप्रतिषेधस्य ॥ पुम्मुहुसोः प्रतिषेधो वक्तव्यः॥ पुँस्कामा। मुहु ४ कामा। नैष्कुल्यम्। दौष्कुल्यम्। दौष्पुरुष्यम्। नि३ष्कुलम्। दु३ष्कुलम्। दु३ष्पुरुषः। बहिरङ्गलक्षणयोर्वृद्धिप्लुतयोरसिद्धत्वात् (परि ५०) षत्वं प्रवर्तते॥

तिरसोऽन्यतरस्याम्॥ ४२ ॥

तिरसो विसर्जनीयस्यान्यतरस्यां सकारादेशो भवति कुप्वोः परतः। तिरस्कर्ता। तिरस्कर्तुम्। तिरस्कर्तव्यम्। तिरः कर्ता। तिरः कर्तुम्। तिरः कर्तव्यम्। गतेरित्येव—तिरः कृत्वा काण्डं गतः॥

द्विस्त्रिश्चतुरिति कृत्वोऽर्थे॥ ४३ ॥

ष इति संबध्यते। द्विस् त्रिस् चतुर् इत्येतेषां कृत्वोऽर्थे वर्तमानानां विसर्जनीयस्य षकार आदेशो भवत्यन्यतरस्यां कुप्वोः परतः। द्विष्करोति, द्विःकरोति। त्रिष्करोति, त्रिःकरोति। चतुष्करोति, चतुःकरोति। द्विष्पचति, द्विःपचति। त्रिष्पचति, त्रिःपचति। चतुष्पचति, चतुःपचति। कृत्वोऽर्थ इति किम् ? चतुष्कपालम्। चतुष्कण्टकम्। पूर्वेण नित्यं षत्वं भवति। 'इदुदुपधस्य ०' (८.३.४१) इत्यस्यानुवृत्तौ सत्यां कृत्वोऽर्थविषयेण च पदेन विसर्जनीये विशेष्यमाणे द्विस्त्रिश्चतुरिति शक्यमकर्तुम्।

कृत्वसुजर्थे षत्वं ब्रवीति कस्माच्चतुष्कपाले मा।
षत्वं विभाषया भून्ननु सिद्धं तत्र पूर्वेण॥ १॥
सिद्धे ह्ययं विधत्ते चतुरः षत्वं यदापि कृत्वोऽर्थे।
लुप्ते कृत्वोऽर्थीये रेफस्य विसर्जनीयो हि॥ २॥
एवं सति त्विदानीं द्विस्त्रिश्चतुरित्यनेन किं कार्यम्।
अन्यो हि नेदुदुपधः कृत्वोऽर्थः कश्चिदप्यस्ति॥ ३॥
अक्रियमाणे ग्रहणे विसर्जनीयस्तदा विशेष्येत।
चतुरो न सिध्यति तथा रेफस्य विसर्जनीयो हि॥ ४॥
तस्मिंस्तु क्रियमाणे युक्तं चतुरो विशेषणं भवति।
प्रकृतं पदं तदन्तं तस्यापि विशेषणं न्याय्यम्॥ ५॥

---

१ - ' चतुष्पीतम् ' इति नास्ति मुद्रितेषु।

एवं त्वक्रियमाणे द्विस्त्रिश्चतुर्ग्रहणे चतुःशब्दस्य कृत्वोऽर्थेऽपि वर्तमानस्य पूर्वेणैव नित्यं षत्वं स्यात्। पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्य॥

इसुसोः सामर्थ्ये॥ ४४ ॥

ष इति संबध्यते। इस् उस् इत्येतयोर्विसर्जनीयस्यान्यतरस्यां षकारादेशो भवति सामर्थ्ये कुप्वोः परतः। सर्पिष्करोति, सर्पिः करोति। यजुष्करोति, यजुः करोति। सामर्थ्य इति किम् ? तिष्ठतु सर्पिः, पिब त्वमुदकम्। सामर्थ्यमिह व्यपेक्षा, न पुनरेकार्थीभावः, उभयं वा॥

नित्यं समासेऽनुत्तरपदस्थस्य॥ ४५ ॥

इसुसोरिति वर्तते। समासविषय इसुसोर्विसर्जनीयस्यानुत्तरपदस्थस्य नित्यं षत्वं भवति कुप्वोः परतः। सर्पिष्कुण्डिका। धनुष्कपालम्। सर्पिष्पानम्। धनुष्फलम्। अनुत्तर- पदस्थस्येति किम् ? परमसर्पिःकुण्डिका। परमधनुःकपालम्। पूर्वसूत्रेण विकल्पोऽप्यत्र न भवति। एतदेवानुत्तरपदस्थस्येति वचनं ज्ञापकम्—इसुसोः प्रत्ययग्रहणे 'यस्मात् स विहितस्तदादेः०' (परि० २३) इत्ययं नियमो न भवति। तेन वाक्येऽपि—परमसर्पिष्करोति, परमसर्पिः करोति, 'इसुसोः सामर्थ्ये' (८.३.४४) इत्येतद् भवति। व्यपेक्षा च तत्र सामर्थ्यमाश्रितमिति समासे न भवति॥

अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य॥ ४६ ॥

अकारादुत्तरस्यानव्ययविसर्जनीयस्य समासेऽनुत्तरपदस्थस्य नित्यं सकारादेशो भवति कृ कमि कंस कुम्भ पात्र कुशा कर्णी इत्येतेषु परतः। कृ—अयस्कारः। पयस्कारः। कमि—अयस्कामः। पयस्कामः। कंस—अयस्कंसः। पयस्कंसः। कुम्भ—अयस्कुम्भः। पयस्कुम्भः। अयस्कुम्भी, पयस्कुम्भीत्यत्रापि भवति, 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति' (परि० ७१) इति। पात्र—अयस्पात्रम्। पयस्पात्रम्। अयस्पात्री। पयस्पात्री। कुशा—अयस्कुशा। पयस्कुशा। कर्णी—अयस्कर्णी। पयस्कर्णी। शुनस्कर्ण इत्ययं तु कस्कादिषु (८.३.४८) द्रष्टव्यः। अत इति किम् ? गीःकारः। धूःकारः। तपरकरणं किम् ? भाःकरणम्। भास्कर इत्ययं तु कस्कादिषु (८.३.४८) द्रष्टव्यः। अनव्ययस्येति किम् ? श्वःकारः। पुनःकारः। समास इत्येव—यशः करोति। पयः करोति। यशः कामयते। अनुत्तरपदस्थस्येत्येव—परमपयःकारः। परमपयःकामः॥

अधःशिरसी पदे॥ ४७ ॥

---

१ - ' च क्रियमाणे ' इति बाल०, ' तु क्रियमाणे ' इति है० तारा० । मुद्रितेष्वपपाठः सर्वत्र।

अधस् शिरस् इत्येतयोर्विसर्जनीयस्य समासेऽनुत्तरपदस्थस्य सकार आदेशो भवति पदशब्दे परतः। अधस्पदम्। शिरस्पदम्। अधस्पदी। शिरस्पदी। समास इत्येव—अधः पदम्। अनुत्तरपदस्थस्येत्येव—परमशिरःपदम्। अधस्पदमिति मयूरव्यंसकादित्वात् (२.१.७२) समासः॥

कस्कादिषु च॥ ४८ ॥

कस्क इत्येवमादिषु च विसर्जनीयस्य सकारः षकारो वा यथायोगमादेशो भवति कुप्वोः परतः। कस्कः। कौतस्कुतः। तत आगत इत्यण्। भ्रातुष्पुत्रः। शुनस्कर्णः। सद्यस्कालः। सद्यस्क्रीः। क्रीणातेरयं संपदादित्वात् (३.३.९४ वा०) क्विप् प्रत्ययः। तत्र भवः क्रतुः साद्यस्क्रः। कांस्कान्। 'कानाम्रेडिते' (८.३.१२) इति रुत्वमत्र। सर्पिष्कुण्डिका, धनुष्कपालम्, बर्हिष्पूलम्, यजुष्पात्रमित्येषां पाठ उत्तरपदस्थस्यापि षत्वं यथा स्यादिति। परमसर्पिःफलमित्येवमादिप्रत्युदाहरणादिति पारायणिका आहुः। भाष्ये वृत्तौ च 'नित्यं समासेऽनुत्तरपदस्थस्य' (८.३.४५) इत्यत्र परमसर्पिःकुण्डिकेत्येतदेव प्रत्युदाहरणम्। अयस्काण्डः। मेदस्पिण्डः। अविहितलक्षण उपचारः कस्कादिषु द्रष्टव्यः॥

छन्दसि वाप्राम्रेडितयोः॥ ४९ ॥

छन्दसि विषये विसर्जनीयस्य वा सकारादेशो भवति कुप्वोः परतः प्रशब्दमाम्रेडितं च वर्जयित्वा। अयःपात्रम्, अयस्पात्रम् (शौ० सं० ८.१३.२)। विश्वतः पात्रम्, विश्वतस्पात्रम्। उरु णः कारः, उरु णस्कारः। अप्राम्रेडितयोरिति किम्? अ॒ग्निः प्रं॑विद्वान् (शौ० सं० ५.२६.१)। पर॑षःपरुष॒ः परि॑ (मा० सं० १३.२०)। सूर्यं॑रश्मि॒र्हरि॑केशः पु॒रस्ता॑त् (ऋ० १०.१३९.१), स न॑ः पावकः (ऋ० १.१२.१०) इत्येवमादिषु 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' (परि० ३५) इति सत्वं न भवति॥

कः करत्करतिकृधिकृतेष्वनदितेः॥ ५० ॥

कः करत् करति कृधि कृत इत्येतेषु परतोऽनदितेर्विसर्जनीयस्य सकारादेशो भवति छन्दसि विषये। कः—विश्वतस्कः। करत्—विश्वतस्करत्। करति—पयस्करति। कृधि—उ॒रु ण॑स्कृधि (ऋ० ८.७५.११)। कृत—सदस्कृतम्। अनदितेरिति किम्? यथा॑ नो॒ अदि॑तिः कर॑त्[1] (ऋ० १.४३.२)॥

---

१ - 'कुत' इति मुद्रितेषु ।

पञ्चम्याः परावध्यर्थे॥ ५१ ॥

छन्दसीत्येव। पञ्चमीविसर्जनीयस्य सकारादेशो भवति परौ परतोऽध्यर्थे। दिवस्परि॑ प्रथ॒मं ज॑ज्ञे (ऋ० १०.४५.१)। अग्निः हिमव॑त॒स्परि॑ (शौ० सं० ४.६.६)। दिवस्परि॑ (ऋ० १.१२१.१०)। महस्परि। पञ्चम्या इति किम् ? अहि॑रिव भो॒गैः पर्ये॑ति बा॒हुम् (ऋ० ६.७५.१४)। परावि॑ति किम् ? एभ्यो वा एतल्लोकेभ्यः प्रजापतिः समैरयत्। अध्यर्थ इति किम् ? दिवस्पृ॑थि॒व्याः पर्यो॑ज॒ उद्भृ॑तम् (ऋ० ६.४७.२७)। अत्र परिः सर्वतोभावे, अध्यर्थ उपरिभावः॥

पातौ च बहुलम्॥ ५२ ॥

पातौ च धातौ परतः पञ्चमीविसर्जनीयस्य बहुलं सकार आदेशो भवति छन्दसि विषये। दिवस्पा॑तु (ऋ० १०.१५८.१)। राज्ञस्पातु। न च भवति—परिषदः पातु॥

षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु॥ ५३ ॥

षष्ठीविसर्जनीयस्य सकारादेशो भवति पति पुत्र पृष्ठ पार पद पयस् पोष इत्येतेषु परतः छन्दसि विषये। वा॒चस्पति॑ं वि॒श्वक॑र्माणमू॒तये॑ (ऋ० १०.८१.७)। पुत्र—दिवस्पु॒त्राय॒॑ सूर्या॑य (ऋ० १०.३७.१)। पृष्ठ—दिवस्पृ॒ष्ठे धाव॑मानं सुप॒॑र्णम् (शौ० सं० १३.२.३७)। पार—अग॑न्म॒॑ तम॑सस्पा॒रम् (मा० सं० १२.७३)। पद—इडस्प॒॑दे समि॑ध्यसे॒॑ (ऋ० १०.१६१.१)। पयस्—सूर्य॑ चक्षुर्दिवस्पयः। पोष—रा॒यस्पोष॑ं॒॑ यज॑मानेषु धारय (ऋ० १०.१२२.८)। षष्ठ्या इति किम् ? मनु॑ः पु॒त्रेभ्यो॑ दा॒यं व्य॑भज॒॑त् (तै० सं० ३.१.६.४)॥

इडाया वा॥ ५४ ॥

इडायाः षष्ठीविसर्जनीयस्य वा सकार आदेशो भवति पत्यादिषु परतश्छन्दसि विषये। इडायास्पतिः, इडायाः पतिः। इडा॑यास्पु॒त्रः (ऋ० ३.२९.३), इडायाः पुत्रः। इडायास्पृष्ठम्, इडायाः पृष्ठम्। इडायास्पारम्, इडायाः पारम्। इडा॑यास्प॒॑दम् (मा० सं० ४.२२), इडा॑यास्प॒॑दम् (तै० सं० १.२.५.१)। इडायास्पयः, इडायाः पयः। इडायास्पोषम्, इडायाः पोषम्॥

अपदान्तस्य मूर्धन्यः॥ ५५॥

---

१ - ' जा॒तम् ' इति शौ० सं० पाठः।
२ - दिवस्पय॒॑ः (ऋ० १०.११४.१)।
३ - ' धत्तम् ' इति बाल०।
४ - ' पदे ' इति तै० सं० पाठः।

पदाधिकारो निवृत्तः। अपदान्तस्येति मूर्धन्य इति चैतदधिकृतं वेदितव्यमा पादपरिसमाप्तेः। वक्ष्यति—'आदेशप्रत्यययोः' (८.३.५९)—सिषेव। सुष्वाप। अग्निषु। वायुषु। अपदान्तस्येति किम् ? अग्निस्तत्र। वायुस्तत्र। ष इत्येव सिद्धे मूर्धन्यग्रहणं ढकारार्थम्। अकृढ्वम्। चकृढ्वे॥

सहेः साडः सः॥ ५६ ॥

सहेर्धातोः साड्रूपस्य यः सकारस्तस्य मूर्धन्य आदेशो भवति। जलाषाट्। तुराषाट्। पृतनाषाट्। सहेरिति किम् ? सह डेन वर्तते सडः, तस्यापत्यं साडिः। साड्ग्रहणं किम् ? यत्रास्यैतद् रूपं तत्र यथा स्यात्। इह मा भूत्—तुरासाहम्। स इति किम् ? आकारस्य मा भूत्॥

इण्कोः॥ ५७ ॥

इण्कोरित्येतदधिकृतं वेदितव्यम्। इत उत्तरं यद् वक्ष्यामः, इणः कवर्गात् चेत्येवं तद् वेदितव्यम्। वक्ष्यति—'आदेशप्रत्यययोः' (८.३.५९)—सिषेव। सुष्वाप। अग्निषु। वायुषु। कर्तृषु। हर्तृषु। गीर्षु। धूर्षु। वाक्षु। त्वक्षु। इण्कोरिति किम् ? दास्यति। असौ॥

नुम्विसर्जनीयशर्व्यवायेऽपि॥ ५८ ॥

नुम्व्यवायेऽपि विसर्जनीयव्यवायेऽपि शर्व्यवायेऽपि इण्कोरुत्तरस्य सकारस्य मूर्धन्यादेशो भवति। व्यवायशब्दः प्रत्येकमभिसंबध्यते। नुम्व्यवाये तावत्—सर्पींषि। यजूंषि। हवींषि। विसर्जनीयव्यवाये—सर्पिःषु। यजुःषु। हविःषु। शर्व्यवाये—सर्पिष्षु। यजुष्षु। हविष्षु। नुमादिभिः प्रत्येकं व्यवाये षत्वमिष्यते, न समस्तैः। तेनेह न भवति—निंस्से, निंस्स्व इति। णिसि चुम्बन इत्येतस्यैतद् रूपम्। अत्र हि नुमा सकारेण च शरा व्यवधानम्॥

आदेशप्रत्यययोः॥ ५९ ॥

मूर्धन्य इति वर्तते, स इति च। आदेशप्रत्यययोरिति षष्ठी भेदेन संबध्यते। आदेशो यः सकारः, प्रत्ययस्य च यः सकारः इण्कोरुत्तरस्तस्य मूर्धन्यो भवत्यादेशः। आदेशस्य

---

१ - ' इत्येवम् ' इति मुद्रितेषु ।

२ - इतः प्राग् ' जलासाहम् ' इति पाठो मुद्रितेषु। स त्वयुक्त इति न्यासः।

३ - ' निंस्स्वः ' इत्यपपाठो है०।

४ - ' शरा च ' इति विपर्यस्तः पाठो है० तारा०।

तावत्—सिषेव। सुष्वाप। प्रत्ययस्य—अग्निषु। वायुषु। कर्तृषु। हर्तृषु। इन्द्रो मा वक्षत्, स देवा॒न् यक्षत् (ऋ० ३.४.३) इति व्यपदेशिवद्भावात् प्रत्ययस्येति षत्वं भवति। यजतेर्वहतेश्च पञ्चमलकारे परस्मैपदप्रथमैकवचन इकारलोपः, 'लेटोऽडाटौ' (३.४.६४) इत्यट्, 'सिब्बहुलं लेटि' (३.१.३४) इति सिप्, ततः सिद्धं यक्षत्, वक्षद् इति॥

शासिवसिघसीनां च॥ ६० ॥

शासि वसि घसि इत्येतेषां चेण्कोरुत्तरस्य सकारस्य मूर्धन्यो भवति। अन्वशिषत्, अन्वशिषताम्, अन्वशिषन्। शिष्टः। शिष्टवान्। वसि—उषितः। उषितवान्। उषित्वा। घसि—जक्षतुः, जक्षुः। 'घसिभसोः०' (६.४.१००) इत्युपधालोपः। अक्षन्॒ पि॒तरोऽमीमदन्त पि॒तरः (मा० सं० १६.३६)। अनादेशार्थं वचनम्। घसिर्यद्यप्यादेशः सकारस्त्वादेशो न भवति। इण्कोरित्येव—शास्ति। वसति। जघास॥

स्तौतिण्योरेव षण्यभ्यासात्॥ ६१ ॥

स्तौतेर्ण्यन्तानां च षभूते सनि परतोऽभ्यासादिण उत्तरस्य आदेशसकारस्य मूर्धन्यादेशो भवति। तुष्टूषति। ण्यन्तानाम्—सिषेचयिषति। सिषञ्जयिषति। सुष्वापयिषति। सिद्धे सत्यारम्भो नियमार्थः, स्तौतिण्योरेव षण्यभ्यासाद् यथा स्याद्, अन्यस्य मा भूत्—सिसिक्षति। सुसूषते । एवकारकरणमिष्टतोऽवधारणार्थम्। स्तौतिण्योः षण्येवेति हि विज्ञायमाने तुष्टावेत्यत्र न स्यात्, इह च स्यादेव—सिसिक्षतीति। षणीति किम् ? अन्यत्र नियमो मा भूत्—सिषेच। को विनतेऽनुरोधः ? अविनते नियमो मा भूत्—सुषुप्सति। तिष्ठासति। कः सानुबन्धेऽनुरोधः ? षशब्दमात्रे नियमो मा भूत्—सुषुपिष इन्द्रम्। अभ्यासादिति किम् ? अभ्यासाद् या प्राप्तिस्तस्या नियमो यथा स्यात्, धातोर्या प्राप्तिस्तस्या नियमो मा भूत्—प्रतीषिषति। अधीषिषति॥

सः स्विदिस्वदिसहीनां च॥ ६२ ॥

स्विदि स्वदि सहि इत्येतेषां ण्यन्तानां सनि षभूते परतोऽभ्यासादुत्तरस्य सकारस्य सकारादेशो भवति। स्विदि—सिस्वेदयिषति। स्वदि—सिस्वादयिषति। सहि—सिसाहयिषति। सकारस्य सकारवचनं मूर्धन्यनिवृत्त्यर्थम्॥

---

१ - ' गमहनजनखनघसाम्०' (६.४.६८) इति पाठोऽत्र युक्तः स्यात्।

२ - ' अक्षन्नमीमदन्त पितरः ' इति बाल०। अक्षन्॒नमीमदन्त॒ हि (ऋ० १.८२.२)।

३ - ' सिषेवयिषति ' इति मुद्रितेषु ।

४ - ' सुसूषति ' इति मुद्रितेषु ।

५ - तु० — सु॑षुपुषं॑ इन्द्रि॒यम् (तै० सं० ६.१.४.७)।

प्राक् सितादड्व्यवायेऽपि॥ ६३ ॥

सेवसित० (८.३.७०) इति वक्ष्यति। प्राक् सितसंशब्दनाद् यानित ऊर्ध्वमनुक्रमिष्यामस्तत्राड्व्यवायेऽपि मूर्धन्यो भवतीत्येवं वेदितव्यम्, अपिशब्दादनड्-व्यवायेऽपि। वक्ष्यति—'उपसर्गात् सुनोतिसुवति ०' (८.३.६५) इति षत्वम्। अभिषुणोति। परिषुणोति। विषुणोति। निषुणोति। अभ्यषुणोत्। पर्यषुणोत्। व्यषुणोत्। न्यषुणोत्॥

स्थादिष्वभ्यासेन चाभ्यासस्य॥ ६४ ॥

प्राक् सितादिति वर्तते। 'उपसर्गात् सुनोति०' (८.३.६५) इत्यत्र स्थासेनयसेधेति स्थादयः, तेषु स्थादिषु प्राक् सितसंशब्दनाद् अभ्यासेन व्यवाये मूर्धन्यो भवति, अभ्यास-सकारस्य च भवतीत्येवं वेदितव्यम्। अभ्यासेन व्यवाये अषोपदेशार्थं च—अभिषिषेणयिषति, परिषिषेणयिषति। अवर्णान्ताभ्यासार्थं च—अभितष्टौ, परितष्टौ। षणि प्रतिषेधार्थं च—अभिषिषिक्षति, परिषिषिक्षति। अभ्यासस्येति वचनं नियमार्थम्—स्थादिष्वेवाभ्याससकारस्य मूर्धन्यो भवति, नान्यत्र। अभिसुसूषति। अभिसिषासति॥

उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिच-सञ्जस्वञ्जाम् ॥ ६५॥

मूर्धन्य इति वर्तते, स इति च। उपसर्गस्थाद् निमित्तादुत्तरस्य सुनोति सुवति स्यति स्तौति स्तोभति स्था सेनय सेध सिच सञ्ज स्वञ्ज इत्येतेषां सकारस्य मूर्धन्यादेशो भवति। सुनोति—अभिषुणोति। परिषुणोति। अभ्यषुणोत्। पर्यषुणोत्। सुवति—अभिषुवति। परिषुवति। अभ्यषुवत्। पर्यषुवत्। स्यति—अभिष्यति। परिष्यति। अभ्यष्यत्। पर्यष्यत्। स्तौति—अभिष्टौति। परिष्टौति। अभ्यष्टौत्। पर्यष्टौत्। स्तोभति—अभिष्टोभते। परिष्टोभते। अभ्यष्टोभत। पर्यष्टोभत। स्था—अभिष्ठास्यति। परिष्ठास्यति। अभ्यष्ठात्। पर्यष्ठात्। अभितष्टौ। परितष्टौ। सेनय—अभिषेणयति। परिषेणयति। अभ्यषेणयत्। पर्यषेणयत्। अभिषिषेणयिषति। परिषिषेणयिषति। सेध—अभिषेधति। परिषेधति। अभ्यषेधत्। पर्यषेधत्। सिच—अभिषिञ्चति। परिषिञ्चति। अभ्यषिञ्चत्। पर्यषिञ्चत्। अभिषिषिक्षति। परिषिषिक्षति। सञ्ज—अभिषजति। परिषजति। अभ्यषजत्। पर्यषजत्। अभिषिषङ्क्षति। परिषिषङ्क्षति। स्वञ्ज—अभिष्वजते। परिष्वजते। अभ्यष्वजत।

---

१ - 'यदितः' इति बाल०।

२ - 'तद्' इत्यधिकं मुद्रितेषु।

३ - 'परितष्टौ' इत्यधिकं बाल० तारा०।

पर्यष्वजत। अभिषिष्वङ्क्षते। परिषिष्वङ्क्षते। सेध इति शब्विकरणनिर्देशः सिध्यति-निवृत्त्यर्थः। उपसर्गादिति किम् ? दधि सिञ्चति। मधु सिञ्चति। निर्गताः सेचका अस्माद् देशाद् निःसेचको देश इति नायं सिचेरुपसर्गः। अभिसावकीयतीत्यत्रापि न सुनोतिं प्रति क्रियायोगः। किं तर्हि ? सावकीयं प्रति। अभिषावयतीत्यत्र तु सुनोतिमेव प्रति क्रियायोगो न सावयतिं प्रतीति षत्वं भवति॥

सदिरप्रतेः॥ ६६ ॥

सदेः सकारस्य उपसर्गस्थाद् निमित्तादप्रतेरुत्तरस्य मूर्धन्य आदेशो भवति। निषीदति। विषीदति। न्यषीदत्। व्यषीदत्। निषसाद। विषसाद। अप्रतेरिति किम् ? प्रतिसीदति॥

स्तन्भेः॥ ६७ ॥

उपसर्गादिति वर्तते। स्तन्भेः सकारस्य उपसर्गस्थाद् निमित्तादुत्तरस्य मूर्धन्य आदेशो भवति। अभिष्टभ्नाति। परिष्टभ्नाति। अभ्यष्टभ्नात्। पर्यष्टभ्नात्। अभितष्टम्भ। परितष्टम्भ। अप्रतेरित्येतदिह नानुवर्तते, तेनैतदपि भवति—प्रतिष्टभ्नाति। प्रत्यष्टभ्नात्। प्रतितष्टम्भ॥

अवाच्चालम्बनाविदूर्ययोः॥ ६८ ॥

अवशब्दादुपसर्गादुत्तरस्य स्तन्भेः सकारस्य मूर्धन्य आदेशो भवत्यालम्बनेऽर्थ आविदूर्ये च। आलम्बनमाश्रयणम्। अविदूरस्य भाव आविदूर्यम्। आलम्बने तावत्—अवष्टभ्यास्ते। अवष्टभ्य तिष्ठति। आविदूर्ये—अवष्टब्धा सेना। अवष्टब्धा शरत्। आलम्बनाविदूर्ययोरिति किम् ? अवस्तब्धो वृषलः शीतेन। अनिणर्थ[1] आरम्भः॥

वेश्च स्वनो भोजने॥ ६९ ॥

वेरुपसर्गादवाच्चोत्तरस्य भोजनार्थे स्वनतेः सकारस्य मूर्धन्यादेशो भवति। विष्वणति। व्यष्वणत्। विषष्वाण। अवष्वणति। अवाष्वणत्। अवषष्वाण। अभ्यवहारक्रिया-विशेषोऽभिधीयते, यत्र स्वननमस्ति। भोजन इति किम् ? विस्वनति मृदङ्गः॥

परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्॥ ७० ॥

परि नि वि इत्येतेभ्य उपसर्गेभ्य उत्तरेषां सेव सित सय सिवु सह सुट् स्तु स्वञ्ज इत्येतेषां सकारस्य मूर्धन्य आदेशो भवति। परिषेवते। निषेवते। विषेवते। पर्यषेवत।

---

१ - 'अनिगर्थः' इत्यपपाठो है० तारा०।

न्यषेवत। व्यषेवत। परिषिषेविषते। निषिषेविषते। विषिषेविषते। सित—परिषितः। निषितः। विषितः। सय—परिषयः। निषयः। विषयः। सिव्—परिषीव्यति। निषीव्यति। विषीव्यति। पर्यषीव्यत्। न्यषीव्यत्। व्यषीव्यत्। पर्यसीव्यत्। न्यसीव्यत्। व्यसीव्यत्। सह—परिषहते। निषहते। विषहते। पर्यषहत। न्यषहत। व्यषहत। पर्यसहत। न्यसहत। व्यसहत। सुट्—परिष्करोति। पर्यष्करोत्। पर्यस्करोत्। स्तु—परिष्टौति। निष्टौति। विष्टौति। पर्यष्टौत्। न्यष्टौत्। व्यष्टौत्। पर्यस्तौत्। न्यस्तौत्। व्यस्तौत्। स्वञ्ज—'दंशसञ्जस्वञ्जाम् ०' (६.४.२५) इति नलोपः। परिष्वजते। निष्वजते। विष्वजते। पर्यष्वजत, पर्यस्वजत। पूर्वेणैव सिद्धे स्तुस्वञ्जिग्रहणमुत्तरार्थम्, अड्व्यवाये विभाषा यथा स्यात्॥

सिवादीनां वाड्व्यवायेऽपि॥ ७१ ॥

अनन्तरसूत्रे सिवुसहसुट्स्तुस्वञ्जाम् (८.३.७०) इति सिवादयः। सिवादीनामड्-व्यवायेऽपि परिनिविभ्य उत्तरस्य सकारस्य वा मूर्धन्यो भवति। तथा चैवोदाहृतम्॥

अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु॥ ७२ ॥

अनु वि परि अभि नि इत्येतेभ्य उत्तरस्य स्यन्दतेरप्राणिषु सकारस्य वा मूर्धन्यादेशो भवति। अनुष्यन्दते। विष्यन्दते। परिष्यन्दते। अभिष्यन्दते तैलम्। निष्यन्दते। अनुस्यन्दते। विस्यन्दते। परिस्यन्दते। अभिस्यन्दते। निस्यन्दते। अप्राणिष्विति किम्? अनुस्यन्दते मत्स्य उदके। प्राण्यप्राणिविषयस्यापि स्यन्दतेरयं विकल्पो भवति। अनुष्यन्देते मत्स्योदके, अनुस्यन्देते। अप्राणिष्विति पर्युदासोऽयम्, न प्रसज्यप्रतिषेधः॥

वेः स्कन्देरनिष्ठायाम्॥ ७३ ॥

वेरुपसर्गादुत्तरस्य स्कन्देः सकारस्य मूर्धन्यो वा भवत्यनिष्ठायाम्। विष्कन्ता, विस्कन्ता। विष्कन्तुम्, विस्कन्तुम्। विष्कन्तव्यम्, विस्कन्तव्यम्। अनिष्ठायामिति किम्? विस्कन्नः॥

परेश्च॥ ७४ ॥

परिशब्दात् चोत्तरस्य स्कन्देः सकारस्य वा मूर्धन्यो भवति। परिष्कन्ता। परिष्कन्तुम्। परिष्कन्तव्यम्। परिस्कन्ता। परिस्कन्तुम्। परिस्कन्तव्यम्। पृथग्योगकरणसामर्थ्याद-निष्ठायामित्येतद् नानुवर्तते। परिष्कण्णः, परिस्कन्नः॥

---

१ - 'च' इति नास्ति है०।

परिस्कन्दः प्राच्यभरतेषु॥ ७५ ॥

परिस्कन्द इति मूर्धन्याभावो निपात्यते प्राच्यभरतेषु प्रयोगविषयेषु। पूर्वेण मूर्धन्ये प्राप्ते तदभावो निपात्यते। परिस्कन्दः। अन्यत्र परिष्कन्दः। अचि निपातनम्। अथवा निष्ठातकारस्य लोपः। भरतग्रहणं प्राच्यविशेषणम्॥

स्फुरतिस्फुलत्योर्निर्निविभ्यः॥ ७६ ॥

स्फुरतिस्फुलत्योः सकारस्य निस् नि वि इत्येतेभ्य उत्तरस्य वा मूर्धन्यादेशो भवति। स्फुरति—निष्फुरति, निस्स्फुरति। निष्फुरति, निस्फुरति। विष्फुरति, विस्फुरति। स्फुलति—निष्फुलति, निस्स्फुलति। निष्फुलति, निस्फुलति। विष्फुलति, विस्फुलति॥

वेः स्कभ्नातेर्नित्यम्॥ ७७ ॥

वेरुत्तरस्य स्कभ्नातेः सकारस्य नित्यं मूर्धन्यादेशो भवति। विष्कभ्नाति। विष्कम्भिता। विष्कम्भितुम्। विष्कम्भितव्यम्॥

इणः षीध्वंलुङ्लिटां धोऽङ्गात्॥ ७८ ॥

मूर्धन्य इति वर्तते। इणन्तादङ्गादुत्तरेषां षीध्वंलुङ्लिटां यो धकारस्तस्य मूर्धन्यादेशो भवति। च्योषीढ्वम्। प्लोषीढ्वम्। लुङ्—अच्योढ्वम्। अप्लोढ्वम्। लिट्—चकृढ्वे। ववृढ्वे। 'इण्कोः' (८.३.५७) इति वर्तमाने पुनरिण्ग्रहणं कवर्गनिवृत्त्यर्थम्। पक्षीध्वम्। यक्षीध्वम्। षीध्वंलुङ्लिटामिति किम् ? स्तुध्वे । अस्तुध्वम्। अङ्गादिति किम् ? परिवेविषीध्वम्। अर्थवद्ग्रहणाद् (परि० १४) अप्येतत् सिद्धम् ? तत् तु नाश्रितम्॥

विभाषेटः॥ ७९ ॥

इणः परस्मादिट उत्तरेषां षीध्वंलुङ्लिटां यो धकारस्तस्य मूर्धन्यादेशो भवति विभाषा। लविषीढ्वम्, लविषीध्वम्। पविषीढ्वम्, पविषीध्वम्। लुङ्—अलविढ्वम्, अलविध्वम्। लिट्—लुलुविढ्वे, लुलुविध्वे। इण इत्येव—आसिषीध्वम्। अथेह कथं भवितव्यम्—उपदिदीयिध्वे ? केचिदाहुः—इणन्तादङ्गादुत्तरस्येट आनन्तर्यं युटा व्यवहितमिति न भवितव्यं ढत्वेनेति। अपरेषां दर्शनम्—अङ्गादिति निवृत्तम्, इण इत्यनुवर्तते, ततश्च यकारादेव इणः परोऽनन्तर इडिति पक्षे भवितव्यं मूर्धन्येनेति॥

समासेऽङ्गुलेः सङ्गः॥ ८० ॥

---

१ - ' स्तुध्वम् ' इति न्यासे।

सङ्गसकारस्याङ्गुलेरुत्तरस्य मूर्धन्य आदेशो भवति समासे। अङ्गुलेः सङ्गः अङ्गुलिषङ्गः। अङ्गुलिषङ्गा यवागूः। अङ्गुलिषङ्गो गाः सादयति। समास इति किम्? अङ्गुलेः सङ्गं पश्य॥

भीरोः स्थानम्॥ ८१ ॥

स्थानसकारस्य भीरोरुत्तरस्य मूर्धन्यादेशो भवति। भीरुष्ठानम्। समास इत्येव—भीरोः स्थानं पश्य॥

अग्नेः स्तुत्स्तोमसोमाः॥ ८२ ॥

अग्नेरुत्तरस्य स्तुत् स्तोम सोम इत्येतेषां सकारस्य मूर्धन्यादेशो भवति समासे। अग्निष्टुत्। अग्निष्टोमः। अग्नीषोमौ। अग्नेर्दीर्घात् सोमस्येष्यते। तेनेह न भवति—अग्निसोमौ माणवकौ। तथा च ज्योतिरग्निः, सोमो लताविशेषः। अग्निसोमौ तिष्ठतः। समास इत्येव—अग्नेः स्तोमः॥

ज्योतिरायुषः स्तोमः॥ ८३ ॥

ज्योतिस् आयुस् इत्येताभ्यामुत्तरस्य स्तोमसकारस्य मूर्धन्यादेशो भवति समासे। ज्योतिष्टोमः। आयुष्टोमः। समास इत्येव—ज्योतिः स्तोमं दर्शयति॥

मातृपितृभ्यां स्वसा॥ ८४ ॥

मातृ पितृ इत्येताभ्यामुत्तरस्य स्वसृसकारस्य समासे मूर्धन्यादेशो भवति। मातृष्वसा। पितृष्वसा॥

मातुःपितुर्भ्यामन्यतरस्याम्॥ ८५ ॥

मातुर् पितुर् इत्येताभ्यामुत्तरस्य स्वसृशब्दस्यान्यतरस्यां मूर्धन्यादेशो भवति समासे। मातुःष्वसा, मातुःस्वसा। पितुःष्वसा, पितुःस्वसा। मातुःपितुरिति रेफान्तयोरेतद्ग्रहणम्। एकदेशविकृतस्यानन्यत्वात् (परि० ३७) विसर्जनीयान्तात् सकारान्तात् च षत्वं भवति। समास इत्येव—वाक्ये मा भूत्—मातुः स्वसेत्येव नित्यं भवति॥

---

१ - ' अङ्गुले ' इति बाल०।
२ - ' भीरो ' इति बाल०।
३ - ' अग्नीषोमः ' इत्यपपाठो मुद्रितेषु।
४ - ' खपरे शरि विसर्जनीयलोपः' (८.३.३६ वा०)।

अभिनिसः स्तनः शब्दसंज्ञायाम्॥ ८६ ॥

अभिनिस् इत्येतस्मादुत्तरस्य स्तनतिसकारस्य मूर्धन्यादेशो भवत्यन्यतरस्यां शब्दसंज्ञायां गम्यमानायाम्। अभिनिष्टानो वर्णः, अभिनिस्तानो वर्णः। अभिनिष्टानो विसर्जनीयः, अभिनिस्तानो विसर्जनीयः। शब्दसंज्ञायामिति किम् ? अभिनिस्स्तनति मृदङ्गः। समास इत्यतः प्रभृति निवृत्तम्॥

उपसर्गप्रादुर्भ्यामस्तिर्यच्परः॥ ८७ ॥

उपसर्गस्थाद् निमित्तात् प्रादुस्शब्दात् चोत्तरस्य यकारपरस्याचूपरस्य चास्तिसकारस्य मूर्धन्यो भवति। अभिषन्ति। निषन्ति। विषन्ति। प्रादुःषन्ति। अभिष्यात्। निष्यात्। विष्यात्। प्रादुःष्यात्। उपसर्गादिति किम् ? दधि स्यात्। मधु स्यात्। अस्तीति किम्? अनुसृतम्। विसृतम्। अथासत्यपि अस्तिग्रहणे सकारमेव प्रत्युपसर्ग आश्रीयते, प्रादुःशब्दस्य च कृभ्वस्तिष्वेव प्रयोग इत्यन्यत्राप्रसङ्गः ? तथाप्येतत् प्रत्युदाहर्तव्यम्—अनुसूते अनुसूः, अनुस्वोऽपत्यम् आनुसेयः। शुभ्रादित्वाद् ढक् (४.१.१२३)। 'ढे लोपोऽकद्र्वाः' (६.४.१४७) इत्युवर्णलोपः। यच्पर इति किम् ? निस्तः। विस्तः। प्रादुःस्तः॥

सुविनिर्दुर्भ्यः सुपिसूतिसमाः॥ ८८ ॥

सु वि निर् दुर् इत्येतेभ्य उत्तरस्य सुपि सूति सम इत्येतेषां सकारस्य मूर्धन्यादेशो भवति। सुपीति स्वपिः कृतसंप्रसारणो गृह्यते। सुषुप्तः। विषुप्तः। निःषुप्तः। दुःषुप्तः। सूतीति स्वरूपग्रहणम्। सुषूतिः। विषूतिः। निःषूतिः। दुःषूतिः। सम—सुषमम्। विषमम्। निःषमम्। दुःषमम्।

सुपेः षत्वं स्वपेर्मा भूद्विसुष्वापेति केन न।
हलादिशेषान्न सुपिरिष्टं पूर्वं प्रसारणम्॥ १॥
स्थादीनां नियमो नात्र प्राक्सितादुत्तरः सुपिः।
अनर्थके विषुषुपुः षुपिभूतो द्विरुच्यते॥ २॥

'पूर्वत्रासिद्धीयमद्विर्वचने' (परि० ११७) इति कृते षत्वे ततो द्विर्वचनम्॥

---

१ - ' खर्परे शरि विसर्जनीयलोपः' (८.३.३६ वा०)।

२ - शुभ्रादिषु न पठ्यते। 'चतुष्पाद्भ्यो ढञ्' (४.१.१३५) इति कैयटः।

३ - ' सुपिभूतः ' इति मुद्रितेषु।

निनदीभ्यां स्नातेः कौशले॥ ८९ ॥

नि नदी इत्येताभ्यामुत्तरस्य स्नातिसकारस्य मूर्धन्यादेशो भवति कौशले गम्यमाने। निष्णातः कटकरणे। निष्णातो रज्जुवर्तने। नद्यां स्नातीति नदीष्णः। 'सुपि स्थः' (३. २.४) इत्यत्र सुपीति योगविभागात् कप्रत्ययः। कौशल इति किम् ? निस्नातः। नद्यां स्नातो नदीस्नात इति॥

सूत्रं प्रतिष्णातम्॥ ९० ॥

प्रतिष्णातमिति निपात्यते, सूत्रं चेद् भवति। प्रतिष्णातं सूत्रम्। शुद्धमित्यर्थः। प्रतिस्नातमित्येवान्यत्र॥

कपिष्ठलो गोत्रे॥ ९१ ॥

कपिष्ठल इति निपात्यते गोत्रविषये। कपिष्ठलो नाम स यस्य कापिष्ठलिः पुत्रः। गोत्र इति किम् ? कपेः स्थलं कपिस्थलम्॥

प्रष्ठोऽग्रगामिनि॥ ९२ ॥

प्रष्ठ इति निपात्यतेऽग्रगामिन्यभिधेये। प्रतिष्ठत इति प्रष्ठोऽश्वः। अग्रतो गच्छतीत्यर्थः। अग्रगामिनीति किम् ? प्रस्थे हिमवतः पुण्ये। प्रस्थो व्रीहीणाम्॥

वृक्षासनयोर्विष्टरः॥ ९३ ॥

विष्टर इति निपात्यते वृक्ष आसने च वाच्ये। विपूर्वस्य स्तृणातेः षत्वं निपात्यते। विष्टरो वृक्षः। विष्टरमासनम्। वृक्षासनयोरिति किम् ? औलपिवाक्यस्य विस्तरः॥

छन्दोनाम्नि च॥ ९४ ॥

विष्टार इति निपात्यते। विपूर्वात् स्तृ इत्येतस्माद् धातोः 'छन्दोनाम्नि च' (३.३. ३४) इत्येवं विहितो घञ् इति विष्टर इत्यपि प्रकृते विष्टार इत्यत्र विज्ञायते। विष्टारपङ्क्तिः छन्दः। विष्टारबृहती छन्दः। छन्दोनाम्नीति किम् ? पटस्य विस्तारः॥

गवियुधिभ्यां स्थिरः॥ ९५ ॥

गवियुधिभ्यामुत्तरस्य स्थिरसकारस्य मूर्धन्यादेशो भवति। गविष्ठिरः। युधिष्ठिरः।

---

१ - ' यस्य सः ' इति मुद्रितेषु व्यत्यस्तः पाठः।

२ - ' विष्टारो बृहती ' इति मुद्रितेषु।

गोशब्दादहलन्तादपि एतस्मादेव निपातनात् सप्तम्या अलुग् भवति॥

विकुशमिपरिभ्यः स्थलम्॥ ६६ ॥

वि कु शमि परि इत्येतेभ्य उत्तरस्य स्थलसकारस्य मूर्धन्यादेशो भवति। विष्ठलम्। कुष्ठलम्। शमिष्ठलम्। परिष्ठलम्॥

अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्कवङ्गुमञ्जिपुञ्जिपरमे-बर्हिर्दिव्यग्निभ्यः स्थः॥ ६७ ॥

अम्ब आम्ब गो भूमि सव्य अप द्वि त्रि कु शेकु शङ्कु अङ्गु मञ्जि पुञ्जि परमे बर्हिस् दिवि अग्नि इत्येतेभ्य उत्तरस्य स्थशब्दसकारस्य मूर्धन्यादेशो भवति। अम्बष्ठः। आम्बष्ठः। गोष्ठः। भूमिष्ठः। सव्येष्ठः। अपष्ठः। द्विष्ठः। त्रिष्ठः। कुष्ठः। शेकुष्ठः। शङ्कुष्ठः। अङ्गुष्ठः। मञ्जिष्ठः। पुञ्जिष्ठः। परमेष्ठः। बर्हिष्ठः। दिविष्ठः। अग्निष्ठः॥ स्थास्थिन्स्थृणामिति वक्तव्यम्॥ सव्येष्ठाः। परमेष्ठी। सव्येष्ठृसारथिः॥

सुषामादिषु च॥ ६८ ॥

सुषामादिषु शब्देषु सकारस्य मूर्धन्यादेशो भवति। शोभनं साम यस्यासौ सुषामा ब्राह्मणः। दुष्षामा। निष्षामा। निष्षेधः। दुष्षेधः। सुशब्दस्य कर्मप्रवचनीयसंज्ञकत्वाद् निर्दुर्शब्दयोश्च क्रियान्तरविषयत्वादनुपसर्गत्वे सति पाठोऽयम्। 'सेधतेर्गतौ' (८.३.१११) इति वा प्रतिषेधबाधनार्थः। सुषन्धिः। दुष्षन्धिः। निष्षन्धिः। सुष्ठु। दुष्ठु। तिष्ठतेरुणादिषु (प० उ० १.२५) एतौ व्युत्पाद्येते। गौरिषक्थः संज्ञायाम् (ग० सू० १८२)। ङ्यापोः संज्ञाछन्दसोर्बहुलम् (६.३.६३) इति पूर्वपदस्य ह्रस्वत्वम्। प्रतिष्णिका। प्रतिष्णाशब्दादयं कन् प्रत्ययः। जलाषाहम्। नौषेचनम्। दुन्दुभिषेवणम्। एति संज्ञायामगात् (ग० सू० १८३)। एकारपरस्य सकारस्य मूर्धन्यादेशो भवतीण्कोरुत्तरस्यागकारात् परस्य संज्ञायां विषये। हरिषेणः। वारिषेणः। जानुषेणी। एतीति किम् ? हरिसक्थम्। संज्ञायामिति किम् ? पृथ्वी सेना यस्य स पृथुसेनो राजा। अगादिति किम् ? विष्वक्सेनः। इण्कोरित्येव—सर्वसेनः। नक्षत्राद् वा (ग० सू० १८४)। नक्षत्रवाचिनः शब्दादुत्तरस्य सकारस्य वा एति संज्ञायामगकाराद् मूर्धन्यो भवति। रोहिणीषेणः, रोहिणीसेनः। भरणीषेणः, भरणीसेनः। अगकारादित्येव—शतभिषक्सेनः। अविहितलक्षणो मूर्धन्यः सुषामादिषु द्रष्टव्यः॥

---

१ - 'सव्येष्ठा सारथिः' इति पद०। तु०—सव्येष्ठृसारथी (श० ब्रा० ५.३.१.८)।

ह्रस्वात् तादौ तद्धिते॥ ९९ ॥

ह्रस्वादुत्तरस्य सकारस्य मूर्धन्यादेशो भवति तादौ तद्धिते परतः। तरप् तमप् तय त्व तल् तस् त्यप् एतानि प्रयोजयन्ति। तरप्—सर्पिष्टरम्। यजुष्टरम्। तमप्—सर्पिष्टमम्। यजुष्टमम्। तय—चतुष्टये ब्राह्मणानां निकेताः। त्व—सर्पिष्ट्वम्। यजुष्ट्वम्। तल्—सर्पिष्टा। यजुष्टा। तस्—सर्पिष्टः। यजुष्टः। त्यप्—आविष्ट्यो वर्धते (ऋ० १.९५.५)। ह्रस्वादिति किम् ? गीस्तरा। धूस्तरा। तादाविति किम् ? सर्पिस्साद् भवति। प्रत्ययसकारस्य 'सात्पदाद्योः' (८.३.१०९) इति सत्यपि प्रतिषेधे प्रकृतिसकारस्य स्यात्। तद्धित इति किम्? सर्पिस्तरति ॥ तिङन्तस्य प्रतिषेधो वक्तव्यः॥ भिन्द्युस्तराम्। छिन्द्युस्तराम्॥

निसस्तपतावनासेवने॥ १०० ॥

निसः सकारस्य मूर्धन्यादेशो भवति तपतौ परतोऽनासेवनेऽर्थे। आसेवनं पुनः पुनः करणम्। निष्टपति सुवर्णम्। सकृदग्निं स्पर्शयतीत्यर्थः। अनासेवन इति किम् ? निस्तपति सुवर्णं सुवर्णकारः। पुनः पुनरग्निं स्पर्शयतीत्यर्थः। निष्टप्तं रक्षो निष्टप्ता अरातयः (मा० सं० १.७) इत्यत्र सदप्यासेवनं न विवक्ष्यते, छान्दसो वा वर्णविकारः॥

युष्मत्तत्ततक्षुःष्वन्तःपादम्॥ १०१ ॥

युष्मत् तत् ततक्षुस् इत्येतेषु तकारादिषु परतः सकारस्य मूर्धन्यादेशो भवति, स चेत् सकारोऽन्तःपादं भवति। युष्मदादेशास्त्वम्, त्वाम्, ते, तव। अग्निष्ट्वं नामासीत्। त्वा—अग्निष्ट्वा वर्धयामसि। ते—अग्निष्टे विश्वमानय। तव—अप्स्वग्ने सधिष्टव (ऋ० ८.४३.६)। तत्—अग्निष्टद्विश्व मापृणाति (ऋ० १०.२.४)। ततक्षुस्—द्यावापृथिवी निष्टतक्षुः (ऋ० १०.३१.७)। अन्तःपादमिति किम् ? यन्मं आत्मनो मिन्दाभूदघ्नस्तत्पुनराहार्जातवेदा विचर्षणिः (तै० सं० ३.२.५.४)॥

यजुष्येकेषाम्॥ १०२ ॥

यजुषि विषये युष्मत्तत्ततक्षुःषु परत एकेषामाचार्याणां मतेन सकारस्य मूर्धन्यादेशो भवति। अर्चिर्भिष्ट्वम् (मा० सं० १२.३२), अर्चिर्भिस्त्वम्। अग्निष्टेऽग्रम्, अग्निस्तेऽग्रम् (तै० सं० ३.५.६.२)। अग्निष्टत् (तै० सं० १.१.१४.५), अग्निस्तत् (तै० सं० ३.२.५.४)। अर्चिर्भिष्टतक्षुः, अर्चिर्भिस्ततक्षुः॥

स्तुतस्तोमयोश्छन्दसि॥ १०३ ॥

एकेषामिति वर्तते। स्तुत स्तोम इत्येतयोः सकारस्य छन्दसि विषये मूर्धन्यादेशो भवत्येकेषामाचार्याणां मतेन। त्रिभिष्टुतस्य, त्रिभिस्तुतस्य। गोष्टोमं (तै० सं० ७.४.११.१) षोडशिनम्, गोस्तोमं षोडशिनम् (तु०—आ० श्रौ० ६.५.२)। पूर्वपदादित्येव सिद्धे प्रपञ्चार्थमिदम्॥

पूर्वपदात्॥ १०४ ॥

छन्दसीति वर्तते, एकेषामिति च। पूर्वपदस्थाद् निमित्तादुत्तरस्य सकारस्य मूर्धन्यादेशो भवति छन्दसि विषय एकेषामाचार्याणां मतेन। द्विष्न्धिः (मै० सं० ३.८.२), द्विसन्धिः। त्रिष्न्धि[1]ः (मै० सं० ३.८.२), त्रिसन्धिः। मधुष्ठानम् , मधुस्थानम्। द्विषाहस्रं चिन्वीत (तै० सं० ५.६.८.२), द्विसाहस्रं चिन्वीत। असमासेऽपि यत् पूर्वपदं तदपीह गृह्यते। त्रिःषमृद्धत्वाय, त्रिःसमृद्धत्वाय॥

सुञः॥ १०५ ॥

सुञिति निपात इह गृह्यते, तस्य पूर्वपदस्थाद् निमित्तादुत्तरस्य मूर्धन्यादेशो भवति छन्दसि विषये। अ[1]भी षु ण[1]ः सखीनाम् (ऋ० ४.३१.३)। ऊ[1]र्ध्वऊ[1] षुणं ऊ[1]तये[1] (ऋ० १.३६.१३)॥

सनोतेरनः॥ १०६ ॥

सनोतेरनकारान्तस्य सकारस्य मूर्धन्यादेशो भवति। गोषाः (ऋ० ६.२.१०)। नृषाः (ऋ० ६.२.१०)। अन इति किम् ? गोसनिं वाचमुदेय[1]म् (शौ० सं० ३.२०.१०)। पूर्वपदादित्येव सिद्धे नियमार्थमिदम्। अत्र केचित् सवनादिपाठाद् गोसनिर्नियमस्य फलं न भवतीति सिसानयिषतीति प्रत्युदाहरन्ति। सिसनिषतेरप्रत्ययः, सिसनीरित्यपरे॥

सहेः पृतनर्ताभ्यां च॥ १०७ ॥

---

१ - नृभिष्टुतस्य[1] (मै० सं० १.३.३६)।
२ - ' परस्य ' इति है०।
३ - मधुष्ठा[2]लम् (मै० सं० १.११.७)।
४ - त्रिष्षमृद्धत्वाय[1] (तै० सं० २.४.११.५), तु० — ऐ० ब्रा० २.१६।
५ - ' इकः सुञीति दीर्घः। नश्च धातुस्थोरुषुभ्य इति णत्वम् ' इत्यधिकं बाल० ।
६ - ' वाचमुदीरयन् ' इति बाल०।

पृतना ऋत इत्येताभ्यामुत्तरस्य सहिसकारस्य मूर्धन्यादेशो भवति। पृतनाषाहम् (ऋ० ६.७२.५)। ऋताषाहम्। केचित् सहेः इति योगविभागं कुर्वन्ति। ऋतीषहम् (ऋ० ६.१४.४) इत्यत्रापि यथा स्यात्। ऋतिशब्दस्य पूर्वपदस्य 'संहितायाम्' (६.३.११६) एतद् दीर्घत्वम् , षत्वं च। अवग्रहे तु ऋति सहम् इत्येव भवति। चकारोऽनुक्तसमुच्चयार्थः। तेन ऋतीषहम् (ऋ० ६.१४.४) इति सिद्धम्॥

न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम्॥ १०८ ॥

रेफपरस्य सकारस्य सृपि सृजि स्पृशि स्पृहि सवनादीनां च मूर्धन्यो न भवति। रपर—विस्रंसिकायाः कांड्डाभ्यां जुहोति (मै० सं० २.६.१)। विस्रब्धः कथयति। सृपि—पुरा क्रूरस्य विसृपः (मा० सं० १.२८)। सृजि—वाचो विसर्जनात्। स्पृशि—दिंवि-स्पृशम् (ऋ० १.१४२.८)। स्पृहि—निस्पृहं कथयति। सवनादीनाम्—सवनेसवने। सूतेसूते। सामेसामे। सवनमुखेसवनमुखे। किं स्यतीति किंसंकिंसम्। अनुसवनमनुसवनम्। गोसनिं (शौ० सं० ३.२०.१०) गोसनिम्। अश्वसनिमश्वसनिम्। 'पूर्वपदात्' (८.३.१०४) इति प्राप्तेः प्रतिषेधः। अश्वसनिग्रहणमनिणोऽपि षत्वमस्तीति ज्ञापनार्थम्। तेन जलाषाहमश्वषाहमित्येतत् सिद्धं भवति। क्वचिदेवं गणपाठः—सवनेसवने। अनुसवनेऽनुसवने। संज्ञायां बृहस्पतिसवः। शकुनिसवनम्। सोमेसोमे। सूतेसूते। संवत्सरेसंवत्सरे। किंसंकिंसम्। बिसंबिसम्। मुसलंमुसलम्। गोसनिमश्वसनिम्। सवनादिः॥

सात्पदाद्योः॥ १०९ ॥

सादित्येतस्य पदादेश्च मूर्धन्यादेशो न भवति। 'विभाषा साति कात्स्न्र्ये' (५.४.५२)। प्रत्ययसकारत्वात् प्राप्तिः, पदादेश्चादेशसकारत्वात्। सात्—अग्निसात्। दधिसात्। मधुसात्। पदादेः—दधि सिञ्चति। मधु सिञ्चति॥

सिचो यङि॥ ११० ॥

सिचः सकारस्य यङि परतो मूर्धन्यादेशो न भवति। सेसिच्यते। अभिसेसिच्यते। 'उपसर्गात्०' (८.३.६५) इति या प्राप्तिः सा पदादिलक्षणमेव प्रतिषेधं बाधते, न सिचो यङीति। तस्मादयं प्रतिषेधः सर्वत्र भवति। यङीति किम् ? अभिषिषिक्षति॥

---

१ - 'षत्वं च' इति नास्ति है०।

२ - 'इति' इति नास्ति है०।

सेधतेर्गतौ॥ १११ ॥

गतौ वर्तमानस्य सेधतेः सकारस्य मूर्धन्यादेशो न भवति। अभिसेधयति गाः। परिसेधयति गाः। गताविति किम् ? शिष्यमकार्यात् प्रतिषेधयति॥

प्रतिस्तब्धनिस्तब्धौ च॥ ११२ ॥

प्रतिस्तब्ध निस्तब्ध इत्येतौ मूर्धन्यप्रतिषेधाय निपात्येते। 'स्तन्भेः' (८.३.६७) इति प्राप्तं षत्वं प्रतिषिध्यते। प्रतिस्तब्धः। निस्तब्धः॥

सोढः॥ ११३ ॥

सहिरयं सोढ्भूतो[1] गृह्यते, तस्य सकारस्य मूर्धन्यादेशो न भवति। परिसोढा[2]। परिसोढुम्। परिसोढव्यम्। सोढ्भूतग्रहणं किम् ? परिषहते॥

स्तम्भुसिवुसहां चङि॥ ११४ ॥

स्तम्भु सिवु सह इत्येतेषां चङि परतः सकारस्य मूर्धन्यादेशो न भवति। 'स्तन्भेः' (८.३.६७) इति 'परिनिविभ्यः ०' (८.३.७०) इति च प्राप्तो मूर्धन्यः प्रतिषिध्यते। स्तम्भु—पर्यतस्तम्भत्। अभ्यतस्तम्भत्। सिवु—पर्यसीषिवत्। न्यसीषिवत्। सह—पर्यसीषहत्। व्यसीषहत्॥ स्तम्भुसिवुसहां चङि उपसर्गादिति वक्तव्यम्॥ उपसर्गाद् या प्राप्तिस्तस्या एव प्रतिषेधो यथा स्यात्, अभ्यासाद् या प्राप्तिस्तस्या मा भूदिति। तथा चैवोदाहृतम्॥

सुनोतेः स्यसनोः॥ ११५ ॥

सुनोतेः सकारस्य मूर्धन्यादेशो न भवति स्ये सनि च परतः। अभिसोष्यति। परिसोष्यति। अभ्यसोष्यत्। पर्यसोष्यत्। सनि किमुदाहरणम् ? सुसूषति। नैतदस्ति प्रयोजनम्, अत्र 'स्तौतिण्योरेव षण्यभ्यासात्' (८.३.६१) इति नियमाद् न भविष्यति। इदं तर्हि, अभिसुसूषति[3]। एतदपि नास्ति, 'स्थादिष्वभ्यासेन चाभ्यासस्य' (८.३.६४) इति नियमात्। इदं तर्हि, अभिसुसूषतेरप्रत्ययोऽभिसुसूरित्युदाहरणमिति[4]। अत्र हि सन् षभूतो न भवतीत्यभ्यासात् प्राप्तिरस्ति। स्यसनोरिति किम् ? सुषाव॥

---

१ - 'सोढभूतः' इत्यपपाठो है०।

२ - 'परिसोढः' इति मुद्रितेषु।

३ - 'अभिसुसूषति' इत्यपपाठः तारा० है०।

४ - 'अभिसुसूषते' इति मुद्रितेषु ।

सदिष्वञ्जोः परस्य लिटि॥ ११६ ॥

सदि ष्वञ्जि इत्येतयोर्धात्वोर्लिटि परतः सकारस्य परस्य मूर्धन्यो न भवति। अभिषसाद। परिषसाद। निषसाद। विषसाद। परिषस्वजे, परिषस्वजाते, परिषस्वजिरे। अभिषस्वजे। स्वञ्जेः संयोगान्तादपि विभाषा लिटः कित्त्वमिच्छन्ति (१.२.६ वा०) इति पक्षेऽनुषङ्गलोपः॥

निव्यभिभ्योऽड्व्यवाये वा छन्दसि॥ ११७ ॥

नि वि अभि इत्येतेभ्य उपसर्गेभ्य उत्तरस्य सकारस्याड्व्यवाये छन्दसि विषये मूर्धन्या- देशो न भवति वा। न्यषीदत् पिता नः, न्यसीदत्। व्यषीदत् पिता नः, व्यसीदत्। अभ्यषीदत्, अभ्यसीदत्। सदिष्वञ्जोरिति तदिह नानुवर्तते। सामान्येनैव एतद्वचनम् । न्यष्टौत्, न्यस्तौत्, अभ्यष्टौत्, अभ्यस्तौत् इत्येतदपि सिद्धं भवति॥

॥ इति श्रीवामनविरचितायां काशिकायां वृत्तावष्टमाध्यायस्य तृतीयः पादः॥

— o —

॥ अष्टमाध्यायस्य चतुर्थः पादः॥

रषाभ्यां नो णः समानपदे॥ १ ॥

रेफषकाराभ्यामुत्तरस्य नकारस्य णकारादेशो भवति, समानपदस्थौ चेद् निमित्तनिमित्तिनौ भवतः। आस्तीर्णम्। विशीर्णम्। अवगूर्णम्। षकारात्—कुष्णाति। पुष्णाति। मुष्णाति। षग्रहणमुत्तरार्थम्, ष्टुत्वेनैव हि सिद्धमेतत्। समानपद इति किम् ? अग्निर्नयति। वायुर्नयति ॥ ऋवर्णाच्चेति वक्तव्यम्॥ तिसृणाम्। चतसृणाम्। मातृणाम्। पितृणाम्। रश्रुतिसामान्यनिर्देशात् सिद्धम्। ऋवर्णभक्त्या च व्यवधानेऽपि णत्वं भवतीति क्षुभ्नादिषु (८.४.३९) नृनमनतृप्नोतिग्रहणं ज्ञापकम्। अथवा ऋवर्णादपि णत्वं भवतीत्येतदेवानेन ज्ञाप्यते॥

---

१ - 'तद्वचनम्' इति मुद्रितेषु ।

२ - ' वा ' इत्यधिकं है०।

३ - ' अवर्णभक्त्या ' इति है०। ' अवर्णभाग् ' इति न्यासे। ' वर्णभक्त्या ' इति तारा०, पद०।

अट्कुप्वाङ्नुम्व्यवायेऽपि॥ २ ॥

अट् कु पु आङ् नुम् इत्येतैर्व्यवायेऽपि रेफषकाराभ्यामुत्तरस्य नकारस्य णकार आदेशो भवति। अड्व्यवाये तावत्—करणम्। हरणम्। किरिणा। गिरिणा। कुरुणा। गुरुणा। कवर्गव्यवाये—अर्केण। मूर्खेण। गर्गेण। अर्घेण। पवर्गव्यवाये—दर्पेण। रेफेण। गर्भेण। चर्मणा। वर्मणा। आङ्व्यवाये—पर्याणद्धम्। निराणद्धम्। अड्व्यवाय इति सिद्ध आङ्ग्रहणं 'पदव्यवाये०' (८.४.३८) इत्यस्य प्रतिषेधस्य बाधनार्थम्। नुम्व्यवाये—बृंहणम्। बृंहणीयम्। नुम्ग्रहणमनुस्वारोपलक्षणार्थं द्रष्टव्यम्। तेन तृंहणम्, तृंहणीयमित्यत्रानुस्वारव्यवाये नुमभावेऽपि णत्वं भवति। सत्यपि च नुमि यत्रानुस्वारो न श्रूयते तत्र न भवति—प्रेन्वनम्, प्रेन्वनीयमिति। व्यवायोपलक्षणार्थत्वादडादीनामिह व्यस्तैः समस्तैश्च व्यवायेऽपि णत्वं भवति॥

पूर्वपदात् संज्ञायामगः॥ ३ ॥

पूर्वपदस्थाद् निमित्तादुत्तरस्य गकारवर्जिताद् नकारस्य णकार आदेशो भवति संज्ञायां विषये।द्रुणसः।वार्ध्रीणसः।खरणसः। शूर्पणखा। संज्ञायामिति किम् ? चर्मनासिकः। अग इति किम् ? ऋगयनम्। केचिदेतद् नियमार्थं वर्णयन्ति—पूर्वपदात् संज्ञायामेव णत्वं नान्यत्रेति। समासेऽपि हि समानपदे निमित्तनिमित्तिनोर्भावादस्ति पूर्वेण प्राप्तिरिति। स च नियमः पूर्वपदसंबन्धादुत्तरपदस्थस्यैव णत्वं निवर्तयति चर्मनासिक इति, न तद्धितपूर्वपदस्थस्य—खारपायणः, मातृभोगीणः, करणप्रिय इति। अग इति योगविभागेन णत्वप्रतिषेधः, न नियमप्रतिषेध इति। अपरे तु पूर्वसूत्रे समानमेव यद् नित्यं पदं तत् समानपदमित्याश्रयन्ति, समानग्रहणात्। तेषामप्राप्तमेव णत्वमनेन विधीयते। समासे हि पूर्वपदोत्तरपदविभागादसमानपदत्वमप्यस्तीति॥

वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः॥ ४ ॥

पूर्वपदात् संज्ञायामिति वर्तते। पुरगा मिश्रका सिध्रका शारिका कोटरा अग्र इत्येतेभ्यः पूर्वपदेभ्य उत्तरस्य वननकारस्य णकारादेशो भवति संज्ञायां विषये। पुरगावणम्। मिश्रकावणम्। सिध्रकावणम्। शारिकावणम्। कोटरावणम्। अग्रेवणम्। सिद्धे सत्यारम्भो नियमार्थः—एतेभ्य एव परस्य वननकारस्य णकारादेशो भवति, नान्येभ्य इति। कुबेरवनम्। शतधारवनम्। असिपत्रवनम्॥

प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि॥ ५ ॥

---

१ - ' च ' इति नास्ति है०।

प्र निर् अन्तर् शर इक्षु प्लक्ष आम्र कार्ष्य खदिर पीयूक्षा इत्येतेभ्य उत्तरस्य वननकारस्य संज्ञायामसंज्ञायामपि णकारादेशो भवति। प्र—प्रवणे यष्टव्यम्। निर्—निर्वणे प्रतिधीयते। अन्तर्—अन्तर्वणे। शर—शरवणम्। इक्षु—इक्षुवणम्। प्लक्ष—प्लक्षवणम्। आम्र—आम्रवणम्। कार्ष्य—कार्ष्यवणम्। खदिर—खदिरवणम्। पीयूक्षा—पीयूक्षावणम्॥

विभाषौषधिवनस्पतिभ्यः॥ ६ ॥

वनमित्येव। ओषधिवाचि यत् पूर्वपदं वनस्पतिवाचि च तत्स्थाद् निमित्तादुत्तरस्य वननकारस्य णकार आदेशो भवति विभाषा। ओषधिवाचिभ्यस्तावत्—दूर्वावणम्, दूर्वावनम्। मूर्वावणम्, मूर्वावनम्। वनस्पतिभ्यः—शिरीषवणम्, शिरीषवनम्। बदरीवणम्, बदरीवनम् ॥ द्व्यक्षरत्र्यक्षरेभ्य इति वक्तव्यम्॥ इह मा भूत्—देवदारुवनम्। भद्रदारुवनम् ॥ इरिकादिभ्यः प्रतिषेधो वक्तव्यः॥ इरिकावनम्। तिमिरवनम्।

फली वनस्पतिर्ज्ञेयो वृक्षाः पुष्पफलोपगाः।
ओषध्यः फलपाकान्ता लता गुल्माश्च वीरुधः॥ इति।

सत्यपि भेदे वृक्षवनस्पत्योरिहाभेदेन ग्रहणं द्रष्टव्यम्॥

अह्नोऽदन्तात्॥ ७ ॥

अदन्तं यत् पूर्वपदं तत्स्थाद् निमित्तादुत्तरस्याह्नो नकारस्य णकार आदेशो भवति। पूर्वाह्णः। अपराह्णः। अदन्तादिति किम् ? निरह्नः। दुरह्नः। 'अह्नोऽह्न एतेभ्यः' (५.४.८८) इत्यह्नादेशः। अह्न इत्यकारान्तग्रहणाद् दीर्घाह्नी शरदित्यत्र न भवति॥

वाहनमाहितात्॥ ८ ॥

आहितवाचि यत् पूर्वपदं तत्स्थाद् निमित्तादुत्तरस्य वाहननकारस्य णकार आदेशो भवति। इक्षुवाहणम्। शरवाहणम्। दर्भवाहणम्। वाहने यद् आरोपितमुह्यते तदाहितमुच्यते। आहितादिति किम् ? दाक्षिवाहनम्। दाक्षिस्वामिकं वाहनमित्यर्थः॥

पानं देशे॥ ९ ॥

पाननकारस्य पूर्वपदस्थाद् निमित्तादुत्तरस्य देशाभिधाने णकार आदेशो भवति। पीयत इति पानम्। 'कृत्यल्युटो बहुलम्' (३.३.११३) इति कर्मणि ल्युट्। क्षीरं पानं येषां ते क्षीरपाणा उशीनराः। मनुष्याभिधानेऽपि देशाभिधानं गम्यते। सुरापाणाः प्राच्याः।

---

१ - तु० — चरक सूत्र० १.७१॥ मनु० १.४६ — ४८॥
२ - इदमेकदेशिमतम्, युवादिप्रतिषेधेन (८.४.११ वा०) सिद्धत्वात्।

सौवीरपाणा बाह्लीकाः। कषायपाणा गान्धाराः। देश इति किम् ? दाक्षीणां पानं दाक्षिपानम्॥

वा भावकरणयोः॥ १० ॥

भावे करणे च यः पानशब्दस्तदीयस्य नकारस्य णकार आदेशो भवति वा पूर्वपदस्थाद् निमित्तादुत्तरस्य। क्षीरपाणं वर्तते, क्षीरपानम्। कषायपाणम्, कषायपानम्। सुरापाणम्, सुरापानम्। करणे—क्षीरपाणः कंसः, क्षीरपानः ॥ वाप्रकरणे गिरिनद्यादीनामुपसंख्यानम्॥ गिरिणदी, गिरिनदी। चक्रणदी, चक्रनदी। चक्रणितम्बा, चक्रनितम्बा॥

प्रातिपदिकान्तनुम्विभक्तिषु च॥ ११ ॥

वेति वर्तते। प्रातिपदिकान्ते नुमि विभक्तौ च यो नकारस्तस्य पूर्वपदस्थाद् निमित्तादुत्तरस्य वा णकार आदेशो भवति। प्रातिपदिकान्ते तावत्—माषवापिणौ, माषवापिनौ। नुमि—माषवापाणि, माषवापानि। व्रीहिवापाणि, व्रीहिवापानि। विभक्तौ—माषवापेण, माषवापेन। व्रीहिवापेण, व्रीहिवापेन। पूर्वपदाधिकारादुत्तरपदस्य प्रातिपदिकस्थो योऽन्त्यो नकारस्तस्येदं णत्वमिष्यते। इह हि न भवति—गर्गाणां भगिनी गर्गभगिनी। यदा त्वेवं भवति—गर्गाणां भगो गर्गभगः। गर्गभगोऽस्या अस्तीति गर्गभगिणीति। तदा मातृभोगीणवद् नित्यमेव णत्वेन भवितव्यम्। माषवापिणी, माषवापिनीत्यत्र तु 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' (परि० ७५) इति कृदन्तेनैव समासे सति प्रातिपदिकस्योत्तरपदस्यैव सतो नकारो भवति। तथा चात्र[1] नुम्ग्रहणं कृतम्। स हि समुदायभक्तत्वादुत्तरपदस्यान्तो न भवति ॥ युवादीनां प्रतिषेधो वक्तव्यः॥ आर्ययूना। क्षत्रिययूना। प्रपक्वानि। दीर्घाह्वी शरत्॥

एकाजुत्तरपदे णः॥ १२ ॥

एकाजुत्तरपदं यस्य स एकाजुत्तरपदः, तस्मिन्नेकाजुत्तरपदसमासे प्रातिपदिकान्तनुम्विभक्तिषु पूर्वपदस्थाद् निमित्तादुत्तरस्य नकारस्य णकार आदेशो भवति। वृत्रहणौ, वृत्रहणः। नुमि—क्षीरपाणि। सुरापाणि। विभक्तौ—क्षीरपेण। सुरापेण। ण इति वर्तमाने पुनर्णग्रहणं विकल्पाधिकारनिवृत्तेर्विस्पष्टीकरणार्थम्॥

कुमति च॥ १३ ॥

कवर्गवति चोत्तरपदे प्रातिपदिकान्तनुम्विभक्तिषु पूर्वपदस्थाद् निमित्तादुत्तरस्य

---

१ - 'चात्र' इति नास्ति बाल०।

नकारस्य णकारादेशो भवति। वस्त्रयुगिणौ, वस्त्रयुगिणः। स्वर्गकामिणौ। वृषगामिणौ। नुमि—वस्त्रयुगाणि। खरयुगाणि। विभक्तौ—वस्त्रयुगेण। खरयुगेण॥

उपसर्गादसमासेऽपि णोपदेशस्य॥ १४ ॥

ण उपदेशे यस्यासौ णोपदेशः। णोपदेशस्य धातोर्यो नकारः तस्य उपसर्गस्थाद् निमित्तादुत्तरस्य णकारादेशो भवत्यसमासेऽपि समासेऽपि। प्रणमति। परिणमति। प्रणायकः। परिणायकः। उपसर्गादिति किम् ? प्रगता नायका अस्माद् देशात् प्रनायको देशः। असमासेऽपीति किम् ? पूर्वपदाधिकारात् समास एव स्यादिति तदधिकारनिवृत्तिद्योतनार्थम्। णोपदेशस्येति किम् ? प्रनर्दति। प्रनर्दकः॥

हिनुमीना॥ १५ ॥

हिनु मीना इत्येतयोरुपसर्गस्थाद् निमित्तादुत्तरस्य नकारस्य णकारादेशो भवति। प्रहिणोति, प्रहिणुतः। प्रमीणाति, प्रमीणीतः। हिनुमीनाग्रहणे विकृतस्यापि भवति, अजादेशस्य स्थानिवत्त्वात्॥

आनि लोट्॥ १६ ॥

आनीत्येतस्य लोडादेशस्योपसर्गस्थाद् निमित्तादुत्तरस्य नकारस्य णकारादेशो भवति। प्रवपाणि। परिवपाणि। प्रयाणि। परियाणि। लोडिति किम् ? प्रवपानि मांसानि॥

नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च॥ १७ ॥

नि इत्येतस्योपसर्गस्थाद् निमित्तादुत्तरस्य नकारस्य णकारादेशो भवति गद नद पत पद घु मा स्यति हन्ति याति वाति द्राति प्साति वपति वहति शाम्यति चिनोति देग्धि इत्येतेषु परतः। गद—प्रणिगदति। परिणिगदति। नद—प्रणिनदति। परिणिनदति। पत—प्रणिपतति। परिणिपतति। पद—प्रणिपद्यते। परिणिपद्यते। घु—प्रणिददाति। परिणिददाति। प्रणिदधाति। परिणिदधाति। माङ्—प्रणिमिमीते। परिणिमिमीते। मेङ्—प्रणिमयते। परिणिमयते। मा इति माङ्मेङोर्ग्रहणमिष्यते। स्यति—प्रणिष्यति। परिणिष्यति। हन्ति—प्रणिहन्ति। परिणिहन्ति। याति—प्रणियाति। परिणियाति। वाति—प्रणिवाति। परिणिवाति। द्राति—प्रणिद्राति। परिणिद्राति। प्साति—प्रणिप्साति। परिणिप्साति। वपति—प्रणिवपति। परिणिवपति। वहति—प्रणिवहति। परिणिवहति। शाम्यति—

---

१ - 'हिनुमीनाग्रहणे.....स्थानिवत्त्वात्' इति पाठो न स्यात्, न्यासपदमञ्जरीभ्यां स्वातन्त्र्येणोपपादितत्वात्।

प्रणिशाम्यति। परिणिशाम्यति। चिनोति—प्रणिचिनोति। परिणिचिनोति। देग्धि—प्रणिदेग्धि। परिणिदेग्धि। अड्व्यवायेऽपि नेर्गदादिषु णत्वमिष्यते। प्रण्यगदत्। परिण्यगदत्॥

शेषे विभाषाकखादावषान्त उपदेशे॥ १८ ॥

नेरिति वर्तते, उपसर्गादिति च। अककारादिरखकारादिरषान्त उपदेशे यो धातुः शेषस्तस्मिन् परत उपसर्गस्थाद् निमित्तादुत्तरस्य नेर्नकारस्य विभाषा णकार आदेशो भवति। प्रणिपचति, प्रनिपचति। प्रणिभिनत्ति, प्रनिभिनत्ति। अकखादाविति किम्? प्रनिकरोति। प्रनिखादति। अषान्त इति किम्? प्रनिपिनष्टि। उपदेशग्रहणं किम्? इह च प्रतिषेधो यथा स्यात्—प्रनिचकार, प्रनिचखाद, प्रनिपेक्ष्यतीति। इह च मा भूत्—विशेः—प्रणिवेष्टा॥

अनितेः॥ १९ ॥

अनितेर्नकारस्योपसर्गस्थाद् निमित्तादुत्तरस्य णकारादेशो भवति। प्राणिति। पराणिति॥

अन्तः ॥ २० ॥

अनितेरिति वर्तते। उपसर्गस्थाद् निमित्तादुत्तरस्यानितिनकारस्य पदान्ते वर्तमानस्य णकारादेशो भवति। हे प्राण्। हे पराण्। 'पदान्तस्य' (८.४.३७) इति प्रतिषेधस्यापवादोऽयम्। अन्तश्च पदापेक्षो गृह्यते। केचित् तु पूर्वसूत्र एवैतदन्तग्रहणं सामीप्यार्थमभिसंबध्नन्ति। निमित्तसमीपभूतस्य एकवर्णव्यवहितस्यानितिनकारस्य पदान्ते वर्तमानस्य णकारादेशो यथा स्यात्। इह मा भूत्—पर्यनितीति। तैर्द्वितीयमपि पदान्तस्य णत्वार्थमन्तग्रहणमाश्रयितव्यमेव। येषां तु पर्यणितीति भवितव्यमिति दर्शनम्, तेषां पूर्वसूत्रे नार्थोऽन्तग्रहणेन॥

उभौ साभ्यासस्य॥ २१ ॥

साभ्यासस्यानितेरुपसर्गस्थाद् निमित्तादुत्तरस्योभयोर्नकारयोर्णकार आदेशो भवति। प्राणिणिषति। प्राणिणत्। पराणिणिषति। पराणिणत्। 'पूर्वत्रासिद्धीयमद्विर्वचने' (परि० ११७) इत्येतस्मिन् सति पूर्वेणैव कृतणत्वस्य द्विर्वचने कृते सिद्धमेतदन्तरेणापि

---

१ - ' अषकारान्तश्च ' इति मुद्रितेषु।
२ - ' स ' इत्यधिकं है० तारा० । तदपार्थकम् ।
३ - ' विशेः ' इति नास्ति है०।
४ - ' प्रणिवेक्ष्यति ' इत्यधिकं मुद्रितेषु। तत् त्वयुक्तम्।
५ - ' निमित्तसमीपस्थस्य ' इति है० ' निमित्तसमीपस्य ' इति बाल०।

वचनम् ? एतत् तु नाश्रयितव्यमिति सूत्रमिदमारभ्यते। तेन औजढदिति सिद्धं भवति॥

हन्तेरत्पूर्वस्य॥ २२ ॥

अकारपूर्वस्य हन्तिनकारस्य उपसर्गस्थाद् निमित्तादुत्तरस्य णकार आदेशो भवति। प्रहण्यते। परिहण्यते। प्रहणनम्। परिहणनम्। अत्पूर्वस्येति किम् ? प्रघ्नन्ति। परिघ्नन्ति। तपरकरणं किम् ? चिणि—प्राघानि। पर्यघानि॥

वमोर्वा॥ २३ ॥

हन्तेरिति वर्तते। वकारमकारयोः परतो हन्तिनकारस्योपसर्गस्थाद् निमित्तादुत्तरस्य वा णकारादेशो भवति। प्रहण्वः, प्रहन्वः। परिहण्वः, परिहन्वः। प्रहण्मः, प्रहन्मः। परिहण्मः, परिहन्मः॥

अन्तरदेशे॥ २४ ॥

अन्तःशब्दादुत्तरस्य हन्तिनकारस्यात्पूर्वस्य णकारादेशो भवति अदेशाभिधाने। अन्तर्हण्यते। अन्तर्हणनं वर्तते। अदेश इति किम् ? अन्तर्हननो देशः। अत्पूर्वस्येत्येव—अन्तर्घ्नन्ति। तपरकरणम् इत्येव—अन्तरघानि॥

अयनं च॥ २५ ॥

अन्तरदेश इति वर्तते। अयननकारस्य चान्तःशब्दादुत्तरस्य णकारादेशो भवत्यदेशाभिधाने। अन्तरयणं वर्तते। अन्तरयणं शोभनम्। अदेश इत्येव—अन्तरयनो देशः॥

छन्दस्यृदवग्रहात्॥ २६ ॥

पूर्वपदादिति वर्तते। ऋकारान्तादवग्रहात् पूर्वपदादुत्तरस्य णकारादेशो भवति छन्दसि विषये। नृमणाः (ऋ० १.१६७.५)। पितृयाणम् (ऋ० १०.२.७)। अत्र हि नृऽमनाः, पितृऽयानम् इति ऋकारोऽवगृह्यते। अवग्रहग्रहणं किमर्थमुच्यते, यावता संहिताधिकार आध्यायपरिसमाप्तेः (८.२.१०८) इत्युक्तम् ? विषयोपलक्षणार्थमवग्रहग्रहणम्—अवगृह्यमाणाद् यथा स्यात्, अनवगृह्यमाणाद् मा भूत्। अपदान्ते चावग्रहो नास्ति॥

---

१ - 'तेन.....भवति' इति पाठोऽत्र न स्यात्, न्यासपदमञ्जर्योः स्वातन्त्र्येण व्याख्यातत्वात्।

२ - 'किम्' इति है०।

३ - 'नृमणाः, पितृयाणम्' इति मुद्रितेषु।

नश्च धातुस्थोरुषुभ्यः॥ २७ ॥

नस् इत्येतस्य नकारस्य णकारादेशो भवति धातुस्थाद् निमित्तादुत्तरस्योरुशब्दात् षुशब्दात् च छन्दसि विषये। धातुस्थात् तावत् — अग्नेऽ रक्षा णऽः (ऋ० ७.१५.१३)। शिक्षा णो अऽस्मिन् (ऋ० ७.३२.२६)। उरुशब्दात्—उऽरु णस्कृधि (ऋ० ८.७५.११)। षुशब्दात्—अऽभी षु णऽः सखीनाम् (ऋ० ४.३१.३)। ऊऽर्ध्वऊऽ षुणऽऊऽतयेऽ (ऋ० १.३६.१३)। अस्मदादेशोऽयं नस्शब्दो 'बहुवचनस्य वस्नसौ' (८.१.२१) इति॥

उपसर्गाद् बहुलम् ॥ २८ ॥

उपसर्गस्थाद् निमित्तादुत्तरस्य नसो नकारस्य णकारादेशो भवति बहुलम्। प्रणः शूद्रः। प्रणसः। प्रणो राजा। न च भवति—प्र नो मुञ्चतऽम् (ऋ० ६.७४.४)। बहुलग्रहणाद् भाषायामपि भवति। प्रणसं मुखम्। 'उपसर्गाच्च' (५.४.११६) इति नासिकाया नसादेशः॥

कृत्यचः॥ २९ ॥

कृत्स्थो यो नकारोऽच उत्तरस्तस्योपसर्गस्थाद् निमित्तादुत्तरस्य णकारादेशो भवति। अन, मान, अनीय, अनि, इनि, निष्ठादेश एते णत्वं प्रयोजयन्ति। अन—प्रयाणम्। परियाणम्। प्रमाणम्। परिमाणम्। मान—प्रयायमाणम्। परियायमाणम्। अनीय—प्रयाणीयम्। परियाणीयम्। अनि—अप्रयाणिः। अपरियाणिः। इनि—प्रयायिणौ। परियायिणौ। निष्ठादेशः — प्रहीणः। परिहीणः। प्रहीणवान्। परिहीणवान्। अच इति किम् ? प्रमग्नः। परिभुग्नः। 'भुजो कौटिल्ये' (तुदा० १२७), अस्य निष्ठाप्रत्ययः। 'ओदितश्च' (८.२.४५) इति निष्ठानत्वम्, 'चोः कुः' (८.२.३०) इति कुत्वे सिद्धं परिभुग्न इति ॥ कृत्स्थस्य णत्वे निर्विण्णस्योपसंख्यानं कर्तव्यम्॥ निर्विण्णोऽस्मि खलसङ्गेन। निर्विण्णोऽहमत्र वासेन॥

णेर्विभाषा॥ ३० ॥

ण्यन्ताद् यो विहितः कृत्प्रत्ययः तत्स्थस्य नकारस्योपसर्गस्थाद् निमित्तादुत्तरस्य विभाषा णकारादेशो भवति। प्रयापणम्, प्रयापनम्। परियापणम्, परियापनम्। प्रयाप्यमाणम्, प्रयाप्यमानम्। प्रयापणीयम्, प्रयापनीयम्। अप्रयापणिः, अप्रयापनिः। प्रयापिणौ, प्रयापिनौ। विहितविशेषणं किम् ? प्रयाप्यमाणमित्यत्र यका व्यवधानेऽपि यथा स्यादिति॥

हलश्चेजुपधात्॥ ३१ ॥

कृत्यच इति वर्तते। हलादिर्यो धातुरिजुपधस्तस्मात् परो यः कृत्प्रत्ययः तत्स्थस्य नकारस्याच उत्तरस्योपसर्गस्थाद् निमित्तादुत्तरस्य विभाषा णकारादेशो भवति। प्रकोपणम्, प्रकोपनम्। परिकोपणम्, परिकोपनम्। हल इति किम् ? प्रेहणम्। प्रोहणम्। इजुपधादिति किम् ? प्रवपणम्। परिवपणम्। कृत्यच इति नित्ये प्राप्ते विकल्पः। अच इत्येव—परिभुग्नः। इजुपधस्य सर्वस्य हलन्तत्वादिह हल्ग्रहणमादिविशेषणम्॥

इजादेः सनुमः॥ ३२ ॥

हल इति वर्तते। तेनेह सामर्थ्यात् तदन्तविधिः। इजादेः सनुमो हलन्ताद् धातोर्विहितो यः कृत् तत्स्थस्य नकारस्योपसर्गस्थाद् निमित्तादुत्तरस्य णकारो भवति। प्रेङ्खणम्। परेङ्खणम्। प्रेङ्गणम्। परेङ्गणम्। प्रोम्भणम्। परोम्भणम्। सिद्धे सत्यारम्भो नियमार्थः—इजादेरेव सनुमः, नान्यस्मादिति। प्रमङ्गनम्। परिमङ्गनम्। हल इत्यधिकाराद् ण्यन्ते नित्यं विध्यर्थमेतद् न भवति॥

वा निंसनिक्षनिन्दाम्॥ ३३ ॥

उपसर्गादिति वर्तते। निंस निक्ष निन्द इत्येतेषां नकारस्योपसर्गस्थाद् निमित्तादुत्तरस्य वा णकारादेशो भवति। प्रणिंसनम्, प्रनिंसनम्। प्रणिक्षणम्, प्रनिक्षणम्। प्रणिन्दनम्, प्रनिन्दनम्। णोपदेशत्वादेतेषां नित्ये प्राप्ते विकल्पः॥

न भाभूपूकमिगमिप्यायीवेपाम्॥ ३४ ॥

भा भू पू कमि गमि प्यायी वेप इत्येतेषामुपसर्गस्थाद् निमित्तादुत्तरस्य कृत्स्थस्य नकारस्य णकारादेशो न भवति। भा—प्रभानम्। परिभानम्। भू—प्रभवनम्। परिभवनम्। पू—प्रपवनम्। परिपवनम्। पूग्रहणेन पूञ्ग्रहणं द्रष्टव्यम्। पूङो हि भवत्येव णत्वम्—प्रपवणं सोमस्येति। कमि—प्रकमनम् । परिकमनम्। गमि—प्रगमनम्। परिगमनम्। प्यायी—प्रप्यायनम्। परिप्यायनम्। वेप—प्रवेपनम्। परिवेपनम् ॥ ण्यन्तानां भादीनामुपसंख्यानं कर्तव्यम्॥ प्रभापनम्। परिभापनम्॥

षात् पदान्तात्॥ ३५ ॥

षकारात् पदान्तादुत्तरस्य नकारस्य णकारादेशो न भवति। निष्पानम्। दुष्पानम्। सर्पिष्पानम्। यजुष्पानम्। षादिति किम् ? निर्णयः। पदान्तादिति किम् ? कुष्णाति। पुष्णाति। पदे अन्तः पदान्त इति सप्तमीसमासोऽयम्, तेनेह न भवति—सुसर्पिष्केण।

सुयजुष्केण। 'शेषाद् विभाषा' (५.४.१५४) इति कप्॥

नशेः षान्तस्य॥ ३६ ॥

नेति वर्तते। नशेः षकारान्तस्य णकारादेशो न भवति। प्रनष्टः। परिनष्टः। षान्तस्येति किम् ? प्रणश्यति। परिणश्यति। अन्तग्रहणं षान्तभूतपूर्वमात्रस्यापि यथा स्यात्—प्रनङ्क्ष्यति। परिनङ्क्ष्यति॥

पदान्तस्य॥ ३७ ॥

पदान्तो यो नकारस्तस्य णकारादेशो न भवति। वृक्षान्। प्लक्षान्। अरीन्। गिरीन्॥

पदव्यवायेऽपि॥ ३८ ॥

पदेन व्यवायः पदव्यवायः पदव्यवधानम्। पदेन व्यवायेऽपि सति निमित्त-निमित्तिनोर्नकारस्य णकारादेशो न भवति। माषकुम्भवापेन। चतुरङ्गयोगेन। प्रावनद्धम्। पर्यवनद्धम्। प्र गां नयामः। परि गां नयामः ॥ पदव्यवायेऽतद्धित इति वक्तव्यम्॥ इह मा भूत्—आर्द्रगोमयेण। शुष्कगोमयेण। 'गोश्च पुरीषे' (४.३.१४५) इति मयट्। स्वादौ पूर्वं पदमिति गोशब्दः पूर्वपदम्, तेन व्यवायः॥

क्षुभ्नादिषु च॥ ३९ ॥

नेति वर्तते। क्षुभ्ना इत्येवमादिषु शब्देषु नकारस्य णकारादेशो न भवति। क्षुभ्नाति। अजादेशस्य स्थानिवद्भावादिहापि प्रतिषेधो भवति—क्षुभ्नीतः, क्षुभ्नन्ति। नृनमनः। 'पूर्वपदात् संज्ञायाम्०' (८.४.३) इति प्राप्तिः। 'छन्दस्यृदवग्रहात्' (८.४.२६) इति च प्राप्नोति। नन्दिन्, नन्दन, नगर एतान्युत्तरपदानि संज्ञायां प्रयोजयन्ति। हरिनन्दी। हरिनन्दनः। गिरिनगरम्। नृतिर्यङि प्रयोजयति। नरीनृत्यते। तृप्नु—तृप्नोति। नर्तन, गहन, नन्दन, निवेश, निवास, अग्नि, अनूप एतान्युत्तरपदानि प्रयोजयन्ति। परिनर्तनम्, परिगहनमिति संज्ञायां 'पूर्वपदात् संज्ञायाम्०' (८.४.३) इति प्राप्नोति। परिनन्दनमित्यत्र 'उपसर्गाद-समासेऽपि ०' (८.४.१४) इति प्राप्नोति। शरनिवेशः, शरनिवासः, शराग्निः, दर्भानूप इत्येताः संज्ञाः। आचार्यादणत्वं च (ग० सू० १८५)। आचार्यभोगीनः। आचार्यानी।

---

१ - ' पदान्तस्य नकारस्य ' इति है०।

२ - ' नृतिं यङि प्रयोजयन्ति ' इति है०।

इरिकादिभ्यो वनोत्तरपदेभ्यः संज्ञायाम् (ग० सू० १८६)। इरिका, तिमिर, समीर, कुबेर, हरि, कर्मार इत्युत्तरपदवनशब्दस्थस्य संज्ञायाम्। क्षुभ्नादिराकृतिगणः। अविहितलक्षणो णत्वप्रतिषेधः क्षुभ्नादिषु द्रष्टव्यः॥

स्तोः श्चुना श्चुः॥ ४० ॥

सकारतवर्गयोः शकारचवर्गाभ्यां सन्निपाते शकारचवर्गावादेशौ भवतः। स्तोः श्चुनेति यथासंख्यमत्र नेष्यते। सकारस्य शकारेण चवर्गेण द्वाभ्यामपि संनिपाते शकारो भवति। तवर्गस्यापि च शकारेण चवर्गेण च संनिपाते चवर्गो भवति। आदेशे तु यथासंख्यमिष्यते। सकारस्य शकारः, तवर्गस्य च चवर्ग इति। सकारस्य शकारेण संनिपाते—वृक्षश्शेते। प्लक्षश्शेते। तस्यैव चवर्गेण—वृक्षश्चिनोति। प्लक्षश्चिनोति। वृक्षश् छादयति। प्लक्षश्छादयति। तवर्गस्य शकारेण—अग्निचिच्छेते। सोमसुच्छेते। तस्यैव चवर्गेण—अग्निचिच्विनोति। सोमसुच्विनोति। अग्निचिच्छादयति। सोमसुच्छादयति। अग्निचिज्जयति। सोमसुज्जयति। अग्निचिज्झकारः। सोमसुज्झकारः। अग्निचिञ्ञकारः। सोमसुञ्ञकारः। मस्जेः—मज्जति। भ्रस्जेः—भृज्जति। व्रस्चेः—वृश्चति। यजेः—यज्ञः। याचेः—याच्ञा। 'शात्' (८.४.४४) इति प्रतिषेधो ज्ञापकः संख्यातानुदेशाभावस्य। स्तोः श्चाविति सप्तमीनिर्देशो न कृतः, पूर्वेण परेण च श्चुना संनिपाते श्चुत्वं यथा स्यादिति॥

ष्टुना ष्टुः॥ ४१ ॥

स्तोरिति वर्तते। सकारतवर्गयोः षकारटवर्गाभ्यां संनिपाते षकारटवर्गावादेशौ भवतः। अत्रापि तथैव संख्यातानुदेशाभावः। षकारेण सकारस्य—वृक्षष्षण्डे। प्लक्षष्षण्डे। तस्यैव टवर्गेण—वृक्षष्टीकते। प्लक्षष्टीकते। वृक्षष्ठकारः। प्लक्षष्ठकारः। तवर्गस्य षकारेण—पेष्टा। पेष्टुम्। पेष्टव्यम्। कृषीष्ट। कृषीष्ठाः। तस्यैव टवर्गेण—अग्निचिट्टीकते। सोमसुट्टीकते। अग्निचिट्ठकारः। सोमसुट्ठकारः। अग्निचिड्डीनः। सोमसुड्डीनः। अग्निचिड् ढौकते। सोमसुड् ढौकते। अग्निचिण्णकारः। सोमसुण्णकारः। अत्टः—अट्टति। अद्डः—अड्डति॥

न पदान्ताट् टोरनाम्॥ ४२ ॥

पदान्ताट् टवर्गादुत्तरस्य स्तोः ष्टुत्वं न भवति नामित्येतद् वर्जयित्वा। श्वलिट्

---

१ - ' इरिकादीनि वनोत्तरपदानि ' इति पाठान्तरम् ।

२ - ' व्रश्चेः ' इति मुद्रितेषु ।

३ - ' तत्रापि ' इति है० ।

साये। मधुलिट् तरति। पदान्तादिति किम् ? 'ईड स्तुतौ' (अदा० ६) — ईट्टे। टोरिति किम् ? सर्पिष्टमम्। अनामिति किम् ? षण्णाम्। अत्यल्पमिदमुच्यते ॥ अनाम्नवति-नगरीणामिति वक्तव्यम्॥ षण्णाम्। षण्णवतिः। षण्णगरी॥

तोः षि॥ ४३ ॥

नेति वर्तते। तवर्गस्य षकारे यदुक्तं तद् न भवति। अग्निचित् षण्डे। भवान् षण्डे। महान् षण्डे॥

शात्॥ ४४ ॥

तोरिति वर्तते। शकारादुत्तरस्य तवर्गस्य यदुक्तं तद् न भवति। प्रश्नः। विश्नः॥

यरोऽनुनासिकेऽनुनासिको वा॥ ४५ ॥

पदान्तग्रहणमनुवर्तते। यरः पदान्तस्यानुनासिके परतो वानुनासिक आदेशो भवति। वाङ् नयति, वाग् नयति। श्वलिण् नयति, श्वलिड् नयति। अग्निचिन् नयति, अग्निचिद् नयति। त्रिष्टुम् नयति, त्रिष्टुब् नयति। पदान्तस्येत्येव—वेदिम। क्षुभ्नाति ॥ यरोऽनुनासिके प्रत्यये भाषायां नित्यवचनं कर्तव्यम्॥ वाङ्मयम्। त्वङ्मयम्। व्यवस्थितविभाषा-विज्ञानात् सिद्धम्॥

अचो रहाभ्यां द्वे॥ ४६ ॥

यर इति वर्तते। अच उत्तरौ यौ रेफहकारौ ताभ्यामुत्तरस्य यरो द्वे भवतः। अर्क्कः। मर्क्कः। ब्रह्म्मा। अपह्न्नुते। अच इति किम् ? किन् ह्नुते। किम् ह्मलयति॥

अनचि च॥ ४७ ॥

अच इति वर्तते, यर इति च। अनच्परस्य अच उत्तरस्य यरो द्वे भवतः। दद्ध्यत्र। मद्ध्वत्र। अच इत्येव—स्मितम्। ध्मातम् ॥ यणो मयो द्वे भवत इति वक्तव्यम्॥ केचिदत्र यण इति पञ्चमी मय इति षष्ठीति व्याचक्षते। तेषामुल्क्का, वल्म्मीक इत्युदा-हरणम्। अपरे तु यण इति षष्ठी मय इति पञ्चमीति। तेषां दध्यत्र, मध्ध्वत्रेत्युदाहरणम् ॥ शरः खयो द्वे भवत इति वक्तव्यम्॥ अत्रापि यदि शर इति पञ्चमी खय इति षष्ठी,

---

१ - ' अनच्परस्य ' इति नास्ति बाल०।

२ - ' द्वे वा ' इति है० , तारा०।

३ - ' अनचि परतः ' इत्यधिकं बाल०।

तदा स्थाली स्थातेत्युदाहरणम्। अथवा खय उत्तरस्य शरो द्वे भवतः। वत्सः। इक्ष्णुः। क्ष्णीरम्। अप्सराः ॥ अवसाने च यरो द्वे भवत इति वक्तव्यम्॥ वाक्क्, वाक्। त्वक्क्, त्वक्। षट्ट्, षट्। तत्त्, तत्॥

नादिन्याक्रोशे पुत्रस्य॥ ४८ ॥

आदिनी परत आक्रोशे गम्यमाने पुत्रशब्दस्य न द्वे भवतः। 'अनचि च' (८.४.४७) इति प्राप्तिः प्रतिषिध्यते। पुत्रादिनी त्वमसि पापे। आक्रोश इति किम् ? तत्त्वकथने द्विर्वचनं भवत्येव। पुत्रानत्तीति पुत्रादिनी शिशुमारी व्याघ्री ॥ तत्परे चेति वक्तव्यम्॥ पुत्रपुत्रादिनी त्वमसि पापे ॥ वा हतजग्धपर इति वक्तव्यम्॥ पुत्रहती, पुत्रहती। पुत्रजग्धी, पुत्रजग्धी ॥ चयो द्वितीयाः शरि पौष्करसादेः॥ चयो द्वितीया भवन्ति शरि परतः पौष्करसादेराचार्यस्य मतेन। तकारस्य थकारः—वथूसः। ककारस्य खकारः—ख्खीरम्। पकारस्य फकारः—अफ्सराः॥

शरोऽचि॥ ४९ ॥

नेति वर्तते। शरोऽचि परतो न द्वे भवतः। 'अचो रहाभ्याम्०' (८.४.४६) इति प्राप्तिः प्रतिषिध्यते। कर्षति। वर्षति। आदर्शः। अक्षदर्शः। अचीति किम् ? दश्शर्यते॥

त्रिप्रभृतिषु शाकटायनस्य॥ ५० ॥

त्रिप्रभृतिषु वर्णेषु संयुक्तेषु शाकटायनस्याचार्यस्य मतेन द्वित्वं न भवति। इन्द्रः। चन्द्रः। मन्द्रः। राष्ट्रम्। भ्राष्ट्रम्॥

सर्वत्र शाकल्यस्य॥ ५१ ॥

शाकल्यस्याचार्यस्य मतेन सर्वत्र द्विर्वचनं न भवति। अर्कः। मर्कः। ब्रह्मा। अपह्नुते॥

दीर्घादाचार्याणाम्॥ ५२ ॥

दीर्घादुत्तरस्याचार्याणां मतेन न द्वित्वं भवति। दात्रम्। पात्रम्। मूत्रम्। सूत्रम्॥

---

१ – ' आकर्षः ' इति है०।
२ – ' दर्शः ' इति न्यासपद०।
३ – ' उष्ट्रः ' इति है०।

झलां जश् झशि॥ ५३ ॥

झलां स्थाने जशादेशो भवति झशि परतः। लब्धा। लब्धुम्। लब्धव्यम्। दोग्धा। दोग्धुम्। दोग्धव्यम्। बोद्धा। बोद्धुम्। बोद्धव्यम्। झशीति किम् ? दत्तः। दत्थः। दध्मः॥

अभ्यासे चर्च॥ ५४ ॥

अभ्यासे वर्तमानानां झलां चरादेशो भवति, चकाराद् जश् च। चिखनिषति। चिच्छित्सति। टिठकारयिषति। तिष्ठासति। पिफकारयिषति। बुभूषति। जिघत्सति। डुढौकिषते। प्रकृतिचरां प्रकृतिचरो भवन्ति—चिचीषति। टिटीकिषते। तितनिषति। प्रकृतिजशां प्रकृतिजशो भवन्ति—जिजनिषते। बुबुधे। ददौ। डिड्ये॥

खरि च॥ ५५ ॥

खरि च परतो झलां चरादेशो भवति। जश्ग्रहणं नानुवर्तते पूर्वसूत्रे चानुकृष्टत्वात् (परि० ७८)। भेत्ता। भेत्तुम्। भेत्तव्यम्। युयुत्सते। आरिप्सते। आलिप्सते॥

वावसाने॥ ५६ ॥

झलां चरिति वर्तते। अवसाने वर्तमानानां झलां वा चरादेशो भवति। वाक्, वाग्। त्वक्, त्वग्। श्वलिट्, श्वलिड्। त्रिष्टुप्, त्रिष्टुब्॥

अणोऽप्रगृह्यस्यानुनासिकः॥ ५७ ॥

अणोऽप्रगृह्यसंज्ञस्यावसाने वर्तमानस्य वानुनासिकादेशो भवति। दधिँ, दधि। मधुँ, मधु। कुमारीँ, कुमारी। अण इति किम् ? कर्तृ। हर्तृ। अप्रगृह्यस्येति किम् ? अग्नी। वायू॥

अनुस्वारस्य ययि परसवर्णः॥ ५८ ॥

अनुस्वारस्य ययि परतः परसवर्ण आदेशो भवति। शङ्किता। शङ्कितुम्। शङ्कितव्यम्। उञ्छिता। उञ्छितुम्। उञ्छितव्यम्। कुण्डिता। कुण्डितुम्। कुण्डितव्यम्। नन्दिता। नन्दितुम्। नन्दितव्यम्। कम्पिता। कम्पितुम्। कम्पितव्यम्। इह कुर्वन्ति, कृषन्ति इत्यत्र णत्वस्यासिद्धत्वात् पूर्वं नकारस्यानुस्वारः क्रियते। तस्यापि परसवर्णेन पुनर्नकार एव

---

१ - ' वृषन्ति ' इत्यपपाठो मुद्रितेषु।

भवति। तस्याप्यसिद्धत्वात् पुनर्णत्वं न भवति। एवमनुस्वारीभूतो णत्वमतिक्रामतीति। ययीति किम् ? आक्रंस्यते। आचिक्रंसते॥

वा पदान्तस्य॥ ५९ ॥

पदान्तस्यानुस्वारस्य ययि परतो वा परसवर्णादेशो भवति। तङ् कथञ् चित्रपक्षण् डयमानन् नभःस्थम् पुरुषोऽवधीत्, तं कथं चित्रपक्षं डयमानं नभःस्थं पुरुषोऽवधीत्॥

तोर्लि॥ ६० ॥

तवर्गस्य लकारे परतः परसवर्णादेशो भवति। अग्निचिल्लुनाति। सोमसुल्लुनाति। भवाँल्लुनाति। महाँल्लुनाति॥

उदः स्थास्तम्भोः पूर्वस्य॥ ६१ ॥

सवर्ण इति वर्तते। उद उत्तरयोः स्था स्तम्भ इत्येतयोः पूर्वसवर्णादेशो भवति। उत्थाता। उत्थातुम्। उत्थातव्यम्। स्तम्भेः खल्वपि—उत्तम्भिता। उत्तम्भितुम्। उत्तम्भितव्यम्। स्थास्तम्भोरिति किम् ? उत्स्नाता ॥ उदः पूर्वसवर्णत्वे स्कन्देश्छन्दस्युपसंख्यानम्॥ अग्ने दूरमुत्कन्द ॥ रोगे चेति वक्तव्यम्॥ उत्कन्दको नाम रोगः। कन्दतेर्वा धात्वन्तरस्यैतद् रूपम्॥

झयो होऽन्यतरस्याम्॥ ६२ ॥

झय उत्तरस्य हकारस्य पूर्वसवर्णादेशो भवत्यन्यतरस्याम्। वाग्घसति, वाग् हसति। श्वलिड्ढसति, श्वलिड् हसति। अग्निचिद्धसति, अग्निचिद् हसति। सोमसुद्धसति, सोमसुद् हसति। त्रिष्टुब्भसति, त्रिष्टुब् हसति। झय इति किम् ? प्राङ् हसति। भवान् हसति॥

शश्छोऽटि॥ ६३ ॥

झय इति वर्तते, अन्यतरस्यामिति च। झय उत्तरस्य शकारस्याटि परतश्छकारादेशो भवत्यन्यतरस्याम्। वाक्छेते, वाक् शेते। अग्निचिच्छेते, अग्निचित् शेते। सोमसुच्छेते, सोमसुत् शेते। श्वलिट् छेते, श्वलिट् शेते। त्रिष्टुप् छेते, त्रिष्टुप् शेते ॥ छत्वममीति

---

१ - ' आचिक्रंस्यते ' इत्यपपाठो मुद्रितेषु ।

२ - ' उत्कन्द इति सविसर्गं मुद्रितेषु, लोटो रूपं यथान्यासम्।

३ - पदान्तादित्यपि पूर्वम् (८.३.२८) उक्तम्।

वक्तव्यम्॥ किं प्रयोजनम् ? तच्छ्लोकेन, तच्छ्मश्रुणेत्येवमर्थम्॥

हलो यमां यमि लोपः॥ ६४ ॥

अन्यतरस्यामिति वर्तते। हल उत्तरेषां यमां यमि परतो लोपो भवत्यन्यतरस्याम्। शय्या इत्यत्र द्वौ यकारौ, क्रमजस्तृतीयः, तत्र मध्यमस्य वा लोपो भवति। शय्या, शय्य्या। अदितेरपत्यमादित्य इत्यत्र तकारात् पर एको यकारः, 'यणो मयः०' (८.४.४७ वा०) इति क्रमजो द्वितीयः, तत्र मध्यमस्य वा लोपो भवति—आदित्यः, आदित्य्यः। आदित्यो देवता अस्य स्थालीपाकस्येति आदित्य्यः, आदित्यः, आदित्य्य इति। अत्रापि द्वौ यकारौ, क्रमजस्तृतीयः, तत्र मध्यमस्य मध्यमयोर्वा लोपो भवति। हल इति किम् ? अन्नम्। यमामिति किम् ? अर्घ्यम्। यमीति किम् ? शार्ङ्गम्॥

झरो झरि सवर्णे॥ ६५ ॥

हल इति वर्तते, अन्यतरस्यामिति च। हल उत्तरस्य झरो झरि सवर्णे परतो लोपो भवत्यन्यतरस्याम्। प्रत्तम्, अवत्तमित्यत्र त्रयस्तकाराः, क्रमजश्चतुर्थः। तत्र मध्यमस्य मध्यमयोर्वा लोपो भवति। मरुत्त्त इत्यत्र चत्वारस्तकाराः, क्रमजः पञ्चमः। तत्र मध्यमस्य मध्यमयोर्मध्यमानां वा लोपो भवति। मरुच्छब्दस्य ह्युपसंख्यानसामर्थ्यात् (१.४.५६ वा०) 'अच उपसर्गात् तः' (७.४.४७) इति तत्वं भवति। झर इति किम् ? शार्ङ्गम्। झरीति किम् ? प्रियपञ्च्या। अल्लोपस्य च 'पूर्वत्रासिद्धे न स्थानिवत्' (महाभाष्य १.१५४) इति स्थानिवद्भावप्रतिषेधादत्र चकारस्य ञकारे लोपः स्यात्। सवर्ण इति किम्? तर्प्ता। तर्प्तुम्। तर्प्तव्यम्। सवर्णग्रहणसामर्थ्यादिह संख्यातानुदेशो न भवति, सवर्णमात्रे लोपो विज्ञायते। तेन शिण्ढि पिण्ढि इति ढकारे डकारस्य लोपो भवति॥

उदात्तादनुदात्तस्य स्वरितः॥ ६६ ॥

उदात्तादुत्तरस्यानुदात्तस्य स्वरितादेशो भवति। गार्ग्यः। वात्स्यः। पचंति। पठंति। अस्य स्वरितस्यासिद्धत्वाद् 'अनुदात्तं पदमेकवर्जम्' (६.१.१५८) इत्येतद् न प्रवर्तते। तेनोदात्तस्वरितावुभावपि श्रूयेते॥

नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्॥ ६७ ॥

---

१ - यथासंख्यविज्ञानाद् माहात्म्यादिषु न दोषः।

२ - ' आन्नम् ' इति है०, तारा०।

३ - ' अग्निः ' इत्यधिकं है०, तारा०, तत्तु न युक्तम्।

उदात्तोदयस्य स्वरितोदयस्य चानुदात्तस्य स्वरितो न भवति। पूर्वेण प्राप्तः प्रतिषिध्यते, अगार्ग्यकाश्यपगालवानां मतेन। उदात्त उदयो यस्मात् स उदात्तोदयः। उदात्तपर इत्यर्थः। एवं स्वरितोदयः। उदात्तोदयस्तावत्—गाग्य॑स्तत्र। वात्स्य॑स्तत्र। तत्रशब्द आद्युदात्तः। तस्मिन्नुदात्ते परतो गार्ग्यशब्दः स्वरितो न भवति। स्वरितोदयः—गार्ग्य॑ः क्व॑। वात्स्य॑ः क्व॑। क्वशब्दः स्वरितः। तस्मिन् परतोऽनुदात्तः स्वरितो न भवति। अगार्ग्यकाश्यपगालवानामिति किम् ? गार्ग्यस्तत्र। गार्ग्यः क्व॑। तेषां हि मतेन स्वरितो भवत्येव। उदात्तस्वरितपरस्येति वक्तव्य उदयग्रहणं मङ्गलार्थम्। अनेकाचार्यसंकीर्तनं पूजार्थम्॥

अ अ॥ ६८ ॥

एकोऽत्र विवृतः, अपरः संवृतः। तत्र विवृतस्य संवृतः क्रियते। अकारो विवृतः संवृतो भवति। वृक्षः। प्लक्षः। इह शास्त्रे कार्यार्थमकारो विवृतः प्रतिज्ञातः (अइउण्), तस्य तथाभूतस्यैव प्रयोगो मा भूदिति संवृतप्रत्यापत्तिरियं क्रियते। दीर्घप्लुतयोश्चानेन विवृतेनाकारेण ग्रहणं नेष्यते। तेन तयोः संवृतो न भवति। संवृतेन च सर्वगुणस्य मात्रिकस्य ग्रहणमिष्यते। तेन सर्वगुणः प्रत्यापद्यते॥

इष्ट्युपसंख्यानवती शुद्धगणा विवृतगूढसूत्रार्था।
व्युत्पन्नरूपसिद्धिर्वृत्तिरियं काशिका नाम ॥

॥ इति श्रीवामनकृतकाशिकावृत्तावष्टमाध्यायस्य तुरीयः पादः समाप्तश्चायमध्यायो ग्रन्थश्च॥

